त्यर्थः तादृशेति प्रतियोगितावच्छेदकेत्यर्थः स्वसमानवृत्तिकत्वमिति प्रतियोगितावच्छेदकविशेषणमिति शेषः प्राहुरिति

अत्र एकोनेहूविनपादि प्रतीतेरमविषयकत्वमनुपगमं चिन्नेनस्वसमानवृत्तिकत्वविशेषणसार्थक्यमेव प्रकर्षः तेन

घस्वस्याधिकमेव समाधानमपि मेतमितिध्येयं स्वरूपसंबंधविशेषइति अन्यथा नवस्यापत्तेरिति भावः वह्नित्वान्यत्

वृत्तीतिवह्नित्वव्यापकेत्यर्थः संयोगेनाव्याप्यवृत्तित्वं डाघवच्छिन्नसाध्यकसाधारण्याय प्रतियोगिव्यधिकरणत्वस्याभावविशे

षणत्वस्यावश्यकत्वान्नानातरोऽभियात्वस्यवह्नित्वव्यापकत्वसंभवादिति भावः अभावेति न तु भ पत्वावच्छिन्नाभावेत्यर्थः

स्यादिति तथा च यद्धर्मावच्छिन्नत्वेन यस्य यद्धर्मसमानवृत्तिकत्वं तद्धर्मान्यूनवृत्ति यो धर्मस्तदवच्छिन्नत्वेनेत्यर्थ इति भावः

दीधितावत एवेत्यादि वह्न्यभावाणामाश्वरसादुक्तं तस्य त्वित्यादिकं मानतानुसरेणामयुक्तं विशिष्टसत्तात्वस्य विशेष्यविशेषण राम०

संबंधेषु पर्याप्ततयासत्तात्वस्य विशेष्यमात्रपर्याप्ततया सत्तात्वस्य विशिष्टसत्तात्वतुल्यवृत्तिकत्वाभावादतोऽस्वरसांत
रमाह नन्वेवमित्यादिना एवमपि व्याप्तिलक्षणस्यातिरक्तपारिभाषिकावच्छेदकत्वघटितत्वेपि अभावाप्रसिद्धिस्थलपु
नरुक्तरीत्याप्रसिद्धिस्थलमाह सत्तावद्भिन्नेति अतिव्याप्तिरिति व्याप्तिलक्षणस्यापादि अवच्छेदकस्य तादृशप्रतियोगि
तावच्छेदकस्य स्वव्यापकतावच्छेदकताद्यावच्छेदकतावच्छेदकभिन्नत्वं साध्यतावच्छेदके व्याप्तिलक्षणघटकाभिधेय
मेयत्वविशिष्टसत्ताविषयकधर्मिताद्यावच्छेदकतावच्छेदके प्रमेयात्मसत्ताव्यापकतावच्छेदकत्वसत्वात्प्रोक्तातिव्याप्तिरित्या
शयेनाह स्वसमानेत्यादि स्वपारिभाषिकावच्छेदकत्वेनाभिमतः अतिव्याप्तिरिति इदं च एकोनत्ररोधेन सर्वत्रोक्तविवक्षा
मित्याशयेनास्य साध्यमत्वादिनामेः स्वरूपतः साध्यतावच्छेदकापेक्षकविवक्षाभावेनातिव्याप्त्यभिधानासंगतेरितिध्ये
यं अतिव्याप्तिमुपपादयति तत्रध्यमत्वस्येति स्वरूपत एवेति ज्ञात्यतिरिक्तस्यैव स्वरूपतोवच्छेदकत्वानंगीकारादिति भा
वः अभावादिति तथा च घटादिनिष्ठताद्यावच्छेदकतावच्छेदकघटत्वादौ ध्यमत्वव्यापकतावच्छेदकत्वाभावादतिव्या

ष्टिरिति भावः स्वसमानेति स्वपदं हेतुपरं। यत्समानेति यत्पदं पारिभाषिकावच्छेदकत्वेनाभिमतपरं अभिधानेपीति यावत्
प्रमेयत्ववत्साध्यकसत्त्वादिहेतुनि न घटत्वानां प्रमेयत्वादिव्यापकतावच्छेदकत्वेन न कापि पूर्वोक्तातिव्याप्तिरिति भावः अव
च्छेदकलघुत्वस्यैवेति यावत् आमिलघुत्वस्य हेतुमानद्रव्यत्वादिव्यापकतावति अव्याप्तिरिति भावः इदमात्रेति मात्रपदं तत्स्वावच्छे
दाय अन्यथा दण्डिनादिरिक्षिविषयकज्ञानस्यापि प्रसक्तेः तयाऽवच्छेदकत्वासंभवेनासंगतेः ज्ञानमेवेति एवकारेण दण्डादेर्व्य
वच्छेदः इदं यथावृत्तिरिति सामान्याभावे तत्पर्यं आत्मवृत्तिरित्यादि द्वेषादेर्व्यापकाने गोकारेण तन्तुसंयोगरूपेण तवृत्तिरित्यस्यापि वा
च्यं अवच्छेदकत्वेन तत्तज्ञानस्यावच्छेदकत्वे अवच्छेदकत्वे इदं ज्ञानं स्वावच्छेदकत्वे लाघवादिति न व्याप्तोक्ताव्याप्तिर्दुर्वारैवेति भावः
गुरुधर्मेण साध्यतायां साध्यतावच्छेदकस्य पारिभाषिकावच्छेदकत्वमुपपादयति भवतीति हेतुमिति असंबद्धत्वेनेति साध्यतावच्छेद
कसंबंधेनेत्यादिर्हेतुनियामकसंयोगादिना साध्यत्वाभिप्रायेणेति नहीत्यनियामकसंयोगेन गगनस्य सत्त्वेऽपि न हीति
अभावः नहि अवच्छिन्नाभावः तदर्थस्य प्रतियोगि अधिकरणत्वात्र्यर्थत्व प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिमधिकरण राम.

न्योऽस्तीति तदवच्छिन्नप्रतियोगिताकं साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशो गौरवग्रस्ताशयेनाह साध्यतावच्छेदकसंबंधेनेति
अन्यप्रतियोगिमित्तिसप्तम्यंतमत्रघटकीभूतस्वरूपसंबंधरूपावच्छेदकतानिरूपकप्रतियोगितापरं प्रतियोगिव्यधिकरणान्य
मितिप्रतियोग्यनधिकरणावृत्तित्वमित्यर्थः प्रतियोग्यधिकरणावृत्तित्वोक्तौ धूमाभावादेरसंग्रहेणानिष्टापत्तिरिति व्याप्या
द्यभावः तेन निरुक्तप्रतियोग्यधिकरणावृत्तित्वविवक्षणेन विकल्पोऽत्र हेतुमेति विकल्पोक्तप्रायहेत्वसम्पर्थः सच हेतुम:
प्रतियोगितावच्छेदकावच्छिन्नयत्किंचित्प्रतियोगिवैयधिकरण्याभ्युपगमात्तिकत्वावच्छेदेन धूमवत्पर्वतादिहेतौ रपि
धूमाद्यभावस्य धूमत्वावच्छिन्नमहानसीयधूमाद्यनधिकरणवृत्तित्वेन धूमवत्त्वावच्छेदकलक्षणाव्याप्त्यादिरूपः य व्या
प्ते सिद्धांतलक्षणोक्तहेतुरूपकपिसंयोगादिसाध्यकाव्याप्त्यादिरूपतयाऽसंगतेरिति ध्येयं साध्यतावच्छेदकसंबंधेन
न्यस्य व्याप्तिमाह नवेति समवायेनेति यत्किंचित्संबंधेन प्रतियोग्यधिकरणत्वनिवेशाभिप्रायेणाह संबंधसामान्येने
तितथा च सामान्यांतर्गतसंयोगेन धूमाद्यधिकरणत्वस्य पर्वतादौ सत्त्वेन संबंधसामान्येन प्रतियोग्यधिकरणतद्भाव

टी·

२८

वृत्तित्वं न पर्वतादाविति भावः प्रतियोगितावच्छेदकावच्छिन्नेत्यस्य साध्यवत्त्वमाह न चेति· क्रमेणासिद्धान्तलक्षणे क्रमेण· प्रतियो
ग्य समानाधिकरणा इत्यतो व्यतिरेकः प्रतियोगिव्यधिकरणत्वाप्रसिद्धेति कालिकसंबंधेन गगनत्वावच्छिन्नाधिकरणा
त्वाप्रसिद्धेरिति भावः न गगनत्वस्येति न्याय न तत्र पारिभाषिकावच्छेदकाप्रसिद्धिनिबंधनाव्याप्तिरिति भावः तेन साध्य
तावच्छेदकसंबंधो ग्राह्य इत्यनेन साध्याभावसाध्यव्याप्तिमाह न चेति केवलान्वयिनि लक्षणासमन्वयाद्याह व्याप्तिरिति स्ववि
शिष्टेत्यादि पदमपि विशेष्यगुणसंबद्धत्वस्य सत्वात्स्वविशिष्टविशेषणतासंबद्धत्वसत्त्वं विशिष्टस्यानतिरिक्तत्वादिति स्वविशि
ष्टेति करणेऽपि नेष्टसिद्धिस्तथापि येन रूपेणाव्याप्त्यादिसंबद्धत्वेन तत्रापि तद्रूपरूपेणातद्भाववत्सु संबद्धत्वस्याव्याप्यवृत्ति
त्वमित्यभिप्रायेणोक्तत्वं भिधानं कालिकविशेषणतायाः साध्यतावच्छेदकतायां केचिद्दोषमुक्ताविशेषणतान्तरस्यान्तर्भा
पि दोषमाह ध्वंसवानित्यादि उभयत्रापि साध्यताकालिकविशेषणतासंबंधेन बोध्या गगनादिनिष्ठत द्वित्वे स्वरूपत स्य
त्वाद्देशत्वेति यामकसंयोगे न विशिष्टत्वस्याप्रसिद्धिरत आह स्वत्वेनेति स्वनितानियामकसंयोगत्वादिना संबंधत्वा रामः

नभ्युपगमादाह कालिकेनेति · द्वितीयाभिप्रायेणाह ध्वंसत्वीयेति · तेन साध्यतावच्छेदकताघटकेन · अवह्नेरिति न गगनत्वा
देः कालिकविशेषणतया घटादेर्वृत्तित्वमस्त्येवेति भावः । तथापि कालिकविशेषणतया गगनत्वादिविशिष्टघटादेर्गग
नत्वाद्यवच्छिन्नाभाववति कालादौ संबद्धत्वेनावच्छेदकाप्रसिद्धेः कंबुग्रीवादिमत्त्वस्य स्वरूपसंबंधेनावच्छेदकत्वेऽपि विषयि
तयाऽवच्छेदकत्वेन विषयितया कंबुग्रीवादिमत्त्वावच्छिन्नाभाववति विषयितया कंबुग्रीवादिमत्त्वविशिष्टस्यासंबद्धत्वे
न कंबुग्रीवादिमत्त्वादेर्न निरवच्छेदकत्वापातः इत्यत आह वह्निमानिति साध्यतावच्छेदकताघटकसंबंधेन स्वविशिष्टत्वोक्तौ
स्य लक्ष्ययोः अवच्छेदकाप्रसिद्धिरज्ञानत्वप्रतियोगितावच्छेदकताघटकसाध्यतावच्छेदकताघटकान्यतरसंबंधेन स्ववि
शिष्टत्वोक्तौ द्वितीयस्याऽवच्छेदकाप्रसिद्ध्यभावेऽपि प्रथमस्यालक्ष्येसत्त्वात् तत्पक्षेत्यभिप्रायेणाह कालिकेनेति अन्यतरसंबंधेन ·
अन्यतरघटकप्रतियोगितावच्छेदकताघटकसंबंधेन · तद्विशिष्टसामान्यस्येति गगनाद्यात्मकस्येति शेषः · तदवच्छिन्न
नितादृशाभावप्रतियोगितावच्छेदकीभूतगगनत्वाद्यवच्छिन्नेऽप्यर्थः धूमसंबंधिन इति अत्र नाशात्मना धूमस्य साध्यताव

टी० छेदकत्वमिति भावः अवच्छेदकीभूतसमन्वेमितातादात्म्यधर्माद्यवच्छिन्नाभावप्रतियोगितायां धर्मत्वेन धूमस्य तादात्म्येनावच्छेद
कत्वापि हृदयास्वरूपतो धर्मत्वस्य समवायेनावच्छेदकत्वेऽलाघवादिति भावः नाहृदयाप्रतियोगितावच्छेदकधर्मत्वाद्यवच्छिन्नाभा
ववति व्यभिचारानिरूपकाधिकरणो विषयितासंबंधेन धर्मत्वादिविशिष्टज्ञानादेरसंबद्धत्वात् येन संबंधेन धूमत्वादिप्रकार
कज्ञानमपेदस्य साध्यतावच्छेदकताघटकसमवायादिना धूमत्वादिप्रकारकज्ञाने सत्त्वेन धूमवान्वह्नेरित्यादावतिव्याप्तेराहृदये
न येनेति अत एव पारिभाषिकावच्छेदकत्वस्य लक्षणेऽप्रवेशेपि साध्यतावच्छेदकप्रकारकज्ञानेनाहृदयावच्छेदकप्रकारकज्ञा
नमेदनिवेशस्यावश्यकत्वादेव विवेचयिष्यते चेदमिति अत्रेदं चिंत्यमित्यादिनेत्यादिः एतद्दर्शनं तरमत्रेत्यादि विवक्षितत्वा
दित्यंतयावत् कश्चित्पुस्तके हृदयमिति संपातायात इति ध्येयं असंबद्धत्वादिति अव्याप्तिरत इति शेषः सामान्यस्य तदंतर्गत
स्य नन्वत्र हेत्वधिकरणीभूतयत्किंचिद्व्यक्तौ साध्यतावच्छेदकसंबंधेनासंबद्धं यद्धिशिष्टसामान्यं तन्निष्ठप्रतियोगिकत्वलक्षणोक्तं
तद्वच्छिन्नाभाववदित्यादि गौरवग्रस्तमिति चेदत्र केचित् सन्नावान्भावत्वादित्यादावतिव्याप्तिवारणाय हेत्वधिकरणीभूत राम०

त्यादेस्साध्यतावच्छेदकसंबंधसामान्ये यद्धर्मविशिष्टप्रतियोगिकत्वहेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वोभयाभा
वत्तत्त्वमित्यर्थः तावताच्च पक्त्वेन गुरुतया तद्वच्छिन्नेमादेरेवलघुत्वमिति वदंति तन्न दसनतुल्ययुक्तेोभयाभावगर्भत्वेन तदुभ
याभावगर्भप्रतियोगित्वैयधिकरण्यघटितत्वेन च तद्वच्छिन्नत्वादेरेव गुरुत्वात् वस्तुतस्तु यथासंनिवेशः ऽवैयर्थ्येन
तस्य लघोरपि लक्षणांतरत्वेन प्रकृतलक्षणे तयोः निवेशानवकाश इति ध्येयं विशिष्टसत्तायास्त्वपि विशिष्टसत्त्वविशिष्ट
सामान्यस्यापि संबद्धत्वादिति संबद्धत्वस्य च पूर्वोपदर्शितरीत्या ऽप्यवृत्तित्वे मानाभावादित्याशयः नद्यर्थः स्वविशि
ष्टसामान्यकालीनतार्थः आधेयतानवच्छेदकत्वादिति गुरुधर्मे प्रतियोगितावच्छेदकत्वस्य वाधेयतावच्छेदकत्वस्याप्यभाव
दिति भावः पूर्वं निरुक्तसंबंधेन येनयेन संबंधेन तथात्वेति एतस्यापि हेतुसमानाधिकरणात्यंताभावप्रतियोगिता
वच्छेदकं येनयेनसंबंधेन स्वविशिष्टसंबंधितिष्ठात्यंताभावप्रतियोगितानवच्छेदकं तेनतेनसंबंधेन तत्प्रकारकत्वानभि
न्नसाध्यतावच्छेदकताघटकसंबंधेन यद्धर्मप्रकारकत्वानंतद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति पर्यवसितार्थो

टी॰ 30

ध्यः प्रतियोगीतेतितत्तत्संबंधावच्छिन्नप्रतियोगीतेत्यर्थः संबंधांतरेणेतिसंबंधीत्पनेनान्वितंप्रतियोगितावच्छेदकत्वा
त् तत्तत्संबंधावच्छिन्नप्रतियोगितावच्छेदकत्वात् अव्याप्यवृत्तिकपिसंयोगादेस्समवायेनसाध्यतायांघटत्वादेरेवावच्छे
दकस्यप्रसिद्ध्यानावच्छेदकाप्रसिद्धिर्निर्वंधनाव्याप्तिरित्याशयेनाहसंयोगेनेति प्रतियोगितावच्छेदकत्वात्संयोगेनाभाव
प्रतियोगितावच्छेदकत्वात्संयोगेनद्रव्यस्याव्याप्यवृत्तित्वादितिभावः प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरण
त्वं प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं तदर्थः प्रतियोग्यधिकरणास्पदार्थः तादृशाभावेतिप्रतियोगि
अधिकरणहेतुसमानाधिकरणाभावेत्यर्थः अभावः अतीतानागतादिध्वंसेरभावः तस्यकालिकादिसंबंधेनापिप्रति
योगिसाम्या 'नाधिकरणासंभवादितिभावः गगनत्वादित्यादावित्यत्र गगनत्वेगगनपदवाच्यत्वादिकंबोध्यंतेननसा
ध्याभेदः केनापिसंबंधेनेतिपृथिव्यधिकरणेगगनेघटत्वादेः केनापिसंबंधेनासत्वादितिभावः संबंधितिष्ठाभावेतिसंबं
धितिष्ठसंबंधसामान्येनप्रतियोग्यधिकरणाभावेत्यर्थः साक्षात्संबंधेनप्रतियोगितेयधिकरणेत्यानतादृशाभावेनत्रा राम॰

हएवमितितं॰ गगनत्वादिकं॰ तादात्म्यसंबंधस्याधिकरणत्वानियामकत्वपाक्षमुक्तेरेषइत्यतआह तादात्म्यादिसंबंधेने
ति॰ तद्घटितयाप्रतियोगिव्यधिकरणत्वार्थतया॰ एवं॰ असंबंधित्वनिवेशे॰ मानाभावस्याप्रिरीयाद्याह एतावतापीति
असंभवस्य॰ ताद्दृशाभावाप्रसिद्धिनिबंधनासंभवस्य अनपायादिति निष्कृष्टतासंभवाभावेपि संदिग्धासंभवसत्त्वादिति भा
व विशिष्टसत्तात्वमपीति विशिष्टसत्ताभावस्यप्रतियोगिसमानाधिकरणत्वादिति भावः विशिष्टसत्तादिसाध्यकेऽतिप्र
संगवारणायैव तन्मात्रार्थकं स्यादत आह ज्ञानेति प्रतियोगिभेदेपीति तथा चाभावभेदे नैव प्रतियोगितायाभिन्नतया व
न्निरूपितावच्छिन्नप्रतियोगिताया ऐक्यान्नोक्तव्याप्तिरिति भावः एवं समनियताभावप्रतियोगिताया ऐक्ये॰ कथमिति ताद्दृशा
भावाप्रसिद्धिरिति भावः तद्दूषणस्येति त्यामीत्यादि(?)प्रमेयत्वस्य नियतत्वेपि साध्यतावच्छेदकसंयोगेन प्रतियोगिवैयधि
करण्यमस्त्येव तथापि तत्र प्रतियोगितावच्छेदकसंबंधनिवेशाभिप्रायेणाह तत्र साध्यतावच्छेदकसंबंधनिवेशोऽसंयोगेन
घटादिभावस्यघटवद्वृत्तित्वविशिष्टप्रमेयाभावाभिन्नतया तद्प्रसिद्धिरिति व्या   भिन्नैवेति तथा च नोक्तरीत्यातिव्या)

तिरिति भावः ननु द्रव्यत्वेनास्ति विशिष्टसत्ता नास्तीति प्रतीतिवैलक्षण्यानुरोधेनावच्छेदकभेदेन प्रतियोगिताभेदसि
द्धिस्तथा सत्येव किं द्रव्यप्रतियोगिताकत्वविषयभेदसंभवादित्यत आह प्रतीतिवैलक्षण्यस्येति प्रतियोगिताभेदाभावेपीति
शेषः अवच्छेदकभेदेनैव द्रव्यत्वावच्छिन्नविशिष्टसत्तात्वरूपप्रतियोगितावच्छेदकात्मकविषयभेदेनैव एवं सति · अवच्छेद
कभेदेनैव प्रतीतिवैलक्षण्योपपत्तौ प्रतियोगिताः निरवच्छिन्नाभावप्रतियोगिता· स्यादिति घटत्वाद्यवच्छेदकभेदेनैव घटो नास्ती
त्यादिप्रतीतीनां वैलक्षण्योपपत्तेरिति भावः ननु प्रतियोगितावच्छेदकभेदेन प्रतियोगिताभेदानंगीकारे घटत्वादेः पर्याप्तिसा
धारणप्रतियोगितायाम्न्यूनवृत्तित्वेनावच्छेदकत्वानुपपत्तिरत आह वस्तुतस्त्विति तिस्रतिव्याप्तिरिति साध्याभावस्य सत्ता
दिरूपप्रतियोगिसामानाधिकरण्यवत्त्वरूपाघटकत्वादिति भावः तत्र एतद्रूपासमवेतेनैतद्रूपभिन्नयावत्समवेताद्यभाव
माद्यायाप्तिव्याप्तिपरिहार इत्याशयेनाह एतद्रूपासमवेतेनेति एतद्रूपासमवेतेनैतद्रूपभिन्नयावत्किंचित्समवेताद्यभावमाद
यातिव्याप्तिपरिहारसंभावनायामभावादाह एतद्रूपभिन्नयावदित्यादि संबंधिनीति गगनपरमाण्वादावपीति शेषः गगनमा रम०

वृत्त्येति तस्यापि उभयाभावघटितप्रतियोग्यधिकरणत्वादिति भावः नाहशाभावेति उभयाभावघटितप्रतियोगिवैय
धिकरण्याप्रसिद्ध्यं स्यादप्रसिद्धत्वादेरिति घटत्वादेरिति पाठस्तु प्रामादिकः भावेत्यर्थः घयोऽभावः अतीतानागतनत्वेद्य
केरभावः वाच्यमितित्याव गगनत्वादेस्तादात्म्येन गगनत्वविशिष्टं संबंधिगगननिष्ठभेदप्रतियोगितानवच्छेदकत्वादुस्
त्वत्वादेस्तादात्म्येनत्वात्स्वविशिष्टं संबंधित्वन्निष्ठभेदप्रतियोगितावच्छेदकत्वादयान,देपानवकाश इति भावः संबंधिनि
ष्ठेति तादात्म्येन संबंधितसत्तानिष्ठेत्यर्थः प्रतियोगितानवच्छेदकमयेतिकेकनविशेष्यविशिष्टभेदासत्वादिति भावः प्रतियो
गी अधिकरणः उभयाभावघटितप्रतियोग्यधिकरणः यो भेदः घटादिभेदः अवच्छेदादिनित्याव विशिष्टसत्ताभेदस्य
साध्यतावच्छेदकसमवायेन स्वप्रतियोगितावच्छेदकसंबंधावच्छिन्नसत्तासमानाधिकरणत्पालन्हरणाघटकत्वयानोक्तरीत्या
ऽप्रसंग इति भावः संबंधीतिस्वव पर्वेति शेषः अभावः घटघभावः संयोगेनेति साध्यतावच्छेदकसंबंधसामान्यरूपादिति
ष्येत्यादिः जन्यपरमाणावितिअतएव पार्थिवपरमाणोरूपसामान्याभावसत्वेन सामान्यतो घटादिकवद्धिसाधुपेक्षानलद्य

टी० त्मकवह्न्यायुक्तमिति ध्येयं अत्र व्रमस्मादिरिति हेतोः संभवत्त्वेन प्राबल्यं संपन्नतावान् स्यादिति शिवेनियमस्त्वेत्यादिभाषिकाव
च्छेदकपरं पर्यवच्छिन्नेति अत्र प्रमेयं हेतुसमानाधिकरणतानां च्छाभावप्रतियोगितावच्छेदकपरं प्रतियोगिव्यधिकरणत्वे
चेति पर्यवच्छिन्नाभावविशेषणीभूतत्वादि पूर्वोक्तरीत्या साध्यतावच्छेदकसंबंधतामान्यत्वादिरीत्या विशिष्यतत्र घटितत्वा
दिना गुरुतया धर्मत्वविशिष्टप्रतियोगिकत्वानुयोगि) घटितोभयत्वापेक्षया गुरुतया यद्यपि द्वित्वान्मको उभयत्वव्यक्ति
शरीरे प्रमेयधर्मत्वादेरप्रवेशेन न गुरुत्वं न यापि प्रमेयसंबंधगतप्रतियोगिकत्वानुयोगिकत्वनिष्ठोभयत्वस्य संख्यारू
पत्वात् संभवेनापेक्षाबुद्धिविशेषविषयत्वरूपतया तत्र विशेषणीयं पद्विशिष्टप्रतियोगिकत्वविषयत्वावच्छिन्नपर्यवच्छि
न्नाभावाभावत्वानुयोगिकत्वविषयत्वमेवोभयत्वं तत्प्रयायप्रमेयधर्मत्वविशिष्टप्रतियोगिकत्वघटितोभयत्वस्य धर्मत्वविशि
ष्टप्रतियोगिकत्वघटितोभयत्वापेक्षया गुरुत्वेऽपि संबंधं न हानिः न प्रमेयधर्मत्वस्यावच्छेदकत्वहानिः इत्यं च स्वविशिष्टप्र
तियोगिकत्वस्य विशिष्यो पादानस्यावश्यकत्वेन वह्नित्वेति प्रतियोगिभेदेन प्रतियोगिकत्वस्य भेदाद्धिति भावः पूर्वकल्पे गो राम०

एवंचस्त्वेवलाघवाय प्रकारांतरमाहुः इत्थमित्यादि कूटेति उक्तरीत्या सामान्यासामान्याभावनिवेशासंभवादिति भावः तादात्म्यनिवेशफ
लमाहुः गगनेत्वेति साध्यतावच्छेदकसंबंधनिवेशफलमाहुः सत्तावानिति वह्निमत्वेनैव वह्नेः साध्यत्वे आकाशसंयुक्तत
नीयादिहृदादावित्यव्याप्तिः यत्कोवृत्त्यनियामकसंयोगेन गगनस्यासंबद्धतया गगनाभावस्य प्रतियोगिवैयधिकरण्या
त्व्याप्तिरत आहुः द्रव्यत्वेति माहुः स्वरूपसंबंधेन तादात्म्यतरसंबंधेन एवमग्रेपि सत्तावान् जातेरित्यादौ तादात्म्येन सत्तात्वविशि
ष्टसत्तानिष्पत्तादात्म्येन प्रतियोगिव्यधिकरणतायोभावस्तत्प्रतियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वे तादृशप्रतियोगि
तावच्छेदके सत्त्वेन सत्तात्वादेरवच्छेदकत्वापत्तिरतो यत्नेनैतन्येनेमितप्यायस्थीयांश गतिसमवायेन सत्तात्वविशिष्टसंबंधिनिग
गादौ विशिष्टसत्ताभावस्य समवायेन विशिष्टसत्तात्वावच्छिन्नव्यधिकरणतया नोक्तापत्तिरिति भावः कालोपधेत्वादिका
लपरिमाणादिव्याप्तौ च तादात्म्येन गगनत्वविशिष्टसंबंधिप्रसिद्ध्या गगनत्वस्यावच्छेदकत्वोपपत्तिरिति ध्येयं सर्वत्वविशि
ष्टसंबंधिनीति ईश्वरत्ताने महाकालेचेतिशेषः उत्तरलक्षणे तुरोनिप्रतियोगिताधर्मिकोभयाभावघटितलक्षणोपयर्थः ड

३३

65

टी· 33

कं रीत्यावच्छिन्नमात्रारीत्यावाग्निं तनयं यस्यासंयोगे वै नैवोपपन्नो संयोगे वैनोक्तलक्षणाभिप्रायकत्वं वर्तनिमनुचितमित्यस्वरसाद्
हाकुरिति · वाकारः समकमिति वाकारः अनेनैव · एकं कल्पस्य ग्रेयस्तादेव · एवं च वाकारैस्यव्यवच्छिन्नविकल्पार्थत्वेव इत्यन्ता
न्यादिघटवाकालपरिमाणादिन्यायवच्छेदकामसिद्धिरिति हेत्वाभासः नन्वसाधारणस्य समाधानं समाधानाभासः वस्तु
तत्पोक्तरीत्याप्रसिद्धाभावादेव हेत्वाभासत्वं तत्र हि दिमनस्याप्रयोजकत्वाद्भ समाधानस्याभासत्वं · आहुरिति अनेन तन्न्यं व्या
विरोध एवात्र प्रकर्षः कालोपट्वाकालपरिमाणादिस्याप्यनुरोधेन प्रत्यमावच्छेदकत्वाभावहानस्याप्यनुमितिहेतुत्वात्प
कत्वेसत्ताबाद्ध्येयत्वादिस्वाहेत्वयथमतिरिक्तावच्छेदकत्वाभावस्य सत्त्वे सत्त्वात्नञ्ज्ञानाद्युमं विनैवसत्ताद्यनुमित्यापत्तेरित्य
स्वरसो बोध्यः नन्वेवमिति माघवतार गोकुले हेतवस्य दुर्वारत्वादाहायमिति अव्याप्तिरस्य पर्यायः स्वरूपसंबन्धरूपावच्छेदकस्ये
तिनयावच्छेदकस्य स्वरूपसंबन्धरूपत्वाभावेनानन्वयइतिवाच्यं स्वरूपसंबन्धरूपेत्यस्यावच्छेदकतापर्याप्तिकावच्छेदकपदा
र्थैकदेशावच्छेदकतायामन्वयात् किं त्वितिपरिभाषिकावच्छेदकसंबन्धस्यासत्त्वमेतीतिभावः तेनेति अन्यथावच्छिन्न वि राम०

षयकप्रतीतेर्वह्नित्वाभिन्नमहानसीयवह्नित्वविषयकत्वेन वह्नित्वेन महानसीयवह्नित्वाविषयकप्रतीतिविषयत्वस्या
निर्वाहादिति भावः नियतसमूहालंबने मानाभावादाह यद्विवेति प्रकारतायाः प्रकारतया निवेशो गौरवादाह प्रकारतास
बंधेनेति कारणत्वापेक्षया वस्तुगत्या कारणाभाववद्वृत्तित्वरूपकार्यताया लघुत्वमभिप्रेत्याह कार्यतान इति एतदंकुर
त्वेति प्रकारतासंबंधेन एतदंकुरत्वावच्छिन्नकार्यतात इत्यर्थः एवमग्रेपि· प्रमेयत्वधूमत्वयोरेव प्रमेयत्वधूमत्वस्थानका
रणतायां प्रकारतया कार्यतावच्छेदकत्वेन प्रमेयधूमत्वस्य कार्यतानवच्छेदकत्वादाह विशेषणतेति कार्यतेति प्रकारतये
त्यादि· अभावप्रतियोगितायां· विशिष्टसत्ताभावप्रतियोगितायां पूर्वोक्तहेतुतायोः स्वरूपस्य पारिभाषिकावच्छेदकपरत्व
याः अनत्यरत्वशंकानिरासार्थमाह स्वमिति। स्वविशिष्टेत्यादिकं च यागुक्तोभयाभावप्रतियोग्येकदेशोत्कीर्तनमित्याशये
न समुदितपर्यवसितार्थमाह इत्थं चेत्यादिना आश्रयसंबंधिनिष्ठेति आश्रयीभूतायां सत्तायां तत्संबंधी यो गुणादिस्तन्निष्ठेत्यर्थः
सत्तात्वादिकमेवेति रत्नकारेण विशिष्टसत्तात्वमवच्छेदः तस्य स्वाश्रयसंबंधिगुणादिनिष्ठाभावप्रतियोगितावच्छेदकत्वा

दिति भावः अभावेति विशिष्टसत्ताभावेत्यर्थः तदवच्छेदकत्वस्य सत्तात्वाद्यवच्छेद्यत्वस्य सत्तात्वादिपर्याप्तावच्छेदकताकत्वे
स्येति यावत् यत्संबंधि घटत्वभूतलादिकं द्रव्यत्वाद्येति ननु धूमत्वादिकमिति भावः अतिव्याप्तिरिति संबंधसामान्येन संबंधि
त्वोक्तौ कालिकादिसंबंधेन धूमत्वादिविशिष्टसंबंधिपदगोलकादिनिष्ठाभावप्रतियोगितानवच्छेदकं न धूमत्वादिकं तु द्र
व्यत्वाद्येव तदवच्छेदकत्वसंयोगाद्यवच्छिन्नत्वोभयाभावस्य कम्बलादिसमानाधिकरणाभावप्रतियोगितासामान्यसत्त्वादिति व्या
प्तिरिति भावः अयोगोलकादेरवृत्तेति योऽभावः संयोगावच्छिन्नतत्प्रतियोगितानवच्छेदकं द्रव्यत्वाद्येव तदसिद्धमत आह ध्वंसा
दाविति आदिना प्रागभावादिपरिग्रहः जन्यमात्रस्य कालोपाधितया ध्वंसादेः कालिकसंबंधेन धूमत्वविशिष्टसंबंधित्वदर्शनं त
थात्वात् ध्वंसादिनिष्ठाभावीयसंयोगावच्छिन्नप्रतियोगितानवच्छेदकत्वात् ननु घटाभाववत्त्वादेरपि संयोगावच्छिन्नघटाभा
वाद्यभावप्रतियोगितावच्छेदकत्वमेवेत्यत आह घटाभावस्येति अभाववत्त्वेनैवेति संयोगेनाभाववत्त्वावच्छिन्नाभावस्य घटा
भावत्वाद्यवच्छिन्नाभावस्य च समनैयत्यादिति भावः एवमपि तादृशानवच्छेदकप्रसिद्धावपि प्रसिद्धिसंभवादिति अभाव राम०

त्वावच्छिन्नभेदस्य घटाभावत्वाद्यवच्छिन्नभेदासमनैयत्यादित्तिभावः अनन्तघटाभावत्वादेरेकत्र यावन्नादेव · नभवतीति ए
मेन वह्निमान् धूमादित्यादौ तादृशानवच्छेदकाप्रसिद्ध्या ऽव्याप्तिरिति संबंधित्वं साध्यतावच्छेदकसंबंधेन वाच्यमिति यत्त्वैकेषु
कुक्तं तन्न मतं दूषितं रूपद्वयमेव · धूमवान् वह्नेरित्यादावतिव्याप्तिवारणायमेव · संयोगीसत्त्वादित्यादौ संयोगत्वादेस्ताद
शानवच्छेदकत्वाभावेपि द्रव्यत्वादेरेव तादृशानवच्छेदकत्वयानत्वव छिद्यत्वसमवायावच्छिन्नत्वोभयाभावस्य तादृशा
द्रव्यत्वाभावादिप्रतियोगितायामसत्त्वेनातिव्याप्तेरभावादिति भावः प्रतियोगितावच्छेदकेति तादृशप्रतियोग्यनधिकर
णावृत्तित्वमित्यर्थः तादृशप्रतियोगिसामानाधिकरण्य भावोक्तौ संयोगेन साध्यतायां संयोगेन घटाभाववादेः संग्रहेणा
तादृशप्रतियोगिसमानाधिकरणं घटमादाय त्वोक्तौ तादृशसंयोगावच्छिन्नघटत्वाद्यभावप्रतियोगितानवच्छेदकघट
त्वाद्यवच्छिन्नत्वघटितोभयाभावस्य तादृशप्रतियोगितायामसत्त्वेनाव्याप्तिप्रसंगात् प्रतियोगितायामिति सत्त्वेनैस्य त
ताने नान्वयः प्रतियोगितावच्छेदकावच्छिन्नत्वस्याव्याप्तिमाह स तावान् जातेरिति प्रतियोगितानवच्छेदकमिति विशेष

टी ३५

सत्ताभावस्यसत्ताद्यप्रतियोगीसमानाधिकरणत्वादितिभावः सत्त्वेपिचेतिनाव्याप्तिर्वेस्तान्नयः वाकारोप्यवस्थितविकल्पा
र्थः साध्यतावच्छेदकसंबंधेनप्रतियोगित्वविवक्षणायोपक्रमतेहेत्वनियामकेत्यादिनाहेत्वनियामकसंबंधस्याभावप्रति
योगितावच्छेदकत्वविवक्षामात्रेणायमित्यादेः प्रतियोगितावच्छेदकत्वासंभवेनमेयत्वादेरेवतादृशाभावच्छेदकत्वेनतदव
च्छिन्नस्यसमवायादिनामेयसामान्याभावप्रतियोगितायांप्रसिद्धानासंभवसंभावनेत्यतउक्तंहेत्वनियामकसंबंधस्याभा
वप्रतियोगितावच्छेदकत्वइतिमेयत्वादेरेवकेवलान्वयितयातादृशाभावप्रतियोगितानवच्छेदकत्वसंभवइत्यतआहमेय
त्वादेरपीतिपर्वतादावपिजलाभावेत्यनेनान्वितंवह्निमत्तामिसंयोगेनेत्यादि वह्निमत्त्वेनैवेति संयोगेनसमवायेनतदन्यतरा
भावस्यतेनसंबंधेनवह्निमत्त्वावच्छिन्नाभावसमनैयत्यादितिभावः अथविशिष्टगमत्वविरहेणाद्धेत्वाभावत्वस्याभावत्वस्य
वावच्छेदकत्वसंभवेनवह्निमत्त्वेनैवेसंसंगतमितिचेत्तत्रवह्निमत्त्वापेक्षयागुरुतयातद्वावच्छिन्नाभावस्याभावतदन्यतराभा
वासमनियततयातन्निष्ठानवच्छेदकत्वात्एवकारस्यान्यतरत्वमात्रस्यावच्छेदकत्वादि ननुवह्निमतिविपर्ययिताद्विनात राम॰

द्भवतरामभावत्वेन नञ्प्रतियोगितायां तद्भवतरत्वेनैवावच्छेदकत्वं वाच्यः उद्दत्वाभावादिविषयकज्ञाने साधारणस्य
विषयितया वह्निमत्वाद्यवच्छिन्नाभावस्य तादृशज्ञानाव्यामतराभावासमनैयत्येन वह्निमत्वादेस्तदवच्छेदकत्वासंभवा
द्धतश्चाह विषयितादीति यद्यपि तादृशज्ञानान्यतरस्य विषयितयाज्ञाने व्याप्तिन्येन विषयिताया व्यधिकरणसंबंधत्वेन संभवति
तथापि व्यधिकरणसंबंधस्य नियामकत्वं तथा च विषयितायास्तत्वनियामकत्वेन तेन संबंधेन तद्भवतराभावस्य तद्भवतरत्वं
गौरवेण न प्रतियोगितावच्छेदकं किंतु वह्निमत्वादिकमेवेत्याशयः प्रकारांतरं वास्मत्कृतभवानंदीप्रकाशेऽनुसंधेयं अन्यत
रत्वस्यैवैनिरवच्छेदकारेणाधि मत्वादेश्चावच्छेदकः कालत्वादि घटादिमत्वस्य साध्यत्वे कालिकविषयिताभ्यां तत्संबंधिनिरवच्छ
कालेघटादिमात्रविषयकास्मदादिज्ञाने चातीतानागतव्यक्त्यभावस्य पटाद्यभावस्य च कालिकविषयिताभ्यां प्रतियोगि
व्यधिकरणस्य प्रसिद्धिः संभवतीति जगदाधारत्वस्य सर्वस्य च साध्यतानुसरणं अत्र प्रथमे कालिकसंबंधेन जगतः सा
ध्यत्वे वोध्यं तेन न तत्र स्वरूपसंबंधस्य साध्यतावच्छेदकसंबंधतया कालिके साध्यसंगतिनप्रसिद्धिसंभवश्चेति शंकाया

दी. 36

अनवकाशः कालपरिमाणादिरितिप्राचांमते क्रियामात्रस्यैव कालोपाधितया जन्यद्रव्यस्य परत्वं कालेनव्यभिचारः नवीनम
ते च महाकालपरिमाणस्यैव तुल्यं द्रव्यसमतामव्यभिचार इति ध्येयं निष्ठाभावेति निरूपकतिप्रतियोगी अधिकरणाभावे सर्थः एव
मग्रेपि जगदाधारत्वं सर्वविलयपर्यवसितमेवेत्याशयेनाह सर्वस्याविशिष्टसंबंधि महाकालेति एतेन पूर्वपक्षे जगदाधारत्व
साध्यके ऽव्याप्तिरव्यासिद्धत्वं तेसर्वत्वसाध्यके ऽव्याप्तिरुद्धिमत इति यैष व्यक्तिमिशंका निरस्ता अत्र महाकालतीश्वरत्वान
स्यकालिकसंबंधावच्छिन्नत्वेतिविषयतासंबंधावच्छिन्नत्वस्य कालपरिमाणेति नित्यसविषयकत्वस्योपलक्षकं तेन पूर्वप
क्षोक्तद्वितीयाव्याप्तिरप्युद्धृता भवति अतिप्रसंजकतयेति नाह आप्रतियोगितावच्छेदकेपि यत्किंचित्प्राहशावच्छेदकभेदसत्वा
दितिभावः उभयाभावलक्षणे उभयाभावघटितलक्षणे नाह शम्प्रतियोगितानवच्छेदकेति तादृशप्रतियोगितावच्छेदक
त्वावच्छिन्नभिन्न इत्यर्थः पूर्वपक्षे प्रथमोक्तमपि प्रथमलक्षणोक्ताव्याप्तिप्रथममनुद्धृत्यैवोभयाभावघटितलक्षणस्य स
वह्नित्वनपातत्रोक्ताम व्याप्तिमेवाहावुद्धरति तथाचेत्यादि तत्तदवच्छेदकभेदेतितत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदेम रामः

र्यः एवं च अनयैव रीत्या घटकु मित्युपादेयत्तयेत्यादि दुर्विनमिति अन्यथा प्रतियोगितावच्छेदकभेदेन प्रतियोगिताया भि
न्नतया घटाद्यभावप्रतियोगिताया अवच्छेदकत्वस्य घटत्वादिति घटत्वस्य द्व्यक्तित्वसमनियतत्वनयात दपेक्षया गुरुत्वेनानवच्छे
दकत्वया गुरोरवच्छेदकत्वं विना दुर्वचत्वतादवस्थ्यापत्तेरिति भावः प्रतियोगितावच्छेदकासमनैयत्येनैव प्रतियोगिताभेदोप
गमेन प्रतियोगितावच्छेदकभेदे पि समनियतनानाधर्मावच्छिन्न प्रतियोगिताया भेदे मानाभावदित्याशयेनाह एक प्रति
योगिताया अपीति एकस्या एव प्रतियोगिताया अपीत्यर्थः गोत्वादिति नाहत्वावच्छेदकस्य विशिष्याव्याप्याहानेनैक
प्रतियोगितावच्छेदकसमनियतनानाधर्मविशिष्टांतत्वद्व्यक्तित्वादिनानाभावे इति विशेषादिति भावः लाघवादिति नाहत्वाप्रति
योगितावि शिष्याव्यापाहानेनतदवच्छेदकत्वेन समनियतनानाधर्माणामनुगमेन मेन रूपेणानेषामेक भेद इति विशेष्यादिति भाव
एतेनामधेयसायुक्तरीत्या गुरोरवच्छेदकत्वं विना दुर्वचत्वतादवस्थ्यमपि निरस्तं। समनियतनानाधर्मस्याधारणस्य घटाद्य
भावप्रतियोगितावच्छेदकत्वस्य घटत्वादिति घटत्व द्व्यक्तित्वासमनियतत्वात् प्रतियोगित्वमित्यादिग्रंथ्यो विशेष

२७

73

दी. रौवलक्षण्येऽपि प्रतीयोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशाभिप्रायकः प्रतियोगित्वस्य प्रथममनिर्देश

३७ स्तु प्रथमलक्षणे प्रतियोगित्वस्य प्राप्यत्वादिति केचिन्मतं तत्क लक्षणे यन्नाह प्रतियोगिताधर्मिकेति साध्यतावच्छेदक

संबंधेनैव वृत्तित्वं यथा चैतन्नयानिरूपितं भवानंदीयकृद्भ्यामभिप्रेतं· पूर्वलक्षणद्वये तत्र पूर्वलक्षणद्वये हेत्वाभावादि

मितयावत्पूर्वलक्षणद्वये प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशप्रयोजनाभाव इति भावः व्याप्तिरिति व्या

प्ति· पूर्वलक्षणद्वये साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यस्य तत्रोपलक्षणे प्रतीयोगित्वे साध्यतावच्छेदकसं

बंधावच्छिन्नत्वस्य व्याप्तिरित्यर्थः तत्र इतितत्तल्लक्षणेऽप्यर्थः स्वपदमिति साध्यतावच्छेदकसंबंधेन संबंधित्वस्य प्रतियोगिवैय

धिकरण्यस्य व्याप्तिः पूर्वमेव यम्यं पश्चितेति पुनरुपादानेऽपि सामान्येयेति भावः प्रतियोगिवैयधिकरण्यघटकप्रतियोगिसं

बंधित्वं मतिरासायाह संबंधित्वमिति· चरमोक्तत्वेऽपि संबंधित्वायेक्षणयावमंगिदं दोषेऽपि· अत्यन्ताहेतेति उभयाभावघटिते

त्यर्थः विशेषणेति साध्यतावच्छेदकसंबंधावच्छिन्नलक्षणेऽपि तत्र· प्रतियोगिवैयधिकरण्ये· पूर्वपक्षेति नचेत्यादिनेत्यर्थः राम०

अवच्छेदकाप्रसिद्धेरिति एतत्कल्पे गगनादेरपि कालिकसंबंधेन वृत्तिमत्त्वादित्याशयः स्वविशिष्टेति संघटनादिति साध्यतावच्छे
दकं पूर्वोक्तरीत्या स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितायामित्यस्य पदहीनिति दिशा गगनाभावेति संयोगेन कालिके
नवेत्यादि प्रतियोगितानवच्छेदकगुणत्वाभावत्वेत्यादिना यावता दैशिकगगनाभावप्रतियोगितायां साध्यतावच्छेदक
विशेषणताविशेषसंबंधावच्छिन्नत्वगुणत्वाभावत्वावच्छिन्नत्वोभयाभावसत्त्वेन तादृशगुणत्वाभावाभावप्रतियोगि
तायां वर्तनादसत्त्वादव्याप्तिरिति भावः एतेन विशेषणतया गगनाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यधिक
रणाप्रसिद्धेरितरसंबंधेन गगनाभावस्य च न साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वमिति दूषणानवका
शः ननु गुणत्वाभावस्य द्रव्यत्वाभावसंबंधिगुणनिष्ठगुणत्वाभावाभावप्रतियोगितावच्छेदकत्वमेवेत्यत आह
गुणत्वाभावाभावत्वेनापीति अभावस्वरूपेति घटाभावस्य तादृशान्यतरत्वावच्छिन्नतया तादृशान्यतरत्वावच्छिन्न
नयानादृशान्यतरत्वावच्छिन्नप्रतियोगिताकाभावाभावरूपत्वादिति भावः तादृशेति प्रतियोगितावच्छेदकेत्यर्थः तेन

टी० उक्तविवक्षणेन नेत्यादिमूलं मन्त्वाद्यवच्छिन्नप्रतियोगिताकाभावस्य योग्यानुपलब्ध्या सुग्रहत्वादिति भावः नावच्छेदकमिति द्रव्यत्वस्या
भावस्य द्रव्यमात्रसमवेतत्वावच्छिन्नाभावसमनैयत्येन द्रव्यमात्रसमवेतत्वस्यैवावच्छेदकत्वादिति भावः संयोगप्रतियो
गिकेति संयोगरूपसाध्यप्रतियोगिकेत्यर्थः यथाकथञ्चिदिति व्याप्तिवारणेनैवेष्टसिद्धिरित्यस्वरसादाह कश्चिदिति अ
वच्छेदकत्वनिरूपणादिति तथा समवायेनोत्पन्नस्यापि तत्त्वप्रवेशसाध्यकादिति भावः अत्र अवच्छेदकत्वनिरूपणे व्याप्तीति संयोगि
द्रव्यत्वादित्यादावित्यादि यद्यपीतिमूलं मन्त्वादिकमिति शेषः संयोगसंबंधेनेति अन्यथा संबंधत्वस्याननुगतत्वेन संबंधसामा
न्येनाप्रयोगित्वेऽकाह्रस्त्वस्यापि तादृशाभावेन प्रतियोगितावच्छेदकत्वानुपपत्तेरित्याशयः संयोगावच्छिन्नापान्नेति प्रतियोगि
वैयधिकरण्यानिवेशो वक्ष्यमाणरीत्या प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशादिति भावः लक्षणान्तरेऽपि
प्रतियोगिवैयधिकरण्योपादानेन दोषाधिक्यप्रथमलक्षणमेव तत्राप्यनुप्रवेशेनानुपपत्त्यानन्दनुवादपूर्वकमितरलक्षणे
नत्राह प्रतिमाह तदवच्छिन्नेत्यादि तदवच्छेद्यत्वस्येति भयाभावस्यैव प्रमेयत्वेनान्वितेः गगनत्वविशिष्टविषयत्वादिविशिष्टसं राम०

बंधिमत्त्वसिद्धावपि तन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकेऽसत्त्वेन घ
टत्वादेरप्यवच्छेदकत्वासंभवो बोद्धव्यः तदवच्छिन्नाभावेतियेन केनचित्संबंधेन तदवच्छिन्नाभाववति स्वस्मिन् ताघ
त्म्येन संबंध इत्यर्थः संबंधसामान्येन तदवच्छिन्नाभावोक्तौ स्वस्मिन् संबंधसामान्येन तदवच्छिन्नाभावस्यासत्त्वेनाप्रसिद्ध्यभा
वापि सकलसंबंधसाधारण्यानुगमसंबंधत्वस्य दुर्वचनतया तत्तन्निवेशासंभवादिति भावः वस्तुनियामकताहास्यस्य
व्यापकताघटकसंबंधासाधनम्युपगमान्नोक्तरीत्या साध्यतावच्छेदकसंबंधावच्छिन्नत्वविवक्षणामित्याशयेनाह वस्तुत
स्त्विति एवमप्यलङ्कारोपि हेतुसमानाधिकरणाभावीयपत्संबंधावच्छिन्नप्रतियोगितावच्छेदकं स्वविशिष्टसंबंधि
निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकमिति द्वितीये हेतुसमानाधिकरणाभावीयतत्संबंधावच्छिन्न
प्रतियोगितासामान्ये स्वविशिष्टसंबंधिनिष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकावच्छेद्यत्वाभाव इति द्वि
तीये योज्यमित्यर्थः ननु शिखिनौ प्रत्यक्षलक्षणेतिव्याप्तेः रुक्तेनयानत्रैव तन्निराकरणप्रदर्शनमुचितमिति यत्रेत्यादि

नाद्वितीयेतत्प्रदर्शनमनुचितमत आह जातिपानिति । अतः उक्तातिव्याप्तेः आलेख्येतिन घावप्रपमस्त्रुषतयाद्विती
यस्यानिर्दुष्टत्वप्रतिपादनायतत्रतत्प्रदर्शनं नानुचितमिति भावः । अतः उक्तस्थलेऽतिव्याप्तेः लाघवमिति तद्न्यावेसा
देर्भेदघटितत्तया साध्यवदन्यावृत्तत्वघटितत्वाद्विति भावः । दीधितौ द्वितीयलक्षणं परित्यज्य तृतीयलक्षणपरिष्कारे बी
जमाह यद्वर्मेत्यादिना । अव्याप्तिः स्वरूपसंबंधेन गगनादेर्वृत्तित्वपक्षेऽप्यव्याप्तिः तादृशेति गगनादेर्वृत्तित्वपक्षे
साध्यतावच्छेदककालिकसंबंधेन गगनत्वादिविशिष्टसंबंधिनो प्रसिद्धा गगनत्वादेस्तथात्वासंभवात् नित्यपक्षे तादृश
संबंधिनः प्रसिद्धावपि तन्निष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वस्य हेतुसमानाधिकरणाभावीयतादृशप्रति
योगितावच्छेदकेऽसंभवादिति भावः । प्रागुक्तयुक्त्या महाकालीयविशेषणतासाध्यकाव्याप्तिरूपयुक्त्या । ननु उपदर्शित
रीत्या कालो घटवान् कालपरिमाणादित्यादौ तद्वदवच्छिन्नस्यादिम यमप्रकारावलंबनेनाप्यत्र मध्यमप्रकारे बाधकाभाव
इत्यत आह एवमिति । ननु विशेषणताविशेषावच्छिन्नत्वनिवेशेऽपि हेतुमन्निष्ठाभावप्रतियोगितासामान्येनादृश्यान राम०

वच्छेदकावच्छेद्यत्वविशेषणतानाविशेषावच्छिन्नत्वोभयाभावनिवेशाएवोचितः सिद्धांतलक्षणे प्रतियोगिताधर्मिको
भयाभावनिवेशावश्यकत्वमाह कालत्वेनेत्याह इति· विशेषणतानाविशेषावच्छिन्नसाधनसमानाधिकरणत्वं नाभा
वीया नाव्याप्तिः उभयाभावानिवेशे पिताव्याप्तिः अयमाशयः सिद्धांतलक्षणे साध्यतावच्छेदकसंबंधावच्छिन्नत्व
स्यानुयोगितावच्छेदककोटौ निवेशे· कालो घटवान्महत्त्वादित्यादौ तादृश्याप्रतियोगित्वाप्रसिद्ध्याः व्याप्तिरित्यगत्या उभयाभा
वो निवेशितः इह तु कालत्वावच्छिन्नप्रकारकप्रमाविशेष्यत्वाभावप्रतियोगितायाएव तादृश्याः प्रसिद्ध्याः व्याप्त्यभावेना
नुयोगितावच्छेदककोटौ विशेषणतानाविशेषावच्छिन्नत्वनिवेशे नैवसामंजस्ये उभयाभावनिवेशप्रयोजनाभाव इति प्र
तियोगितेत्निविशेषणतानाविशेषावच्छिन्नेत्यादि· एवमग्रेपि· प्रतियोगित्वपर्याप्तिनिरूढं वस्तु महत्त्वप्रकारकप्रमाविष
यत्वाभावप्रतियोगितायामहानसवह्नित्वविशिष्टतादृशप्रमाविषयत्वाभावप्रतियोगितायाश्चैकावगतिव्याप्तिरिति
तदुपपादनायोक्तं ननु महानसवह्नित्वविशिष्टतादृशप्रमाविषयत्वावच्छिन्नत्वंविशिष्टाभावप्रतियोगितायामेवतनु

टी०

शुद्धधूमवत्वप्रकारकप्रमाविषयत्वाभावप्रतियोगितायामिति नातिव्याप्तिरत आह महानसत्ववह्नित्वविशिष्टत्वादेर्वेति
तदभावासंभवादितिमयाच तच्छुद्धयागभिन्नायां वह्निसमानाधिकरणधूमत्वप्रकारकप्रमाविषयत्वाभावप्रतियोगिता
यां विशिष्टत्वादेरप्रमाविषयत्वतत्स्वरूपतादृशप्रतियोगितावच्छेदकावच्छिन्नत्वसत्वादुक्तरीत्यातिव्याप्तिरिति तद्वारणाय तत्र
द्धयागभिन्नत्वविशेषणमिति भावः एवं प्रतियोगितायाः प्रतियोगिरूपत्वे प्रतियोगितायामिति वह्नित्वविशिष्टसंबंधिनिष्ठेति शेषः
तदभावासंभवादिति शुद्धप्रमाविषयत्वानतिरिक्तविशिष्टप्रमाविषयत्वस्वरूपविशिष्टाभावप्रतियोगितायां शुद्धतादृशप्रमा
विषयत्वमावच्छिन्नशुद्धतादृशप्रमाविषयत्वाभावप्रतियोगितानतिरिक्तादिति भावः विशिष्टविशिष्टस्य प्रतियोगित्वेन तद
वच्छेदकत्वाभावादिति न यावद्विशिष्टाभावप्रतियोगितायां विशेष्यविशेषणोभयरूपत्वोपगमेन शुद्धविशेषणतदवच्छेद
कत्वाभावादेर्वविशिष्टेन स्वच्छेदकत्वाभाव इति भावः विशेषणावैशिष्ट्यावच्छेदेनावच्छेदकत्वाभावोपगमे नातिव्याप्तिरित्याशयवार
णाधूमवत्वप्रकारकप्रमाविषयत्वस्वरूपायां शुद्धधूमवत्वप्रकारकप्रमाविषयत्वावच्छिन्नप्रतियोगितायामपि किंचिद्विशे रामः

धरावैयधिकरण्यावच्छेदेन तदवच्छेदकत्वाभावसंभवादित्यस्वरसादाह लघुरिति। तेन लघुरूपेणासाध्यतायामनवच्छेदकत्वघटितल
क्षणं विहाय प्रतियोगिताधर्मिकोभयाभावघटितलक्षणाकरणेन प्रामाणिकत्वेन चासद्धेतौ व्याप्तिभ्रमादनुमितिसूद्वयेन नत
त्रैनादृश्यातानस्य हेतुतयाऽनप्रामाणिकत्वमितिभावः वास्तवस्याप्यप्रसिद्धिप्रायेणाप्रामाणिकत्वस्याकिंचित्करत्वात्। अव्याप्यवृत्तिसाध्य
कइतियत्र साध्यतावच्छेदकं प्रतियोगितावच्छेदकं तत्रापीति शेषः। उचितमिति तथा च तत्रैवेत्यसंगतमिति भावः। ननु गुरो
रनवच्छेदकत्वमतेऽपि न गौरवप्रतिसंधानदशायां नकंबुग्रीवादिमान्नास्तीति प्रतीत्यनुपपत्तिः तन्मते गौरवात्प्रतियोगिताव
च्छेदकत्वयोर्विरहात्तेन तद्विरोधितानस्य तद्बुद्धिप्रतिबंधकत्वमुद्भ्या गौरवज्ञानस्य प्रतियोगितावच्छेदकत्वबुद्धौ प्रतिबंधकत्वं
वाच्यं तत्र तद्विरोधितानस्य तत्प्रकारकबुद्धावेव प्रतिबंधकत्वस्यादृष्टतया कंबुग्रीवादिमान्नास्तीत्यादिप्रतीतौ नैव प्रतियोगि
तावच्छेदकत्वस्य संसर्गतया गौरवज्ञानाप्रतिबध्यत्वादत आह गौरवे सतीति। गौरवसमानाधिकरणाद्यर्थः सामानाधि
करण्यं च नियतं व्याप्यं तेन गौरवेऽवच्छेदकत्वविरोधितात्पर्यः पाद्यावच्छेदकत्वविरहः शक्तताद्यवच्छेदकत्वविरहः सं

टी० सर्गेनयापीतिश्रन्यथागवयोगवयपदवाच्यइत्युपमिते: संसर्गेनयागवयपदवाच्यतावच्छेदकत्वविषयकत्वेन गौरवज्ञाना
प्रतिबध्यतया गोसादृश्यवैशिष्ट्यगवयपदवाच्यत्वावेदृश्या गौरवज्ञानदृश्यायामपि तत्र संसर्गेनयागवयपदवाच्यतावच्छेदकत्वविषयिताया
गोसदृशो गवयपदवाच्य इत्याद्याकारिकायाउपमितेरापत्तिरिति भावः गौरवज्ञानं विरोधीनित्यायविरोधिभेदेन प्रतिबंधक
तायाविभिन्नतयान्यत्रक्लृप्तविरोधिताज्ञानस्यतत्प्रकारकबुद्धेर्विरोधित्वेपिप्रकृते फलबलात्तादृशावच्छेदकत्वविषयकत्वा
नएव गौरवज्ञानस्य प्रतिबंधकत्वं कल्प्यत इति भावः अथैवमपि गौरवज्ञानदशायां प्रमेयत्वादिनातस्यानोदयेन तत्र व्यभि
चारः अवच्छेदकत्वत्वावच्छिन्नविषयतायाः प्रतिबध्यतावच्छेदकत्वेवसंबंधभाने संबंधतावच्छेदकभानानंगीकारेऽवच्छेदक
त्वसंसर्गकज्ञानासंग्रह इति चेन्न तादृशावच्छेदकत्वाख्यातिरिक्तप्रकारकतादृशावच्छेदकत्वविषयकज्ञानस्यैव प्रतिबध्यता
वच्छेदकत्वोपगमात् अवच्छेदकत्वांशेऽपीति संसर्गतया भानयोग्यतावच्छेदकत्वविषयकेऽसर्वः नैतादृशोतिप्रयाघयदावनेक
गुरुत्वसत्त्वे गौरवप्रमितिज्ञानसत्त्वेऽपिवह्नुः संनिकर्षबलादुपस्थितेनेकगुणसाहाय्याकारोदयेन गौरवज्ञानस्यानतादृशज्ञानविरो राम०

धित्वं न व्याप्यवृत्तेपि कंबुग्रीवादिमत्वादि घटत्वाद्यपेक्षया गुर्विति गौरवज्ञानसत्वेपि कंबुग्रीवादिमान्नास्तीत्यादिप्रतीतियोगिता
वच्छेदकत्वविषयकप्रतीतेरुदयेन गौरवज्ञानस्यैतादृशज्ञानविरोधित्वं शाब्दतावच्छेदकत्वादिविषयकज्ञानं प्रत्येव गौरवज्ञा
नस्य विरोधित्वोपगमादिति भावः। अभिप्राये रोजित न्यायत्वापकाभावेप्यभावस्यावश्यकतया गौरवज्ञानस्य प्रतियोगि
तावच्छेदकत्वज्ञानविरोधित्वाभावे गौरवेप्रतियोगितावच्छेदकत्वविरोधित्वाभावसिद्धा गुरुधर्मस्यावच्छेदकत्वे बाधकाभा
वेन गुरुधर्मस्यावच्छेदकत्वसिद्धिर्निष्प्रत्यूहैवेत्याखंडलार्थः। न प्रमाणामिति नादृशशाब्दजन्यशाब्दबोधस्य परस्परोपश्ले
षावगाहिविशेष्यविशेषणभावापन्नकंबुग्रीवादिमत्वावच्छिन्नत्वप्रतियोगित्वविषयकत्वावच्छिन्नत्वेपि कंबुग्रीवादि
मत्वसंबंधस्य भानेन भासमानवैशिष्ट्यप्रतियोगित्वरूपप्रकारत्वस्य कंबुग्रीवादिमत्वे सत्वेन भ्रमत्वादिति भावः। नव्यासाति
गुरोर्नवच्छेदकत्वमुपेत्योक्तरीत्याप्रकृतचर्वतिनादृशशाब्दस्याप्रमाणात्वोपपादनेनस्यादिति न्यायवगुरोरवच्छेदकत्वमु
पेत्यकंबुग्रीवादिमत्वाद्यवच्छिन्नप्रतियोगिताकाभाववत्तानादृशशाब्दजन्यशाब्दबोधविषयो वाच्यः एकघटवतितादृशाभा

टी०

धासत्वान्तसपादृः प्रमाणांघटसामान्यप्रमेयवनाहश्याभावसत्वात्मग्राहृः प्रमाणतामिति भावः इत्यत्वादित्यत्रेति अत्रासिसाध्यपि
षयाद्व्यत्वस्यानुमानमनेनेन दोषः गुणादीति आदिना गुणकर्मान्यसत्वस्य द्रव्यत्वस्य च परिग्रहः अहेतुत्वं नियामकसंबंधेनाप
व्याप्यत्वापत्तिमाहैवमिति वह्निमान्धूमादित्यादौ स्वावच्छिन्नाभाववत्संवद्धघटत्वादिमिपधूमादिसमानाधिकरणाभावप्र
तियोगितावच्छेदकत्वकन्वकत्वस्य घटादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य नतद्वच्छिन्नाभावस्य वह्नि
व्याद्यवसत्वेनाव्याप्यतेरा हसामान्यक इति नगुणेरिति गुणेत्वच्छेदकत्वात्स्वाधिकारेप्युपदादिति व्याप्यत्वापत्यभावादिति भावः
इत्यादेरीति आदिना हेतुसमानाधिकरणाभावे साध्यतावच्छेदकसंबंधसामान्येऽसादिशिसोभयाभावघटितप्रतियोगिवैयधि
करणापत्तिवेशेन साध्यतावच्छेदकसंबंधावच्छिन्नकीनांविशिष्याप्तानेनसामान्यतानमशक्यमितिपरस्यपरिग्रहः धूमत्वावच्छेदेन
निधूमप्रकीनांविशिष्याप्तानेपीत्यादिः गुणसमानाधिकरणोतिनिरूपकावच्छेदकत्वस्य प्रकीनांविशिष्याप्तामेपीत्यादिः इहशब्द
नेतिनिरूपकावच्छेदकत्वत्वाद्यवच्छिन्नेनिरूपकासंवद्धत्वादित्यानेत्यर्थः निरूपकपर्याप्तेनेतिहेतुसमानाधिकरणाभावप्रतियो राम०

गितानवच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यपरस्येत्यर्थः तथा चेदं शाखाभिन्नत्वानसामान्याभाववद्‌शाखायामिदं शाखाभेदवृत्ति
यत्वरूपावच्छिन्नवृत्तितयावाच्यत्वादिति दिनिदिधिनेतात्पर्यमिति भावः पूर्वोक्ते धूमत्वावच्छेदेनेमार्हिसाध्य इत्यस्य स्वरसात्‌ एतदादृशादेवास्वर
सात्‌ हेतुसमानाधिकरणेत्यादिग्रन्थमते साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमेवाव्य
भिचार इत्याशयः अत्र तथापीत्याद्युक्तरीत्या नानादशाखाभिन्नत्वानसामान्याभावद्‌शायां नानादशाखाभेदवृत्तिपत्वसत्त्वेन यागेन
वृत्तित्वाभिमतस्वरसादित्यसंगतमिम स्वरसाद्दित्याचक्षुरिति॥ ॥इति महादेवविरचितायां सर्वोपकारिण्यां भवानंदीव्या
ख्यायामवच्छेदकत्वनिरुक्तिव्याख्या॥ ॥प्रतियोगिवैयधिकरण्यस्य प्रतियोगितावच्छेदकसामान्यघटितत्वेन वैवमिति यद्वृ
मारणीसानाद्याप्तिरत आह न यावदित्यादिना यद्यपि यादिभाविकावच्छेदकत्वघटितलक्षणेनाव्याप्तिः तत्र हन्त्राभाव प्रतियो
गितावच्छेदकवन्निष्ठत्वस्य यत्किंचिद्वच्छेदकतत्वद्वित्वावच्छिन्नाधिकरणावन्निष्ठत्वविशिष्टसंबंधेन विपत्तद्व्याभावप्रती
योगितावच्छेदकत्वात्तथापि गुरुधर्मस्य प्रतियोगितावच्छेदकत्वांगीकारे रीतिदं बध्यं यत्किंचित्प्रतियोगितावच्छेदकघटितं

टी.

प्रतियोगिवैयधिकरण्यघटितलक्षणे व्याप्तेराशंकितत्वेन नचैवमित्याद्यसंगतमतोभावमाह तथाचेति धर्मत्वमिति अप्र
याः व्याप्यवृत्तिसाध्यकव्याप्तिनास्वस्थेन प्रतियोगिवैयधिकरण्यस्याभावत्वेनकृतापत्तेरित्याशयः ननुघटाद्यभावस्यापि
पर्वतादिवृत्तित्वादिरूपतत्प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याभावेन प्रतियोगिवैयधिकरण्याभावाप्रसिद्ध्या व्याप्त्य
संभवइतितयासतीत्यादिकमसंगतमत आह एवंसतीतिनत्वकल्पं अनवच्छेदकत्वघटितकल्पं अभावांतरमादायेत्यादि
पतिनचेतिजन्यमात्रस्यकालोपाधित्वाभ्युपगमेप्यात एवमित्तिनचपक्षेत्यादिनाधूमवान्वह्नेरित्यादावतिव्याप्त्यभिधानमसंग
तंसाध्याभावधर्मस्याभावप्रतियोगितानवच्छेदकत्वेभूमत्वाद्यवच्छेद्यसाध्याप्रसिद्धाप्रतियोगिताधर्मिकोभयाभावघटितलक्षणे
संभवात् नचानवच्छेदकत्वघटितलक्षणाभिप्रायकमिदमितिवाच्यं पूर्वोत्तरपक्षयोरभिन्नलक्षणाभिप्रायकत्वेसंदर्भविरो
धादत आह एतन्मतेपिजे अतिव्याप्तिभीत्यापत्तिः अंगीकृत्येति अतिव्याप्तेरयेनितत्रेतिशेषः वह्नित्वावच्छेद्यत्वाप्रसिद्धेरिति अ
व्याप्तिः एतन्मतेमानाभावादितिशेषः प्रतियोगिवैयधिकरण्याः उभयाभावघटितप्रतियोगिवैयधिकरण्याश्रयः एवमग्रेपि तथाच गम:

नाद्दशविशिष्टाभावमादायैव वह्निमान् धूमादित्यत्रलक्षणतासमन्वय इति भावः ननु सर्वत्राभावाभावस्य प्रतीयोगिरूपतया तद्रूपात्मकविशिष्टाभावस्य हेतुसामानाधिकरण्याभावेन कथं लक्षणाघटकत्वमत आह अभावेति अभ्युपगमादिति अन्यथा तस्य केवलान्वयित्वानुपपत्तेरिति भावः एतन्मते तु सर्वोपि प्रतियोग्यनवच्छेदकत्वघटितलक्षणाभिप्रायक एव प्रतियोगिवैयधिकरण्याभावाप्रसिद्धभावेनाव्याप्त्यभावस्यातिव्याप्त्यसंभवात् एवमुत्तरत्राप्यनुवादिमते विशिष्टं विशेषणतयावच्छेदकं पवद्दृत्तित्वेत्यनेनान्वितं नन्वभावस्य प्रतियोगितानवच्छेदकावच्छिन्नत्वविरोधित्वनियमेनोपदर्शितविशिष्टाभावस्य केवलान्वयितया न दृष्टवद्वृत्तित्वावच्छिन्नाभावत्वासंभवेन न तद्घात्मकत्वमत आह अन्येति नोक्तनइति लाघवादिति शेषः वाघट त्वेनेति तादृशानियमस्य केवलान्वय्यभावविषयकत्वाभावादिति भावः तस्यापि आकाशस्यापि तदभावोपि आकाशाभावो पितयान प्रतियोगिवैयधिकरणाः तस्य दृशाद्दृत्तित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणत्वादिति भावः यद्धेपमा दिन्नदृत्तविच्छिन्नाभावबुद्धिनियामकाभावस्यैव तद्दृत्तविच्छिन्नप्रतियोगिताकत्वादिति भावः तस्यनेति अनौद्रिपथमक्षयाहको

टी॰

भावस्यद्रव्यत्ववृत्तित्वावच्छिन्नाभाववुद्धिनियामकत्वाभावादितिभावः तस्यैव धूमद्वयत्वकाभावस्यैव प्रतियोगिताधिकरणता
त्वेनतत्संभवे अतिव्याप्त्यसंभवादितिधूमत्वस्यसामान्यधर्मस्यविशेषाभावात्मकधूमद्वयत्वकाभावप्रतियोगितावच्छेद
कत्वादितीभावः यथाश्रुतेसिद्धसिद्ध्याद्याघातादाहानुगतरूपस्येति अत्रेत्यादि विधिकोटिः परमते निषेधकोटिः सि
द्धान्तेवाययेति अत्रापिपूर्ववदेवकोटिकल्पना अत्रसामान्याधिकरण्यपक्षे भावान्तरविषयकसमूहालंबनमादाय
विधौसिद्धसाधनं अवच्छेदकावच्छेदेनपक्षत्वेतमादायनिषेधेबाध इतिविप्रतीपत्त्यंतरमाह अत्यंताभावेत्यादि अत्रविधिको
टिः सिद्धान्तेनिषेधकोटिः परमते रूपवत्त्वमुपलक्षणं तथाचसिद्धान्तिमते ध्वंसाभाववृत्तिरूपत्वावच्छिन्नप्रतीयोगिताकत्वस्य
रूपकालावच्छेदेनरूपवद्वृत्तित्वे उत्पत्तिकालावच्छेदेनरूपवद्वृत्तौरूपसामान्याभावेसत्त्वेनतथाविधिसिद्धिः एवंपरमतेतुनाश
प्रागभाववृत्तित्वंनाशरूपत्वावच्छिन्नप्रतियोगिताकत्वेनास्तीतिनिषेधसिद्धिः अत्रेत्यादि तृतीयादिक्षणोत्पन्नवायु
संयोगप्रागभावस्यरूपकालेपिसत्त्वेनतस्यरूपत्वावच्छिन्नप्रतियोगिताकत्वेनहानौतद्वद्गगनाभावप्रतीत्यापत्तिरतोदृष्टि राम०

यत्तु रीतिरेव घटत्वादिसंयोगप्रागभावस्य तत्त्वे घटत्वादिसंयोगेनष्टोत्पत्तिरतो वायुसंयोगे तिरूपप्रागभावस्य तत्त्वेवायोग
कत्वरूपसामान्याभावप्रतीत्यनुपपत्तिरतस्तत्प्रतियोगिसत्त्वादिति तत्त्वे वाधकाभावादिति भावः यद्वा सिद्धसाधनशङ्कं
र्थांतरपरः तथा च नादृशप्रागभावस्य तत्त्वेनार्थांतरम् अत एव रूपप्रागभावत्यागः एकदेशिभिस्तस्य रूपसामान्याभावा
त्मकत्वोपगमादिति भावः हृत्वंतमित्यन्तस्यं ताभावमत्रैः त्यर्थः वाधः प्रसिद्धवाधः विशेषणापीति अत्र भेदप्रतियोगि
कोयैरूपवत्वस्य विशेषणत्वेनुनादृशरूपसामान्याभावप्रसिद्धाद्रूपकालावच्छेदेनेतिनरेयं सिद्धसाधने अर्थांतरं च
त्वंतमितिरूपवद्वृत्तीत्यर्थः भिन्नत्वविशेष्यतयोपात्तमिति शेषः अर्थांतरं निरुक्तेरानीरूपकालेत्यादि समनेयत्वसंपाद
नायरूपकालावच्छेदेनेतिन्नमित्त्वविशेषणोरूपवत्वस्याविशेषणत्वेनुनन्दरेयं दृष्टसिद्धिरेवेति तत्पादप्रतियोगित्वा
न्नार्थांतरमितिभावः उत्पत्तिकालावच्छेदेन रूपस्य सामान्याभावानंगीकर्तृप्राचीनमतेऽकविप्रतिपत्तेरसंभवादाह दृगीतिरि
गर्थकरूपत्वावच्छिन्नप्रतियोगिताकसंबन्धसम्बन्धिन्नेत्याद्यिकापि विप्रतिपत्तिसंभवतीति नैयायिकमतेऽप्ययानुपप

नेः प्रमाणात्वाभावादाह संशयेत्यादि ननु रूपविशेषस्य वायुवृत्तित्वेन तदभावकोटिकसंशयस्यापि वायुवृत्तित्वसामान्याभाव
साधकत्वात्पृथक्त्वोपयोगस्त्वेव मतः आह रूपाभावेति संशयस्यैवेति एवकारेणोक्तसंशयव्यवच्छेदः उक्तरीत्याप्रसिद्धरूपाभाव
इत्यादिमूलोक्तरीत्या शब्दासंदर्भमिवेति वायुविशेष्यकसंशयस्य समुत्पन्नत्वायुपदर्शितत्वाकेनानुच्छेदत्वादिति भावः तस्मिन्
तदभावाभ्यन्तरानिश्चयस्येति प्रमनिराकरणमाह तत्तदभावयोरिति सानांतरेति मत्तत्वाश्रितत्वतदभावाभ्यन्तरानिर्णयात्मक
त्वामित्यर्थः अत्रव्याख्यात्रामध्यमततीयमतयोरेवास्वरसप्रदर्शनेन मध्यममते शिद्धितिकारसंमतमितिध्येयं इतिवाक्यस्य
तिनभ्याद्याभावप्रतियोगितावत्त्वस्योपलक्षणत्वविरोधरात्व्याभ्यां विकल्पचतुष्टयं बोध्यमिति भावः नान्वितिमसिद्धरू
पइति शेषः प्रामाणिकमितितादृशाभावनिश्चयेपितादृशसंभावनायां संशयोत्पादानुभवादिति भावः भिन्निमघटद्वयइतिप
कदाचद्धेतुः संयुक्तघटद्वयइत्यर्थः तदाविशेषाभावकूटस्यैवचद्धेतुः संनिकृष्टत्वादिति भावः न संभवतीति भावाभावकरंबितत्व
दोषापत्तेरितिशेषः तमेवविहरणानिभावभावेति नादृशेतिसामान्यावच्छिन्नेत्यर्थः संभवादितिस्त्रम्यव्याधिविशेषाभावप्रतीतमनु राम॰

पर्यवसन्नेरितिभावः ननु सामान्याद्यवच्छिन्नप्रतियोगिताकत्वे नावच्छेदकतासम्भिन्तिमूलभासन्त्वादिति शेषः तत्रापि विशेषान्तर
वस्यापि मत्याच तादृशप्रतियोगितायाः अतिरिक्तत्वेन च इत्थं च तादृशप्रतियोगितायाः अतिरिक्तत्वाभिधानं च न प्रतियो
गिताकाभावस्य सामान्यावच्छिन्नप्रतियोगिताकाभावस्य असत्त्वसंभवादिति न यावत् तादृशप्रतियोगितात्वेन तादृशप्र
तियोगिताकत्वविशिष्टासत्त्वसंभवात्तादृशप्रतियोगितायाः अतिरिक्तत्वमनावश्यकमिति भावः प्रतियोगिताभेदस्याभाव
भेदनियामकत्वं कुतो नाशंकितमित्याशंक्याह प्रतियोगितायाः इति भेदः प्रतियोगितावच्छेदकभेदः वैलक्षण्यं पवि लक्ष
णावच्छेदकान्यं एवं मेक घटप्रतियोगिकाभावस्यैवाभेदापत्तेः नन्वत्रैवावच्छेदकभेदोपपादनमुचितमित्याशयेनाह तद्घ
टेति कम्प्यत इतियद्भावे प्रतियोग्यधिकरणायत्वावृत्तित्वं नियमतः प्रतीयते सकलसंबंधविधयात्तद्भावस्य प्रति
योगितावच्छेदक इतिप्रिपमभिप्रेत्येदं ननु तत्स्वरूपेति इत्थं च वस्तुगतिमनुरुध्य तेनातिरिक्तभेदस्याजन्यत्वेऽपि नासंगतिः प्र
तियोगितावच्छेदकयोर्भेदस्य तदवच्छिन्नाभावयोर्भेदस्य च प्रमेयत्वादौ सामानाधिकरण्यसंभवादाहावच्छेदकस्वरूपेति

दी०

४६

46

विलक्षणतावच्छेदकताया एवावच्छेदकभेदप्रयोजकत्वादिति भावः अभावस्वरूपभेदस्येति अभावप्रतियोगिकाभावाधि
करणकाभावस्यानतिरिक्तत्वादिति भावः रूपरसादीति न रूपरसादिमत्यर्थः षष्ठीसमर्थ्याद्वृत्तिरित्यादावयेनाह भावस्येवे
ति सामान्यतस्तद्देशाद्वृत्तित्वतद्भावयोरवच्छेदकभेदे नैकत्र सत्वाविरुद्धत्वमत आह तद्दवच्छिन्नेति समनियतानामि
त्यनेन तत्तत्संख्यापरिमाणादीनामेक एवात्यन्ताभाव इत्यभिमतं तत्र देशतस्समनैयत्ये समनियतकालसमनियतदे
शानां कालतस्समनैयत्ये समनियतदेशानां समनियतकालानामभावैक्यापत्तिरत आह समनियतदेशानिद्देशतः कालत
श्च समव्याप्यानामित्यर्थः एवमप्यमूर्त्ताम्रावच्छिन्नशरीरतत्संयोगादीनामभावैक्यापत्तिरेवेत्यत आह समनियतावच्छे
दकानामिति विभिन्नावच्छेदककभिन्नानामित्यर्थः तेन व्याप्यवृत्तिसमनियतानामभावैक्यापत्तिरूपत्वावच्छिन्नाभावव
द्धित्यादिः यथा रूपत्वावच्छिन्नाभावोऽभावकूटात्मकस्तथा तत्परिमाणत्वावच्छिन्नाभावोपीत्यर्थः एवमिति तत्तद्व्याह
क्तित्वविशिष्टतत्संख्याभावकूटस्तादृशविशिष्टतत्परिमाणाभावकूटैक्यादेव तत्संख्याभावतत्परिमाणाभावयोरैक्यं पूर्व राम०

मुक्तमित्याशयः मूलाग्रेत्यादिग्रन्थस्य समानाधिकरणधर्मा पदेन समानावच्छेदकत्वपर्यन्तविवक्षणादिदमसंगतमिति न
द सत्तत्तावत्पर्यन्तविवक्षणे प्रयोजनाभावात् समानाधिकरणधर्मसंबंधेन समानाधिकरणधर्मावच्छिन्नाभावस्यैव समाना
धिकरणसंबंधावच्छिन्नाभावत्वादिति भावः यद्यपि समानाधिकरणसंबंधावच्छिन्नाभावत्वमपि समानाधिकरणधर्मावच्छि
न्नाभावस्यैव तद्व्यापितस्य संयोगेन रूपाभावाद्यात्मकस्य तद्व्यतिरेकित्वमतः समानाधिकरणधर्मसंबंधावच्छिन्नाभावत्वमेवे
त्यानुपपादकत्वमतिरेकित्वप्रयोजकतयोक्तं. एवकानुपपत्तिरिति नव्याद्व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छे
दकसंबंधानंगीकारे तस्य समानाधिकरणसंबंधावच्छिन्नप्रतियोगिताकत्वं पुरः स्फुरत्येव मुक्तमसंगतं स्यात्तदंगीकारे तु सं
योगेन घटत्वेन पटाभावस्य समवायेन घटत्वेन पटाभावस्यैवैक्यात् असंगतमिति भावः पूर्वोक्तदोषात्· भावाभावकरं विनत्व
रूपदोषात्· तदितितत्र स्वभावस्वरूपतत्तत्प्रतियोगिकत्वमन्यर्थः एवमग्रेपि अत एवेत्यादिना उक्तस्यातिरिक्तत्वमनङ्गीकृत्या
दिनाग्रेविवरणासंभवाद्धात् सर्वमिति शाब्दत्वप्यंतरत्वस्य संभवद्युक्तिकमन्यदप्यभिप्रेतमित्यर्थः युगपदिंद्रियसंनिकर्षमु

पपादयति मिलितेति नास्त्येवेति अनुभवानुरोधेन साधिकरणाभावविषयतायाः एवं संनिकर्षजन्यतावच्छेदकत्वोपगमा
दिति भावः अत इति ननादृशधीरित्यनेनान्वयः विशेषणतायाः एवेति एवकारेण रूपकाधिकरणावच्छिन्नत्वांशभविष्यव
च्छेदः हेतुत्वादिति तादृशधीरित्यनेनान्वियं नत्ववच्छेदेन विशेषणतायाः हेतुत्वस्य तादृशधीप्रसंगासंभवादिति भावः ता
दृशधीरिति निरधिकरणाभावलौकिकधीरित्यर्थः घटोद्भूयाभाववान् इत्यादि साधिकरणाभावप्रतीतेरपि घटरूपत्वाद्यव
च्छिन्नप्रतियोगिताकत्वविशिष्टाधिकरणत्वाभावादेवासंभवादित्याशयः संबंधविधयेति संख्यात्वेन सहितपदोक्तसंसर्गविध
नैकार्थसमवायस्य च द्वित्वादिघटितत्वेनयादित्वादेः संबंधविधया भानादिति भावः व्यासज्यवृत्तिनेति गुणत्वादिनापि द्वित्वादिप्र
कारकप्रत्यक्षे व्यभिचारवारणायाद्यं प्रकारकांतं संबंधविधया द्वित्वप्रत्यक्षेऽपि चत्वाद्यवच्छिन्नविशेष्यके घतद्वारणाय द्वितीयं
प्रकारकांतं प्रत्यक्षविशेषणं तथा धीः घटे रूपं नास्तीति धीः संबंधविधया न स्नान मितिद्वित्वत्वाद्यवच्छिन्नविशेष्यकभान
स्याप्युपलक्षकमिदं द्रष्टव्यं व्यासज्यवृत्तितावच्छेदकत्वप्रकारकत्वमिति व्यासज्यवृत्तितावच्छेदकत्वसहितं प्रकारकत्वमित्यर्थः रामं॰

मध्यमपदलोपिसमासात् मकारकत्वं चद्वयमपितथाचव्यासज्यवृत्तिधर्मलौकिकप्रत्यक्षत्वमात्रंकार्यतावच्छेदकमिति
भावः अन्यथासिद्धेरितियत्किंचिदाश्रयज्ञानेपियावदाश्रयसंनिकर्षसत्वेव्यासज्यवृत्तिप्रत्यक्षस्यैवत्वादितिभावः उ
द्भवयथाश्रुताभिप्रायेणाश्रयेयावदाश्रयलौकिकप्रत्यक्षहेतुत्वस्यवक्तुमशक्यत्वादितिध्येयं प्रत्यक्षाभिप्रायेणाप्रत्य
क्षस्यहेतुत्वाभिप्रायेणा सामान्यतस्तद्विशेष्यकज्ञानस्यहेतुत्वेमानाभावइत्यस्वरसादाहकश्चिदिति तल्लौकिकप्रत्यक्षस्ये
वहेतुतायांपर्वतास्यपिपर्वतेनियतधातिरेकत्वाभावय्याचेष्टनतलौकिकेति मेदत्वानव्यतिरेकत्वाभावयावद्येनदेहत्वाने
नि धर्मान्तरहादितिघटकपालाद्यारंभेद्रव्यमेतज्जनकदोषस्यमेद्रव्यग्रहप्रतिबंधकतयातदभावेनद्विद्याद्विप्रत्यक्षानुरूपादि
भावः द्विवध्वमेतिअनुभयमानारोपाभिप्रायेणोहंअन्यस्यलौकिकत्वासंभवादितिध्येयं तत्रद्रूपाभावत्वादिनातं
तद्रूपत्वावच्छिन्नाभावत्वादिना व्यभिचारवारणायजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशोगौरवाराहतत्तद्व्यक्तित्वेति
हिगयस्त्विति केचित्तु सर्वत्रकार्यत्वमित्तोकारणतावच्छेदकोपलक्षितकारणसत्वेवनियामकाननुविधाविषसत्तागोत्वादिति

धी.

परामर्षेस्वयंतत्त्वेनरूपेणचसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्यविशेषाभावेऽभ्युपगमेतुविशिष्टासिकरणतायावि
लक्षणत्वेपिप्रतियोगिकविशेषाभावात्मकत्वेऽतिप्रसंगोदुर्वारइतिदिगर्थइत्याहुः व्यासज्यवृत्तित्वं·पर्याप्तिविशेषस्वरूप
त्वमत्रेपिलाघवमितिलाघवमित्युक्तमित्यर्थः ननुसिद्धान्तिमतेनव्याप्त्यादिनाभासोक्तोभयकल्पनागौरवसत्त्वेनकथं
विनिगमनाभावइत्यतआहलघ्वेति अनंतप्रतियोगितानां·विशेषाभावप्रतियोगितानां·तत्रैववृत्ति अनन्यासक्तस्यैवधर्मि
त्वात्तत्राप्यस्यैवासमवहितक्लृप्तत्वादितिभावः अयं सामान्यावच्छिन्नत्वमतिरिक्ताभावस्यानंताधिकरणवृत्तित्वंवेतित्र
यं·द्वयं अतिरिक्तप्रतियोगितासामान्यावच्छिन्नत्वंवेतिद्वयं तृतीयस्यक्लृप्तत्वामाहअनंतेति प्रतिवंदेरनुत्तरत्वाद्गु
वक्तमहति॥ ॥इतिमहादेवविरचितायांसदीपिकायांसामान्याभावग्रन्थः॥ ॥तत्परिहारायएकव्यक्तिसाध्यकाने
कव्यक्तिहेतुकपरिहाराय·विशेषणद्वयमिति नानाव्यक्तित्वेसाध्येएकव्यक्तित्वंचहेतावित्यर्थः अतएवात्रविशिष्टा
भावादिकमादायासंभवसंभवेनाव्याप्तिरित्यसंगतमित्यपिनिरस्तमितिध्येयं दीधितौदुर्व्याख्यामन्यविशेषितपूर्वविशिष्टाभावादि राम०

वृत्तित्वविशिष्टाभावस्यप्रतियोगिव्यधिकरणत्वासंभवान्नपरित्यागः एतद्रूपवानेतद्रसादित्यत्रैतद्रूपस्यैतद्रसानधि
करणेऽसत्वेनैतद्रसाधिकरणावृत्तित्वविशिष्टैतद्रूपाप्रसिद्ध्यातदभावमादायपूर्वलक्षणादिवृत्तित्वविशिष्टैतद्रूपाभावस्य
वप्रतियोगिव्यधिकरणत्वासंभवेनविशिष्टाभावमादायासंभवासंभवेनद्वित्वावच्छिन्नप्रतियोगिताकैतद्रूपाभावमादा
यैवासंभवोवाच्यइत्याशयेनतत्परिहरतिव्याख्यायांद्वित्वावच्छिन्नेति अभावेति एतद्रूपतद्रूपाद्युभयाभावेत्यर्थः तस्य
प्रतियोगिवैयधिकरण्यंचसाध्यतावच्छेदकसंबंधइत्यादिसिद्धान्तलक्षणोक्तरीत्येतिध्येयं विशेष्याप्रतियोगिकत्वव
त्तिविशिष्टाभावस्यविशेष्यविशेषणसंबंधाभावरूपत्वादित्याशयः विशिष्टाभावस्यविशेष्याप्रतियोगिकत्वेविशि
ष्टसत्तासाध्यकजातिमत्वहेतोःसद्धेतुतयावक्ष्यमाणत्वातिप्रसंगासंगतिरित्यस्वरसादाहकश्चिदिति साध्यत्वेपरमिति
तत्रचनातिप्रसंगःसाध्यस्यहेतुसमानाधिकरणाभावप्रतियोगित्वादितिभावः उभयाभावप्रतियोगितापर्याप्त्यसंभ
वृत्तित्वेनासंभवइत्यतआह अत्रत्वितिसाध्यतावच्छेदकेतिजसम्बन्धेनज्ञानरूपप्रतिबंधकसत्त्वेनरूपत्वावच्छेदेननाहृत्यप्र

तियोगित्वस्यासंभवादिति भावः तथा चेति तथा च रूपत्वानवच्छिन्नपृथिवीत्वादिव्याप्यत्वादव्याप्तिः सुदृढैवेति भावः नन्वतिरिक्तेति अन्य
था गन्धादेः कपिसंयोगाद्यभाववानिति कृते तन्निरूपितावच्छेदकत्वस्य तद्धेतुकपिसंयोगादेः स्वरूपसंबंधरूपावच्छेदकत्वस्य तदनुप
पन्नेरिति भावः वाधिका रूपत्वे स्वरूपसंबंधरूपावच्छेदकत्वाद गादिनादृशप्रतियोगित्वाभावग्रहे वाधिकागुणाद्येति
आदिनाकारस्यास्य परिग्रहः इदमपि सामानाधिकरण्यप्रतियोगितानिरूपितमपि अवच्छेदकसंस्वरूपसंबंधरूपा
वच्छेदकत्वं अन्यत्र तन्निवं नत्समनियतं अनवच्छेदकत्वात् सामानाधिकरण्यप्रतियोगितानवच्छेदकत्वात् मनुपा
रिभाषिकस्य प्रतियोगित्वाभावावच्छेदकत्वस्य निवेशात् कंबुग्रीवादिमत्वादिना घटादेः साध्यतापात इत्यत आह तथा
चेति इत्युक्ताधिकरणे तेनेनान्वयः तादृशाव्याप्तिवारणाय प्रतियोगिस्पर्शः म रूपेति यद्रूपपदं साध्यतावच्छेदकपरं न त्ववच्छिन्नेति
तादृशावच्छिन्नेत्यर्थः इत्युक्ताश्चेति तथा च कंबुग्रीवादिनाघटादेः साध्यतायां यद्रूपपदेन कंबुग्रीवादिमत्वादेरुपादान
संभवात् अव्याप्तिराशंका इति भावः इत्याहाविति आदिनाधूमवान् वह्नेरित्यादेः संग्रहः अतिव्याप्तिरिति तत्र यद्रूपपदादेन रम्म०

प्रमेयत्वसमव्याप्तेरप्यतादृशत्वसंभवात् हेतुव्यापकतावच्छेदकेंधनत्वादेरेवतादृशप्रतियोगित्वाभावावच्छेदकत्वेनतमादा
यलक्षणासमन्वयसंभवादित्याशयः यथासंदर्भइतितद्रूपेनसमानाधिकरणयोरेवव्याप्तिरितिमूललक्षणाभिधाना
द्रुक्तरीत्याव्याप्तिभेदएवतत्रासमन्वयादितिभावः नानाव्यक्तिसाध्यकेन्यत्रनानाव्यक्तिषुसाध्यानियमस्येतिविपक्षाभिप्राये
णाहतानाधिकरणानितादृशाविपक्षबीजंस्फुटयतिसाध्यस्येति· तत्राप्युभयाभावान्योन्याभावमादायाव्याप्तिसंभवादाहद्य
कोनेति· अन्योन्येतिद्वित्वावच्छिन्नाभावविषयकत्वेतत्प्रतियोगितावच्छेदकसंबन्धाप्रसिद्धिस्तत्र याहृदयापदेनवह्नित्वावच्छिन्नमेवधर्तव्यं·
अनुपपन्नमितिदैशिकव्याप्तेर्युगपदुत्पादविनाशयोरनुपयोगादितिभावः केचित्तुजन्यजनकभावापन्नयोस्तादा
त्म्यापन्नयोर्वाव्याप्तिरितिनियममनुपगच्छतांमतेयुगपदुत्पत्त्यविवक्षसाध्यहेतुस्थलेऽतिव्याप्तिरितत्रैवव्याप्त्यतादप
रिहरन्तिमूलेयुगपदित्यादिनयावत्तादृशनियमेमानाभावइतिभावः प्राहुः द्वयोर्लक्षणयोरन्योन्याभावगर्भत्वेयावल
क्षणस्यैवैकवचनासंगतेरादृसामान्यतइतिद्विसाविवक्षणादितिभावः उक्तैरेवशब्दैस्सर्वथाप्यभिलापेप्रसिद्धत

श· यावद्विषयित्वार्थकत्वासंभवस्याशयं न कल्पान्तरमाह उल्लेखः शाब्दाभिलाप इति लाघवात् अनंतसंयोगेषु संयोगाभिद्धा
50 भावत्वकल्पनागौरवमपेक्ष्य लाघवात् तदेव तद्धर्मवच्छिन्नभेदस्य तद्धर्मस्वरूपत्वमेव ममाप्येवेति अत्र घटत्वस्यैकत्वयाला
घवासंभव इति तन्नोक्तं अतिरिक्तत्वस्वीकारे घटभिन्नभेदस्य घटत्वातिरिक्तत्वस्वीकारे अन्यथानुपपत्तिं अन्यविषयकत
योपपादनासंभवं सम्भावयितुं संनिकर्षादिघटितसामग्र्यसंभवादिति भावः संयोगानोल्लेखादिति अभावांशे साक्षात्
रंपरया वासंयोगत्वप्रकारत्वेनानुभवेनाग्रहणादित्यर्थः तथा चानुभवविरोध इति भावः क्वचिद्विषयत्वादिरित्यादिः
पाठास्तितत्र उल्लेखपदाद्यस्यविषयत्वार्थकत्वानुसारेणाविषयत्वादिति व्याख्या यथा शाब्दाभिलापार्थकत्वानुसारेण
व्याचष्टे प्रतियोगिस्वादिमूलेने त्यादि प्रतीकमधृत्वैव तद्भावमाह नसंयोगीति यत्ताहृष्टेति तथाच विरोधे घटः प्रथमाधि
केति न कपिसंयोगीति प्रतीतिरिति शेषः अत्र प्रकारकत्वादित्यत्र यावानुव्यवसायस्य तत्प्रकारकत्वांशे प्रमात्वनियमेन
भेदत्वप्रकारकप्रतीत्यनुव्यवसायस्य भेदत्वप्रकारकत्वांशे प्रमत्वकल्पनेन संभवतीत्याशयः संसर्गाभावविषयकत्वेति राम०

मेदन्वयप्रकारकत्वेनानुव्यवसायस्यसंदिग्धत्वादितिभावः ननुदण्डवेतिनियोचाम्योन्याभावस्याप्यहेतुत्वेविनैवायंन
शणमइतिव्यवहारोपपत्तिरितिभावः अप्रसिद्धेतिअतएवदंडादिरूपसंज्ञायिहायतन्नामानुधावनेनापंनदंडवानिस
त्रतदंडानुधावनंचेतिध्येयं तयोहेतुत्वंपुरुषोपस्थापकपदोत्तरसप्तमीपदज्ञानहेतुत्वं दंडितावितिविशेषणतानये
त्वादिदंडीनास्तीत्यादावपितरविशेषणतानयोपस्थितदंडादेरभावबोधवारणेनरविशेषणतानयेत्वादिव्युत्पत्त्यनुरोधेन
तदभावान्वयबोधेप्रथमांतनतु पदस्थापकपदधर्मिकतञ्समभिव्याहारतानस्यहेतुतयातदभावान्वप्रसक्तेदंडसंस
सर्गाभावबोधइत्याशयः एतेनतादृशान्वयस्यांगीकारेपिसद्दुपरिः दंडमतुवादिपदाधायिनांक्रमेणोपस्थिसाः वांतरबो
धेदंडादेर्विशेषणत्वेपिसमूहालंबनात्मकतावत्सहार्थोपस्थितौदंडादेर्विशेषणतानपानुपस्थितेरितिपक्तसमूहालंब
नात्मकतावत्पदार्थोपस्थितिर्नैवजातत्रतादृशासंसर्गाभावबोधासंभवइत्यत्रत्याप्सर्थमित्यपिपरास्तंकेचित्तुदंडत्वविशे
षणत्वयोपस्थितस्यप्रत्यस्यतरविशेषणत्वयोपस्थितियोग्यत्वार्थः योग्यतावैतत्रनिश्चयत्वावच्छेदकतयादंतरदंतप

टी· 5।

पदसमभिव्याहृतपदोपस्थितितया चेत् नया चेत्तदुद्देश्यपक्षकत्वहि धियेयकशाब्दबोधेनन्नपदसमभिव्याहृतपदजन्यातद्भिन्नरावि
शेषणतानयानतदुपस्थितिहेतुरिति पर्यवसितं घटादिपदे नञ्समभिव्याहाराभावान्नघटाभाव इत्यादौ च घटाभावोऽस्त्येतदिनर
विशेष्यतानये वोपस्थितेनैरिन्द्रादिसंसर्गाभाववोध इति वदन्ति तच्छिन्नं निराकांक्षत्वेनाकांक्षासत्त्वे हेतुमपानाद् घटाभा
ववोधवारणोऽस्मायपस्थितिविशेषहेतुत्वयान द्वारेणोऽस्वारस्यात् मनुवंतस्य घटाभाव हेतुतया वाविशेष्यतामात्रपर
कृतिशा ःउत्कर्षेण· कारणतावग्रहः धूमत्वावच्छिन्नं प्रति कारणतावग्रहः कथं· तस्यादिति धूमस्य क्वचिद्बोधेवन्रासभवह्नि
मात्रजन्यत्वस्यैव रासभाद्यसमवहितात् जन्मनावस्थापि निर्णयसंभवेन धूमत्वसामानाधिकरण्येन वह्निजन्यतायाः इव रासभादि
जन्यतायाः अपि रासभघटितनिरुक्तमर्केणाग्रहसंभवादिति भावः इति· इत्याशंकानिरासाय· निरुक्तेति कार्यकारणभावग्रा
हकेत्यर्थः अकारणे· रासभादौ· असंभवमिति कारणतासंदेहनिरासद्वारैव कारणतानिश्चयेन तर्कस्योपयोगेनाहेतुत्वनि
श्चये कारणतासंदेहाभावादिति भावः अहेतुत्वनिश्चयप्रदर्शनस्यानुकूलत्वापेक्षितोपयोगित्वसमर्थनेपि विवादिपुरुषकार राम०

रात्तोमान्वयव्यतिरेकाद्दैः प्रदर्शितस्य प्रकृतोपयोगित्वमसमार्पितमेवेत्यत आधारतापेन तत्त्वमर्पयति· वस्तुतस्त्वित्यादि
नास्य हेतुकत्वेति न च कारणं चित्कस्य हेतुकसकारणकत्व निश्चयाद्देवन तन्निरासस्संभवतीति वा संकुत्र चित्कारणत्वग्रहं वि
नाकारणं चित्कत्वे सकारणकत्वव्याप्तिग्रहासंभवात् एतद्दृष्टिभिस्त्रवधारणेत्यर्थः वस्तुसमवहितेनेति पक्षविशेषणं स्येत्यादि·
वन्ह्यसमवधानेनेति· आपाद्यव्यतिरेकस्येत्यादि· ननु वन्हिजन्यताग्राहकतर्केणावन्हिजन्यत्वापादकानिरास एव संभवतिनतु
वन्ह्यतकारणत्वसंदेहनिरासइत्यत आह धूमइत्तिसमानेनेति तथाचजन्यताग्राहकतर्कस्यापितुल्यवित्तिवेद्यतया कारणा
ताग्राहकतयातस्यापिताद्दृशशंकानिवारकत्वमितिभावः इहं· अकारणत्वसंदेहस्य वन्हिजन्यताग्राहकतर्केनिवर्त्यत्वा
भिधानं न व्यापादकं संदेहस्य तर्ककारणत्वेन निरासे न तन्निरासफलकतर्कवैयर्थ्यमित्याशयेनाह स्वारसिकसंदेहस्ये
तिस्वाहार्यापादकसंदेहस्येत्यर्थः व्याप्यवत्ताज्ञानेनैव· आपाद्यव्याप्यापादकवत्ताज्ञानेनैव· निरासादिति· प्रतिबंधादि
त्यर्थः तथाचतन्निरासफलकतर्कवैयर्थ्यमितिभावः नन्वसंगतमेतत् तर्केपक्षधर्मतांशे आहार्यापाद्यस्याप्यापादक

टी. वत्त्वानि स्वव्यापेहेतुरितिमते आहार्यज्ञानस्य प्रतिबंधकतयानाहार्यशंकानिश्चयेनापादकसंदेहप्रतिबंधासंभवात् व्याप्यांशे निश्च
77 यात्मकमापादकं यो संशयनिष्ठपसाधारणमापाद्यस्यापादकत्वाहार्यज्ञानं तर्के हेतुरिति मते च संशयस्य संशयाप्रतिबं
धकतयानेनापादकसंदेहप्रतिबंधासंभवादिति चेन्नैवं प्रथममते नाहार्यशंकानिश्चयस्यापादकेनानाहार्यापादकाभाववत्तानि
श्चयेनैव बाधबुद्ध्यापादकसंदेहप्रतिबंधसंभवात् द्वितीयमते चान्वयव्याप्तिज्ञाने तुल्यवित्तिवेद्यतयापाद्य आपादकव्या
प्यत्वग्रहे आपादकव्यापकमापाद्यमिति ज्ञानसंपत्त्या आपाद्यव्यतिरेकनिरूपितविषयतावद्भावज्ञानसत्वे आपादकव्या
पकाभाववत्ताज्ञानसंपत्त्या नानाहार्यापादकसंदेहसंभवः एवं मोपाद्याभाववत्वापकीभूताभावप्रतियोग्यापादकमिति व्य
तिरेकव्याप्तिज्ञाने तुल्यवित्तिवेद्यतया पाद्याभावे आपादकाभावव्यापकत्वग्रहे आपादकाभाववत्त्व आपाद्याभावइति ज्ञानसं
पत्त्यानाहार्यज्ञानस्य चापाद्यव्यतिरेकनिरूपितविषयतासत्वेनापादकाभावव्याप्यवत्ताज्ञानसंपत्त्यानाहार्यापादकसंदेहसंभवः
न च तत्रापादकाभाववत्ताज्ञानस्य तदभावव्याप्यवत्ताज्ञानस्य च विषयिताविशेषैः शिष्टानुगमाहितत्वेन तदज्ञानप्रतिबंधकत्वान्नोक्त राम०

दोषइतिवाच्यं तानद्रूपात्मकतन्मूलेपित्तद्रूपात्तानप्रतिवंधस्यानुभवसिद्धत्वात् तानद्रूपसाधारणरूपेणोवनस्यतद्रूपात्ता
नप्रतिवंधकत्वात् अयमिति अकारणत्वसंदेहस्यार्थः तथाचानाहार्यसंदेहस्यतर्ककारणेनैवनिरासेप्याहार्यसंदे
हनिरासार्थंतर्कानुसरणमावश्यकमितिभावः तस्यआहार्यसंदेहस्यअविरोधित्वइति आहार्यज्ञानस्यव्याप्यसंदेहस्य
चाप्रतिवंधकत्वादितिभावः तत्सामग्री· आहार्यसंदेहसामग्रीतथा· विरोधिनी· इच्छाघटितसामग्र्याबलवत्त्वादितिभाव
यः एवंचकारणतानिश्चयविरोधीच्छाघटितकारणत्वसंदेहसामग्रीविघटकतयातर्कसाफल्यंतर्कस्यतादृशसामग्री
विघटकत्वंचाग्रेअकीभविष्यतीतिध्येयं मूलतोयपोगात्वं· मूलोक्ततर्कस्याप्यानिष्टप्रसंगरूपप्रयोजकत्वंदृष्टोपन्तिमीहुताशने
त्यादिनाकार्यकारणभावग्राहकत्वप्रदर्शनेपिव्याप्तिग्राहकप्रयोजकत्वाप्रदर्शनादितिभावः प्रतिपाद्यस्य बोधनीयस्य
हेतुधिनौकार्यकारणभावः ग्राहइतिपाठाभिप्रायेणाह कार्यकारणभावग्राहेति· तर्कस्यापकतयाकार्यकारणभाव
ग्राहस्यापाद्यव्यतिरेकनिर्णयमुद्रयातर्कसंपादकतया· एवंचमूलेतत्पाठोऽस्यविपक्षबाधकतर्कस्यापककार्यकारण

दी· 78

भावग्रहजनकं तर्कं जानीहीत्यपर्य्य इति ध्येयं। नन्वकारणतायाः व्याप्तिघटिततया तन्निश्चयस्यैव व्याप्तिनिश्चयतया तदधीनत्वा
दिति म संगतमिति वाच्यं स्वरूपसंबंधरूपायाः अतिरिक्ताया वा कारणतायाः व्याप्तिघटितत्वमित्याशयेन तदधीनत्वादित्यु
क्तेः कारणताया नियतपूर्ववर्तित्वरूपत्वस्य सिद्धांतसिद्धतया व्याप्तिघटिततया तरीत्या तदधीनत्वस्य व्याप्तिबुद्धावसंभवे
नत्वीधीनोसामानाधिकरण्यानैयायिकस्यांतरानुसरणमित्याशयेनाहअन्वयेपीति व्याप्तिग्राहकत्वं व्याप्तिविषयकत्वं आ
हरिति भिन्नमन्वयग्रहेण सहचारतामात्रदर्शितं व्यतिरेकग्रहेण व्यभिचारस्तानापावआदर्शितं इति भावः व्याप्तिविष
यकत्वादिति अस्मिन् कार्ये च मूलेन जानीहीत्यस्याविपक्षबाधकतर्कमेव जानीहीत्यपर्य इति ध्येयं सामग्रीकत्वादिति कारणता
याः व्याप्तिघटितत्वे कारणताग्राहकसामग्र्याः व्याप्तिग्राहकत्वादिति भावः तस्य निरुक्तकार्यकारणभावग्रहस्य व्याप्तिग्रहानु
पयोगितयेति एकहेत्वन्वयोरन्यतरस्याप्यन्यत्रोपयोगासंभवादिति भावः ननु यथा व्याप्तिग्राहकेति कार्यकारणभावग्राहकेत्यर्थः प राम०
रुक्तानुपयोगित्वमेव व्याप्तिग्रहाप्रयोजकत्वमेव व्याप्तिग्रहप्रयोजकत्वं एवापर्यंतरपरिहारसंभवादिति भावः यद्यपि तस्य

व्याप्तिविषयकत्वेपि च तदुपधायकत्वं तर्कस्य व्याप्तिग्रहप्रयोजकत्वसंभवस्तथापि तस्य विशेषव्याप्तिविषयकत्वेपि सामान्य-
व्यभिचारशंकायाअनिवंधेन सामान्यव्याप्तिविषयकत्व यावत्तु मिस्तु पर्येति सामान्यव्याप्तिग्रहप्रयोजकत्वासंभवइत्याशय
सामान्येति धूमसामान्ये दैशिकवह्निव्यभिचारशंकायामित्यर्थः सामग्र्याविरहादिति तर्कस्य वह्निजन्यत्वग्राहकसामग्र्यंत-
र्गतत्वादित्यर्थः कालिकेति कालिकव्याप्ते दैशिकसा(मानाधिकरण्य)मिति भावः अनुत्तेजकत्वइति तादृशसामग्र्यातिरिक्तस्यैवोत्तेजकत्वा-
दिति भावः सामान्येति धूमसामान्ये दैशिकवह्निव्यभिचारशंकाया अवश्यंसत्वादित्यर्थः कालिकेति कालिकव्याप्ते दैशिकसा-
मानाधिकरण्यमात्रस्य च कारणतावच्छेदकत्वादित्यभिमानः सामान्येति कालिकेत्यादिः तादृशेति उक्तसामग्र्या विशिष्टेत्य-
र्थः दैशिकव्याप्तौ· न ज्ञाने· दैशिकसामान्यव्यभिचारशंकायाः प्रतिबंधकतायां· नेति तथा च नोक्तरीत्या प्रकृतोपयोगित्व-
मिति भावः तादृशेति सामानाधिकरण्येनेत्यर्थः असंभवेनेति सामानाधिकरण्येन धूमत्वावच्छेदेन वह्निजन्यत्वग्रहसंभा-
देरपि कालिकव्याप्ते दैशिकसामानाधिकरण्यमात्रोभयसत्वेन धूमत्वावच्छेदेन सामानाधिकरण्येन रासभजन्यत्वात्॥(११)

टी. 79

यत्सामानाधिकरण्यं न कारणतया तादृशोहेतोः शिकस्याभेदघटकत्वस्यावश्यकत्वादिति भावः तत्रापि हेतौ व्याप्तिज्ञानप्रति
बंधकतेति व्यसामानाधिकरण्यभिचारशंकाप्रतिबंधकतायामपि· तस्यतादृशात्वाद्यवज्ञानस्योत्तेजकत्वेति· तथा च प्रकृतेनापयोगि
त्वं निराबाधमेवेति भावः अधिकमस्मत्कृतभवानंदीयप्रकाशेनुसंधेयं तदभावेतिपद्यपि तत्कोटिकशंकाप्रतिबंधकत्व
मित्येवचक्तुमुचितं तत्पापितदभावज्ञानमात्रप्रतिबंधकत्वमेव तथायतथाक्ते यथाश्रुतेवन्हेरपि वन्हिमत्वेनघटप
क्षियमानत्वादेरिव वन्हिमद्धूमत्वस्यामानत्वस्याप्रसिद्ध्याहतधूमवमिति· यथाश्रुततज्जन्यत्वानुसारेणाहवन्हिपदस्येति
वत्कृत इत्यादि वहिर्मारारीत्यावन्हिजन्यमपर्यवसापितएववतर्कस्यवन्हिजन्यत्वाभावशंकानिवर्तकत्वेनवन्हिपदस्यवन्हि
सम्बद्धिन परत्वासंभव इत्यतः कस्यांतरमाह तद्धूमपदस्येति तद्धूमपदस्य वेत्यर्थः क्वचित्तथैवपाठः सामर्थ्यावतरणत्वइति
धूमपदस्यसहकारितासंबंधेनवन्हिमत्त्वार्थकतया चैतद्ध्रमदत्तिध्येयं यथाश्रुतमेव· यथाश्रुततज्जन्यत्वमेवःपाव्हि
केतिवन्हितधूमान्यतरत्वेनजनकतायाःअप्रसिद्ध्याताहशान्यतरनिष्ठजनकतानिरूपितजन्यतावत्वोवन्हित्वावच्छिन्न राम०

जनकतानिरूपितजन्यतायाः पार्थिवमात्रेऽपि संभवतीत्याशयः तत्कोटिमात्रेऽतिविपर्ययइत्यादि निरूपितत्वमात्रे
णतृतीयार्थः यद्यपि साध्यपितानन्वयिप्रयोज्यत्वं वाधवत्त्वादित्ति इतरवाधादिसहकृतपरामर्शस्य व्यापकतानवच्छेदकरूपे
णापि साध्यानुमितिजनकत्वादितिहृदयं नवह्निजन्यत्वेतिनवह्निजन्यत्वत्वावच्छिन्नेत्यर्थः तत्सहकारित्वं तस्यतर्कस्यस
हकारित्वं· तद्रूपेणावह्निजन्यत्वत्वेन· तृतीयार्थोऽवच्छिन्नप्रतियोगिताकत्वं· तदभावस्य· वह्निजन्यत्वाभावस्य· अनापा
दकत्वादितिश्रेयंभावः तद्धर्मविच्छिन्नाभावाभावस्य तद्धर्मविच्छिन्नरूपतया वह्निजन्यत्वत्वावच्छिन्नाभावस्यापादकत्वे
आपाद्याभावेनापादकाभावसिद्धौ वह्निजन्यत्वत्वावच्छिन्नसिद्धिसंभवति विशिष्टस्यापादकत्वे च तदभावस्यातिरिक्तत्वे
आपाद्याभावेनापादकाभावसिद्धौ नवह्निजन्यत्वसिद्धिरतिरिक्तत्वेऽपि विशिष्टाभावत्वेन नानिष्टावपि नवह्निजन्यत्वत्वा
वच्छिन्नसिद्धिरपि कतावच्छेदकरूपेणैवानुमितेः साध्यभानस्य प्राचीनसंमतत्वादिति सत्यं नविशिष्टाभिप्रायेणाह·
तन्निमतत्वेवेति व्यावर्तकधर्मदर्शनविधयापि· तत्संयादकतयापि· वह्निजन्यत्वाभावाभावव्याप्यवत्ताज्ञानसंपा

टी॰ ८०

इत्यनयेतियावत् विशेषणत्वेनेतिरीतिर्विशिष्टाभावस्य विशेष्याभावेनैयत्यादिति भावः तत्र वह्निसमवहितजन्यत्वस्य वह्नि
जन्यत्वात्मकत्वेन इष्यविशिष्टस्याप्यपलत्वस्यापि तत्त्वरूपमिति तथा च वह्निसमवहितजन्यत्वमित्यत्र वह्निसमवहितत्वेन
वह्नेरेवोपादानेन विशेष्यान्वयिनान्वयित्वरूपविशेषणत्वे वा तात्पर्यमिति भावः तात्तत्त्वमासाक्षात् हि स्फुराह्मूलस्येति व
ह्निजन्यत्वपरं वाह्निजन्यत्वस्यावच्छिन्नत्वात् प्रलापाकं एवं च दीधितावपि वाह्निजन्यत्वपर्यवसितमिमसंस्था एवार्थः वह्निस
मवहितजन्यत्वमिति स्वरूपपरं तेन न तत्प्रह्लामह इति ध्येयं नत्वापादककोटावनुयोगिनि वह्निजन्यत्वाभावे वह्निसमव
हिताजन्यत्वविशेषणदानेनेव घटादेर्व्यभिचारवारणासंभवे दीधितिकारस्य तथा वेत्यादिना पादककोटिस्थतद्विशेष
णस्यापाधीभूतजन्यत्वाभावप्रतियोगिकोटौ निवेशो बीजाभाव इत्यत आह दुःखमवतारयति नन्वित्यादिना निरूपितत्वमे
तस्माकं फलत्वमेव सुःस्यादयमिमवतिहीति नन्वेतावता प्रकृते किमायातमत आह नत्वमिति इत्यभिप्रेत्येति तथा च नो मा
शिमानत्कस्य फलसंपादकत्वमिति भावः इदमुपलक्षणं आपादककोटौ विशेषणदानेऽन्यामायपक्षेपि तद्विशेषणा राम॰

नैगौरवमित्यपि द्रष्टव्यं यथाश्रुतस्य जन्यत्वस्येति शेषः विवक्षणीयस्य विवक्षणीयजन्यत्वस्य तां ख्याहत्तिः संबंधेने
तितनमीयार्थभेदः प्रत्यासत्त्यवयीस्वप्रत्यासन्नस्वाजनकइतिस्वप्रत्यासन्नस्वाजनकइत्यर्थः प्रथमस्वपदं वह्निपरं द्वि
तीयस्वपदं यत्रेत्तियमद्यार्थपरं घटसंयोगाद्धेघटेंधनसंयोगाद्यो भवति द्वितीयहद्यासंबंधसंयोगस्तेनवह्निप्रत्यासन्नं
वह्निसंयुक्तेंधनं तत्र घटेंधनसंयोगाजनको वह्निरितिघटेंधनसंयोगादेर्नैतरीयकवह्निकत्वमितिभावः एतेन नैतरीयकत्वा
नैरीयकवह्निकत्वेन विशेषणस्यातिव्यभिचारासंपादकस्येतिदोषः इत्यर्थइतिरएतदुत्तरं नन्विवस्मादिरेवपाठः यावत्कार
णोइति वह्निनत्समवधाने तरेभ्यादिः विधेयस्तानविधेयतेयाल्लाभात् नदोषः ननोनरीयकवह्निकेव्यभिचारः स्वोपलाद
शयावत्कारणोत्तगतेनदीयचरमकारणवह्न्यसमवधानकालीनत्वाभावादितिभावः तेनेत्यादिनावक्ष्यमाणानुशया
दाहव्यत्रवेतितद्वह्निसमवधानेतिपक्षीकृतधूमो येन वह्निनाजन्यते स एव तद्वह्निस्तत्समवधानं चेतेन तद्धूमजनने व्या
पारइंधनसंयोगादिः इदं चाग्रेस्फुटीभविष्यतितद्धूमाविच्छिन्नस्ययावतः प्रागभावइत्यर्थः इदं च प्रागभावस्य सामान्य

धर्मावच्छिन्नप्रतियोगिताकत्वानभ्युपगमे तदभ्युपगमे त्वाह तद्धर्मावच्छिन्नप्रतियोगिताकेति । अन्यरेतद्धेति उभयथापि
तस्यापीत्याहिनाबहूनामतस्यपत्निं चित्तत्तद्धन्दिसमवधानप्रागभावकालीनत्वमात्रस्यव्यभिचारस्यवारणासंभवादिति भावः
तेन तद्धन्दित्वेन वन्हिनिवेशेन । यावदिति । माह येत्यादि । एवमग्रेपि । ध्वंसमुपेक्ष्य प्रागभावनिवेशबीजमाह नचेति ध्वंसे
तियद्यपि तादृशयावदन्तर्गतस्यतद्धूमरूपप्रागभावस्यानपायात्वाव्यभिचारसंभवस्तथापि ध्वंसनिवेशेन तद्धूमप्रागभाव
मात्रस्याप्रसिद्धिनिरासायतादृशयावत्कारणाभावत्वं निवेशनीयं तत्राव्यभिचारसंभव एव । अत्यंताभावोपेक्ष्य प्रागभावबीज
माह अत्यंताभावेति वन्हिसमवधानस्य । तद्धन्दिसमवधानस्य । नोत्पत्तिनकेतिमत्वं वा यत तदुत्पत्वे सति न अन्योन्यस्तिद्धी
यह रोनियमेनजन्यत्वं ध्वंसप्रागभावसाधारणाकारणाभावत्वेन निवेशोपेक्षाबीजमाह यत्र वर्ह्निधन इति । क्रियापू
र्वसंयोगनाशादेरिति । यथासंख्येन प्रागभावध्वंसयोरन्वयः तद्वन्हिसमवधानत्वाश्रयसमुपेक्ष्य तद्वच्छिन्नस्वनिवे राम०
शबीजमाह तस्यापीति पूर्वसंयोगनाशस्यापीत्यर्थः वन्हिसमवधानेति तद्वन्हिसमवधानेत्यर्थः तद्वन्हिसमवधानत्वा

वच्छिन्नप्रागभावेनिरुक्तत्वं सत्त्वेन्मादिनापूर्वमेवोक्तं· सत्त्वेनार्थत्वादिति सत्त्वेऽपि वह्निसत्त्वन्ननिवेश्यादितिभावः तत्
द्धन्यसमवधानकालावच्छिन्नेतितद्वह्निसमवधानप्रागभावकालावच्छिन्नेत्यर्थः धूमस्यापितद्वह्निसमवधानप्रागभाव
कालीनजन्यत्वादवच्छिन्नेत्युक्तं संभवादितिनियतपूर्ववर्त्तित्वादनन्यथासिद्धत्वाच्चेत्यभिमानः विशेषणविशेष्ययोः
स्वंऽशः प्रसिद्धिसत्त्वादाह विशिष्येति आर्द्रेन्धनजन्यवह्नेरेवेतिसत्यव्यार्द्रेन्धनेवह्नेरेवेदाह प्रतिबंधकमण्यादिसमवधा
नेधूमानुत्पत्तेरितिभावः अजनकत्वादिति अन्यथासिद्धत्वेनेत्यादिः· तादृशेति आर्द्रेन्धनजन्येत्यर्थः एवमग्रेऽपि तत्र आ
र्द्रेन्धनजन्यवह्निद्वयजन्यधूमेपक्षे· तद्दोषेति अप्रसिद्धीत्यर्थः प्रथमवह्नितत्समवधानेतरतद्धूमकारणाभाववह्नेगति
स्यचरमवह्नेः प्रथमवह्निसमवधानकालीनत्वाभावादितिभावः एकतद्वह्निमात्रारब्धधूमस्यैव पक्षत्वमित्याशयेनाह य
त्रेतिसंकोचासहिष्णुराह तादृशेतितद्वह्निसमवधानत्वेनतद्वह्निव्यापारत्वेन· तद्वह्निसमवधानेतरेत्यनेनैव· तद्वह्निव्या
पारेतरस्यनिवेशनेनैव· वारणात्· अप्रसिद्धिवारणात् तद्धूमावयवादीनांतादृशयावत्कारणमध्यानिविष्टत्वाभा

वाहितिभावः तदवयवेति तद्धूमावयवावयवेऽप्यर्थः यत्रेति धूमत्रसरेण्वादिकमनुमाप्यैवेति शेषः संयोगजननद्वारा॰ ज
न्यमानसंयोगद्वारा॰ स्थूलधूमः चतुरण्वादिरूपस्थूलधूमः नादृशधूमस्यैवेति नादृशस्थूलधूमस्यैवेत्यर्थः न त्वाश्र
द्यचिरत्यधूमत्रसरेणुकप्रसिद्धानन्तरे कृतत्वव्यभिचार इति भावः नन्वेवमपि नादृशधूमारंभकत्रसरेणावेव कृत्वाद्व्यभिचारो दु
वरिः नादृशयावत्कारणस्य समागमभावधूमत्रसरेणोऽकत्वादेस्तदुत्पत्तिसमवधानैकालीनत्वाद् तस्माद् तदवयवेति नादृ
शस्थूलधूमावयवेऽप्यर्थः तद्धूमसमवहितेति नादृशैकत्वसामग्र्यास्तद्धूमसमवधानकालावच्छिन्नत्वेन तत्सामग्रीतु
न्येषु नादृशैकत्वेषु समन्तामावान्न व्यभिचार इति भावः नादृशधूमैकत्वादेर्व्यभिचारं वारयति नादृशेति वह्निसंयुक्ते
रितिरित्थं संवेधमत्यह्नि यावदाश्रयसंनिकर्षस्य हेतुतया वह्नस्य मात्राणामत्यह्नि यावत्तादृशकारणोत्पत्तिरिति वह्निसंयुक्तत्रसरेणुसं
योगानां व्यभिचारसंपादकवह्निसमवधानकालीनत्वरक्षायै त्रसरेणुविशेषणं तन्मते स्थूलधूमोत्पत्तिकालोत्पन्न
स्थूलधूमारंभकधूमत्रसरेणुत्वावच्छिन्नसंयोगमत्यह्ने॰ अपेक्षाबुद्ध्यात्मकसंबंधितावच्छेदकमकारकत्वानेति नादृशत्रसरेणुत्वा राम॰

द्विप्रकारकज्ञानेत्यर्थः अत्र वह्नींधनसंयोगस्तत्रारंभकसंयोग[illegible]जनोयः मद्रतिक्रमतत्त्वनाद्दशात्स्थूलधूमारंभकत्र्यस
रेणवादिसंयोगोत्पत्तिकालोत्पन्नस्यानद्व्यवहितपूर्वकालोत्पन्नस्य च संबंधितावच्छेदकप्रकारकज्ञानस्य तद्धूमसमवधान
कालीनत्वाभावेन तद्धूमसमवधानसामग्र्यपूर्वोत्पन्नताद्दशाज्ञानमादायैवव्यभिचारो वाच्यस्तस्य च द्विक्षणस्थायित्वपात्ता
द्दशायाम्पहत्यव्यवहितपूर्वक्षणपर्यंतस्थायित्वाभावेन हेतुत्वं न संभवतीत्यत उक्तमपेक्षबुद्ध्यात्मके इति वह्न्यसमवधाने
तितद्धूमसमवधानेत्यर्थः एवमग्रेपि वह्निसंयोगेति वह्निस्त्रसरेणसंयोगेत्यर्थः मन्नु तादृशधूमारंभकसंयोगोत्पत्ति
कालेकदाचिद्वह्निसंयोगान्तरानुत्पादेपि संभवतीत्युक्तव्यभिचारतादवस्थ्यं तदनुत्पादे संदेहे पिव्यभिचारसंदेहो दुर्वार
त्वमत आह वस्तुतस्त्विति तद्धूमसमवधानत्वेन सकलतन्निवेशे गौरवेणात्र प्रथमोपस्थितत्वाद्धनद्धूमसमवधानस्यैव
निवेशउचितइत्याशयेनाह तद्धूमेति अप्येवंविशेष्यदले प्यागतद्धूमसमवधानप्रागभाव एव निवेश्यतां एवं च तत्
द्धूमसमवधानत्वावच्छिन्नप्रागभावपर्यंतानिवेशेन लाघवमपीति चेन्न इष्टापत्तेः तद्दसमवहितेत्तितत्प्रागभावकाली

श्री· 165

83 नेत्यर्थः सामग्र्यजन्यत्वस्येति सामग्र्यनंतर्भाविधूमस्याप्याद्यतदुत्पत्तिसमवधानप्रागभावकालीनस्वप्रागभावजन्यतापात्तत्र
सत्येतासिद्धेः स्यादिति नद्दंतर्भावः एवं चाद्याधारताकारतात्मकधूमसामग्र्याधूमावयवसंयोगरूपाया एतादृशप्रागभाव-
कालीनत्वाभावासिद्धेः प्रागुक्ते· प्रागुक्तपत्यहे· व्यभिचार इति आद्यतदुत्पत्तिसमवधानप्रागभावकालीनापेक्षासुखात्मक
संबंधितावच्छेदकप्रकारकस्वात्मरूपसामग्र्यजन्यत्वेन सत्त्वं माभावादिति भावः नत्संयोगेति उत्तरसंयोगेत्यर्थः नदाईंधने
तितत्संयोगाश्रयाईंधनेत्यर्थः नदाश्रयेंधनेति नद्दिंधनस्याधिकरणविधयातत्क्रियानाशेन तत्संयोगनाशे चेद्धेतुत्वमि-
तिसत्त्वनायाश्रयत्वोक्तिः परं केवलं· संयोगिविशेषितस्यैवेति यत्र धूमसंयोगस्य कारणत्वं तत्र संयोगेन धूमस्यापिका-
रणत्वमितिनियमांगीकारादितिभावः क्वचित्तु वस्तुतस्त्वित्यादिभावइत्यंतः पाठो नास्त्येव स तु लेखकप्रमादादिति बोध्यं का-
लोपाधिविधयेति इदमुपलक्षणं· दिगुपाधिविधयेत्यपि बोध्यं नाप्रसिद्धिरिति इदं च रसविशेषस्पर्शविशेषादिमात्रं कारणता-
वच्छेदकत्वमेव न तु कारणत्वमिति मतावलंबेन· एतेन तद्ध्वंसे कारणगतरसविशेषस्यैव धूमेपि कारणगतस्पर्शवि एतम०

शेषस्य हेतुतयायावत्तादृशकारणांतर्गतस्य तस्य वह्न्यसमवधानकालीनत्वाभावेनाप्रसिद्धिरस्त्वेवेति निरस्तं तस्य वह्न्यस
मवधानेनरत्वाभावाच्च तत्साधारण्यस्यैवेति प्राग्वह्निचरमवह्न्येतदन्यतरत्वस्यैवमर्थः वक्ष्यनयेतितद्व्यक्तिविशेषणा
नयेत्यादि तद्व्यक्तित्वेनेति तदन्यसमवधानकालीनेत्यत्र तद्व्यक्तिपदेनेति शेषः मदीयमेवेति धूमकारणीभूतचरमव
ह्निव्यक्तेः पवित्वादृशकारणांतर्गतत्वात् तदन्यसमवधानकालीनत्वाद्विति भावः। नचैवं दीधितौ वह्निपदोपादानमसंग
तमिति वाच्यं व्यक्तिविशेषोपादाने तात्पर्यग्राहकतयैव तत्संगतेः उक्तरीत्या दृष्टान्तरानीतवह्निमादायैवान्वयव्यतिरेक
ग्रहेणा तत्साधारण्यस्यैव तद्व्यक्तित्वस्यावश्यंवक्तव्यतयाः प्रसिद्धिवारणार्थतया वह्निपदं हेयमेवेत्यस्वरसादाह नवीना
नां पंथा इति प्रतियोग्युपलंभकयावद्व्यक्तिसमवधानस्यैकदाऽसंभवदुक्ताशयेनाह तदुपलंभकतावच्छेदक इति तादृ
शयावत्कारणांतर्गतार्द्धिनादृश्यसामान्यतो वह्न्यसमवधानकालीनत्वाभावेनाप्रसिद्धिरित्याशयेनाह कारणताव
च्छेदक इति पर्यवसितार्थ इति विशेष्यदलस्येत्यादि अत्र सत्यंतं वह्न्यसमवधानकालीनत्वं च यथाश्रुतार्थकमेव

दी.　५४

167

वह्नेर्वह्नित्वेनैवानिवेशादिति ध्येयं । नन्वेवमपि धूमसमवायित्वरूपधूमावयवत्वस्य तत्संयोगत्वरूपधूमावयवसंयोगत्वस्य वा
दुरूपयावन्मात्रकारणतावच्छेदकान्तर्गतस्यैकस्य समकक्ष्यानैककालीनत्वज्ञानाभावादप्रसिद्धिरत आह धूमावयवस्य चेति अवच्छेदकेति
उपलक्षितेत्यर्थः नियामकत्वेनितरपादवयवाद्यवयवस्यापि धूमसमवायित्वोपलक्षिततया तादृशनियमानुपपत्तेरिति
भावः वस्तुतस्तु तेन रूपेणाहेतुत्वे गौरवमेव बाधकं रूपं रसवद्विशेषस्पर्शविशेषादेः कारणत्वमतानुसारेणाह पृथिवी
त्वेन चेति विशेषरूपेणापि धूमावयवसंयोगत्वादिनापि मानाभावादिस्य विशेषहेतुतया अतिप्रसंगस्य निरासादिति भा
वः परमाण्वारब्धावितिमहाप्रलयानङ्गीकारेणोक्तं तदङ्गीकारे व्याहतमाह द्व्यणुकेति द्व्यणुकारंभकतावच्छेदकेत्यर्थः अग्निसंयोगात् नि
रोगेनुमस्याकाश्यात् दिशेति पूर्वापरादिप्रतिष्याधि तद्बुद्धिपरत्वे तत्सावयवत्वे सामान्यतो व्याप्यसमवधानकालीनत्वनिर्णय
मुपेन्य दूषणांतरमाह नान्तरीयकवह्निकेति अत्र नान्तरीयकोऽभ्यपासिद्धो वह्निर्यत्रेति धूमस्याव्यजन्यत्वेनैवह्नितिय
तोप्यत्रिकेधूमरूपविशेषस्यार्थः नाहवेति नीलाद्यात्मकेत्यर्थः एवमग्रेपिलाघवाद्ववयवहेत्वमनिवेशादित्वाद्यारूप रामः

त्वेनैवेति अतिप्रसंगवारणोपायं दर्शयति स्वसमवायीति । यत्तु नांतरीयकेतीति एतन्मतेन जन्यत्वं यथाश्रुतमेव न तु वक्ष्यमाणस
मवधानकालीनत्वादिरूपं । यद्यप्येतन्मते आपादककोटौ सत्यंतार्थविशेषणतास्पष्टा दाहावेव व्यभिचारवारणप्रयोजनं सं
भवति न त्वपि क्वचिद्विहरणीय स्वसत्यंतार्थस्य त्वाद्वृत्तिं प्रदर्शयितुं नांतरीयकवह्नेकानुधावनं वह्निजन्यत्वाभाव इति व
स्फुटत्वाद्युपदर्शितयुक्तेरेतन्मतेपि वह्नेः समवहितजन्यत्वं वह्निजन्यत्वपर्यवसितत्वाच्च व्यभिचाराशयः शोधितो आपादकको
टावेव । आपादककोटिप्रविष्टवह्निजन्यत्वाभाव एव एव एवकारेणापाद्यकोटिप्रतीयोगी विशेषणत्वव्यवच्छेदः व्याख्या
यां मूलेतिजन्यो न स्यादिति मूलेन्यथार्थः यथाश्रुतेन यथाश्रुतसत्यंतार्थे न व्यभिचारेतिनांतरीयकवह्निकत्वादिः न वह्नि
घटितेमीतिहेतुसमहस्यैव सामग्रीत्वेन वह्नेर्नांतरीयकवह्निकाहेतुतयातत्सामग्र्यघटकत्वादिति भावः अतिस्थ्रपरे
तिवह्नेर्धूमकारणत्वसंदेहेन धूमसामग्र्यां वह्न्यघटितत्वसंदेहे जन्यत्वे न निश्चितेधूमेपि वह्न्यघटितसामग्रीजन्यत्व
स्वसंदेहादिति भावः ननु पक्षे आपादकानिश्चयस्तर्कानुगुण एवेत्यत आह न च्यावेति आपादकविशेषणेति विपर्यये

वन्हिजन्यत्वकोटिमात्रपर्यवसानायपक्षतावच्छेदककोटौनिविष्टत्वात् । स्वोक्तेतिवस्तुतइत्यादिनास्वयंपरिष्कृतेत्यर्थः
मूलंकिमवच्छेदेरेवभविष्यतीत्यादिमूलं । विवक्षितेतिवस्तुतइत्यादिनेत्यादि उभयत्रैव । शंकाद्वयएव । कोटिद्वयाहितेत्याद्येय
मन्यावच्छेदेनकोटिद्वयंमंत्येनतत्सामानाधिकरण्यमेतिद्वयोर्भेदइतिध्येयं ननुप्रतियोगीनोहेतोरप्रसिद्ध्याऽहेतुमत्त्वशंकैवा
नुपपन्नेत्यतआह नत्वावेतीयरमतानुसारेणाहासतत्वान्नोतिकार्यसामान्यमइति शंकेत्यत्रेतनेनान्वितंउभयसाधारणप
ताहकार्यत्वावच्छिन्नेतिकार्यसामान्यात्ववच्छिन्नेत्यर्थः पूर्ववन्निवइतिसप्तम्यर्थविषयितान्वियपतत्वादेरित्तिकार्यसामान्यनिय
तत्वादेरित्यर्थः विवक्षितेतिमूलइत्यादि । नत्याचोक्तरीत्यामतियोगीप्रसिद्ध्यानाहेतुमत्त्वशंकानुपपत्तिरितिभावः आपा
द्येति वस्तुतइतिकस्येआपाद्यापादकयोरुभयोरेवहेतुनाघटितत्वेनापाद्येपिहेतुतायाःसत्त्वेवयाद्वितिभावः । विशेषणा
भावेन । तद्वारा । तत्प्रयुक्तविशिष्टाभावमादायेतिपावत । मूलानुरोधेनेतिनादृशमूलादन्वयव्यतिरेकानुविधानज्ञानस्ये
वशंकाप्रतिबंधकत्वमाहितिभावः तत्परमितितादृशान्वयव्यतिरेकानुविधानबोधपरमित्यर्थः शेषिनो । तमरपेवना रामं॰

दृष्टान्तो ध्वपरमेव स्वंक्रियते ऽनयेति करणात्मनुमानस्य स्वस्य क्रियायस्याऽनिष्पुत्तस्यावा स्वक्रियापदेन ताद्दृशबोधलाभसंभ
वादिति भावः व्याख्यामप्युपाश्रुते उपादानपदक्रियायद्यो भविष्यमनेनोत्तरवच्छिन्नेककारणताग्रहइति नत्स्येव धूमत्वाव
छेदेन वह्निव्याप्तिग्रहोपयोगित्वादिति भावः विशेषेऽधूमवि शेषे सामान्यतः धूमत्ववह्नित्वाभ्यां ताद्दृशजन्यत्वस्य तृणा
दिजन्यत्वस्य ताद्दृशव्याप्तिग्रहानेति न चावतारणो कथं वह्निजन्यत्वग्रहस्यानुमानमाति विरोध इति वाच्यं कार्यकारणभावग्रह
स्यैव व्याप्तिपरिच्छेदकत्वाभिप्रायेणाविरोधात् अत एव लाघवसत्वेन ताद्दृशसामग्रीविशेषत्वं निवेशितमेव अत एव
अतोऽपि उन्नेजकतावच्छेदककोटौ निवेशादपीत्यपि नापूर्वापरदर्शितरीत्या हाऽयपीत्यादिकशंकामातिवंधरूपफलसमुच्च
यः कथमेके तिलाघवज्ञानादिकमनुमेनकोत्तमसाभिचारनिरासियत्वेन प्रतिबंधकत्वांतरकल्पनस्यावश्यकत्वादिति
भावः विशेषणाभावेनेति इदं च लाघवाद्यनुसंधानसत्वे तद्दसत्वे तु विशेषणविशेष्योभयाभावेनेत्यपि द्रष्टव्यं धूमत्वा
वच्छिन्नमेवेतिपत्वेनप्रतिपिद्धमत्वसामानाधिकरण्येनैव पहृत्वं न वह्निरोधितो धूमत्वावच्छिन्नस्येति विरुद्धं धूमत्वावच्छे

शी·
56

देन पक्षत्वेन तत्र प्रतियोगिनिरूपितसाध्याभावाकान्ततांशे शान्तस्यापत्या पत्त्यावृत्तमत्वावच्छिन्नस्येतरस्य धर्मत्वविशिष्टस्येत्यर्थकतयाऽ
विरोधात् नचैवं पूर्वस्मादभेदः अत्र वह्निसमवहितत्वज्ञमत्वस्य यथाश्रुतस्यैव तिविषतयाभेदात् कदिनिनदसत् अनुपदमेव
दीधितौ तत्त्वोक्तन्यायेनेत्यादिनाधूमत्वावच्छेदेन प्रतियोगिनिरूपितस्यापत्तेरनात् नचैतदनुपपत्त्यादिकं सामानाधिकरण्येनैव तद्दु
यथारकमिति वाच्यं· सामानाधिकरण्येन तन्निरूपितस्यैव हि रिद्वियेयापि संभवेन मनसैव सुज्ञत्वमिमिमनोनुधावन्नैव यथाप
ते· जन्यो नस्याहिति मूले जन्यत्वस्य विशेष्यतयानिवेशान दीधितौ जन्यत्वावि शिष्टस्येति विशेषणतया जन्यत्वनिवेशे द्वासा
नुपपत्ता वादाह अग्नेरित्यादि यरामर्शीर्य मितितच्छेदेन पर्वीपस्थितविशेष्यस्यैव परामर्शादित्यर्थः नरेवं वह्निसमवहित
जन्यत्वमेव यथाश्रुतेति यथाश्रुतत्वं च वह्निसमवधानाभाववत्सामग्र्यजन्यत्वरूपत्वं नि रासे इति प्राकृतदृष्टिसिद्धेरिसुक्षरीत्या
तादृशवह्निप्रागसंभवादिति भावः वह्नियुक्तेति वह्निसमवहितेत्यर्थः कलाययुयास्मलेति पाठः दीधितिस्थजन्यत्वपदस्य प्रयोज
नार्थकत्वादिति भावः वह्निव्यतिरेकेति वह्नेर्व्यतिरेको यत्रेति अनुपपत्त्यावह्न्यसमवहितेत्यर्थः तेन संबंधेन धूमजनकतावच्छेदक रामं°

130

संबंधेन॰ अन्यथासिद्धत्वशंकया॰ अन्यथासिद्धवह्निसंनिधिकत्वशंकापाजनकत्वेति धूमजनकत्वेइत्यर्थः धूमेजन्यत्वेत्तिया
वन्न्यथ्यांवयाचेतितभयथ्यापि धूमत्वसामानाधिकरण्येनवन्ह्यसमवहितजन्यत्वकोटिकशंकायाअपर्यवसानादितिभावः
वन्हिश्चेत्यतिवन्ह्यसमवहितेत्यर्थः धूमजनकत्वसंभावनायाः धूमेक्वचिद्वन्हिंवाविशेषेनसत्वासाध्य· नाद्दृशासमूहाजन्यत्वयो
कायाः विकल्पेनजनकत्वंशंकायास्तत्रैवपर्यवसानादितिभावः कारणांतरेति आर्द्रेंधनादीत्यर्थः तत्प्रयोजकत्वेधूमा
नुमितिसामान्यप्रयोजकत्वं· नघटतइति उक्तस्यत्वेधूमानुमितिप्रयोजकत्वस्यार्द्रेंधनाद्यभावएवसत्वादितिभावः तदुपा
दानपदस्य· तदुपादानमेवशंकाप्रतिबंधकमितिमूलस्यतदुपादानपदस्य· निर्णायमिति अर्थमितिशेषः प्रत्यासत्त्या
व· नहिवरणात्पयंवन्हेरुपादानेस्त्रियमतः कथंकुर्यादितिप्रश्नमवाक्यमेव· तथाताद्दृशानिर्णयार्थकतया· व्याचष्टइति
विवरणाविभ्रियमाणागाकयोरेकार्थकत्वंस्योचितमादितिभावः यथाश्रुतेतुवान्हयदस्यवान्हिसमवहितार्थकत्वमनाद्द
वन्ह्यर्थकत्वेतु· विवहितार्थेतिनाद्दृशानिर्णयार्थत्यर्थः बाधितेचेतिधूमार्थेवन्हिभिन्नार्द्रेंधनादेरुपादानादितिभावः श्र

टी॰ त्र यद्दीधितौ वह्नेरित्यादिसात्पर्यमिति संतत एको ग्रंथः ननु वह्नेरित्याद्युपादान मित्यंन अत्र वेत्यादिनात्पर्यमित्यंतेन सुभिप्रेतोपनं
87 यस्त त्यासमुपादान मित्यस्यो हेक नवेयर्थ्यमात्रे वेत्यनेनत्वाख्येयग्रंथानुद्दंकेनेन वाल्यग्रकजापन्नेरिति ध्येयं॰ व्याख्यायां नि
यमाधीने निवह्नेरुपादाने नियमनस्यत्रयोजनाल्लभ्ये वह्नेर्नियमजगद्युपादान मित्यत्र वह्निसम भिव्याहृतापर्वकेवान्दियद्दोपाद
नपदयोरंतर्निर्विशेषिकारसमानार्थकनियमपदार्थनियमाभीनत्वस्यव्यवच्छेदस्वाधेसंभवादिति भावः असंगतेः वह्नि
समभिव्याहृतानुपादाने नियमअवच्छेद्यत्वोक्तेरसंगते॰ मतांतरमाह नियमनरतिकुर्यादिति इत्यत्र सममभिव्याहृतं उत्ककत्वे कथ
मित्यत्रान्वयिअवच्छेद्यस्य आहोप्यस्य॰ यथाश्रुतेऽन्वयित्याः संगतेरपरीहारात् ऽहृदूरत्वात् स्वरसाद्दाहृत्वादिति॰ निय
मपदार्थस्येति नियमपदं नियमपदसमानार्थकपदमेवकारस्तदर्थस्येत्यर्थः नद्दुपादानमेवेत्यत्र योजनालभ्येतस्ये
वोपादानमित्यत्र वह्निसमभिव्याहृतार्थकतन्यदोपादानपदयोरंतर्निविष्टनियमार्थकपदेवकारापेक्षिकाप्रतिबंधकत्वस्य
न्वयासंभवादिति भावः नव्यास्त्वेनिनहि वरणरूपेवह्नेरित्यादिवाक्ये पिलक्षणायानियमपदार्थे तदन्यत्वज्ञानेनातात्पर्यमिति राम॰

175

घादकमिति शेषः न च्छेत्ति नियमपदस्याक्षेपार्थः अग्रकृतमिति विवरणवाक्यविध्रियमाणवाक्ययोरेकार्थकतयावि
ध्रियमाणवाक्ये नियमपदस्यतात्पर्याभावे विवरणवाक्येपि तत्संभवादिति भावः आह न च तृणस्याउपादानपदार्थत्वेनेह
जन्यत्वज्ञानेउपादानपदस्याक्षेपार्थं संबंधमाह इत्यर्थपर्यवसानमिति क्रमेणाकृत्याप्रवृत्त्यानुसारेणोत्तरे किं त्वर्थपर्यवसानइ
त्यर्थः अन्वयादीति आदिना व्यतिरेकपरिग्रहः अन्वयांशस्य नियतान्वयांशस्यैकस्य समवहितान् न्यायान्वयवैतिज
न्यत्वविशिष्टेसादि जन्यस्यैकस्य प्रकरणादिनागवंभाभावादिति भावः नियतस्येतीतिनियतस्येत्याद्यर्थः ननु कार्यकार
णाभावग्राहकतर्कस्यापि वह्निजन्यत्वनिर्णयद्वारा धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यादिति तर्कांतरसंपा
दकत्वेन तत्र द्वारा व्यभिचारशंकानिराकरणोपयोगितया न वैयर्थ्यं उपायस्योपायांतरादूषकत्वादित्यत आह किं चेति
तद्वह्निरितस्य तद्वह्निसमवधानप्रागभावकालीनत्वस्य अनिर्णयात् निर्णयासंभवात् तत्र हेतुमाह धूमस्य तत्र धूमका
रणोत्तद्वह्निसमवधानप्रागभावकालीनत्वाभावेन धूमस्याविच्छेदेन तत्तद्वह्निसमवधानप्रागभावकालीनयावत्कारण

टी

कत्वाभावादिति भावः वह्निव्यभिचारिनिष्ठसंयोगेनेत्यादि सामानाधिकरण्यप्रत्यासत्त्या तद्धटकसंयोगेन एवमग्रेपि ॥
व्याप्तिग्राहकतर्केति मूलोक्ततर्कोत्तिसंयोगेन वह्निजन्यत्वनिश्चये आयाव्यक्तिरेकनिर्णयसंपन्नो व्याप्तिग्राहकतर्कभ
तादिति भावः मनुव्यधिकरणस्य जनकत्वशंकायाम् व्याप्याभावानवगाहितया संयोगेन वह्निजन्यत्वनिश्चयाविरो
धितया न तन्निरासायेदं हेतुमत इत्याह व्यधिकरणस्येति तन्निरासार्थमिति संयोगेन वह्निजन्यत्वाभावशंकायास्तन्निश्चय
विरोधितया न तन्निरासस्यावश्यकत्वादिति भावः आपादकएवेत्यादि नेव विपर्ययेन कोटिमात्रपर्यवसानापत्तेः सम
न्तं निवेशनीयमिति ध्येयं निष्कर्षे इति याग्रुपदर्शितमुक्तेत्यादिः स्वसमानाधिकरणेति निश्चयेनेन सामानाधिकरण्यापत्तिरि
ति प्रत्यासत्त्या वह्निजन्यत्वे सचितं स्वावयवजन्यत्वादितिनत्याच यथाश्रुतमूलानुरोधे यदृच्छाविशेषणासिद्धिर्निष्कर्षे
व्याप्यापाद्यप्रतीयोग्यसिद्धिरिति भावः ठक्कन्यायेनेति विशेषणावत्त्वे तन्निर्णीतिविशिष्टाभावसिद्धेर्विशेष्याभावमात्रपर्य
वसायितेत्युक्तप्रायत्वाद् विशेष्याभावसिद्धिरिति इदं च यथाश्रुतमूलानुरोधेन इदमुपलक्षणं निष्कर्षेऽपि हेत्वापाद्य राम०

प्रतियोगिसिद्धावेवतर्कप्रवृत्तिरितिद्रष्टव्यं· ननु सापंतं· संयुक्तसंयोगादीतिः आदिनातादात्म्यादिपरिग्रहः ताहृशाज
न्येतिसंयोगानिमित्तसंबंधेनवन्ह्यजन्यत्वेनार्थः तन्निरूपणीयार्थं· आनुमानिकताहृश्याजन्यत्वनिरूपणीयार्थं· यथालोकेमेन
तिकारणासंबंधाभावस्यैवकार्यानुत्पत्तिप्रयोजकत्वादितिभावः उभयत्रापि· मतद्वयेपि परिष्कारमेव स्फुरयति तथेति·
तदर्थः धूमत्वावच्छेदेन ताहृशानुत्पत्तिकत्वग्रहापर्यवसायेतिकार्यानुत्पत्तेः कारणासंबंधाभावप्रयुक्तत्वादित्याशयः स्सं
बंधांतरस्य· परंपरासंबंधादेः गौरवान्नेतिउपाध्यितत्वेपीत्यादि· शरीरगौरवान्नेमर्थः तथाग्रहे· सामानाधिकरण्या
तिरिक्तप्रत्यासत्त्यावच्छिन्नजन्यत्वस्यवन्ह्यनधिकरणादेरानुत्पत्तिकत्वस्यचग्रहेच न्हि जन्यइत्तित्वस्यादित्यग्रिमेणान्वयः
परिष्काराभिप्रायेणाहवन्ह्यनधिकरणेतिवेयर्थ्यमितिन याचताहृशग्रहोपयोगेपनतर्कस्यापिवैयर्थ्यमितिभावः
धूमत्वावच्छेदेन प्रथमेन एवन ग्राहाभावमभिप्रेत्याहप्रथमेचेति· विशेषान्वयव्यतिरेकस्यसामान्यव्यभिचाराति
रीयादिरूपसहकारिलाघवप्रतीसंधानादिव शास्त्रामान्यमविच्छेदेनजन्यत्वग्राहकत्वं ननु यत्नेविद्रहकत्वमितिद्वि

नीयेवत्वमारणारोते संभवेन प्रथमेद्वेत्युक्तं सामान्येनेतिमदुक्तदिशैवेत्यादि नाहधूमजन्यत्वम्नहेत्वन्यव्यापि सामानाधिकरण्य
प्रत्यासत्याद्वह्निजन्यत्वग्रहोपगमेव यथाश्रुते मेवेति तर्कस्येत्यादि यथाश्रुतत्वमेवेत्यर्थः प्रत्यासत्त्येति प्रत्यासत्याहिन्य
र्थः तर्कस्य यथाश्रुत नन्वेवं यथार्थमेवास्तामनुकूलत्वमैवनाहधूमजन्यत्वनहाहेतन आह सामान्येनेति स्वयमपि त्वयापि अव
श्येपनितथाद्वयत्रोभ गोरितिन्यायेनदोषपरिहारयोः साम्यं किं नाहयाद्यप्रत्यासत्याहिनिवेशाप्रयुक्तगौरवसहिष्णुतयेतिभा
वः तर्कातिरेतिधूमोयदिवह्निव्यभिचारीस्यादितर्कातिरेत्यर्थः लाघवादाहउभेजकेतिशंकेतिअवच्छेदेत्यादिग्रंथेत्यर्थः
तत्रेतिशंकासत्वेप्रवृत्त्यनुपपत्त्याविन्यर्थः वाध्याहितिप्रहेतेः शंकाप्रतिबंधकत्वाभावादितिभावः सैव प्रतिबंधकपक्षस्य
यथाश्रुततात्पर्यकत्वारहस्यणाप्रयुक्तेव असंगतिः अपकर्षः तद्यथाश्रुततात्पर्येति प्रतिबंधकपक्षस्य यथाश्रुततात्पर्येत्यर्थः नचे
वेतिव्यभिचारनिश्चयेशाहानुमितोरप्यनुदयादितिभावः अहेतुसमितितेनविनापीतिमूलोक्तमितिशेषः दर्शयितिउप
पादयतिव्यभिचारेणतिसाधानेनकोष्ठनुपपत्त्यादिनावायत्रसमएव व्यभिचारशंकाविरहस्तत्रव्यभिचारादितिभावः राम०

न्याये प्रादिति यावद्यथा पुरुषत्वव्याप्यकरादिमान् पुरुष इत्यादिदंडादौ क्वचादिप्रमात्मक पुरुषत्वविशेषदर्शनसत्त्वे पुरु-
षत्वप्रमात्मकयोरत्वाराहानुमाहाभ्यां व्यभिचारे यां विशेषदर्शनसमत्वासत्त्वेन यमात्र प्रमात्वरूपे किं तु पुरुषत्वत्तम
मावच्छिन्नप्रकारत्वरूपेन यावृश्मोयदृष्टाप्युक्तं नकोभासमसेवव्याप्तिप्रमात्मयोरस्मादानुमाहाभ्यां व्यभिचारे रात्तर्कस्य
व्याप्तिप्रमात्वमजन्यत्वरूपे सत्वासत्वेन सत्त्वकोदिमादि मूलस्याभिधेते किं तु व्याप्तितद्भाववद्विप्रोष्यकत्वरूपेरस्मा
स्वं इत्यर्थः अन्येपि वोध्यादि पदिसत्रापि यत्रव्याप्तिप्रमात्वावच्छिन्नं विशेष्यता संबंधेन अत्र विशेष्यतैत्यैव पाठः प्र
मात्वावच्छिन्नते प्रमात्वघटकत्वं अन्यद्वान्वेनाहश्याविशेष्यतासंबंधेनेव हृति अन्यथाविशिष्टविशेष्यताया अनु
गतानाद्दशाशासंगतेः इत्यैवमिति इदमुपलक्षणं यत्र व्याप्तिप्रमात्वावच्छिन्नं प्रमात्वघटकविशेष्यतासंबंधेन तत्र
लाभाभावो व्याप्यभाववद्धिंद्रियसंनिकर्षोविमेयवमित्यपि द्रष्टव्यं तत्प्रमात्वामिति अलौकिके त्यादि व्याप्त्यादि प्रमायामित्य
र्थः तस्य साध्यादेः लाघवादिति प्रथम इत्यादिः संयोगेनेति द्वितीय इत्यादिः आह उभयत्र युक्तिमाह तन्निर्वर्तकत्वेनेति

श्री. विशेषदर्शनत्वेनहेतुत्वे घृतसंयोगादिजन्ये गंधसंशयाद्युत्तरकुंकुमगंधादिप्रत्यक्षे व्यभिचारापत्तेरितिभावः व्याप्तिग्रमप्रहेतोः
६० तन्निरासाय· तर्कस्यापीति व्यभिचारशंकाप्रतिबंधकतया छावि घटकतयावेत्यादिः· तेन रूपेणाव्यभिचारज्ञाननिवर्त्तकत्वेन·
तस्यापि तर्कस्यापि तथात्वतर्कस्य तेन रूपेण सामान्यहेतुतायाः स्वस्वतयापत्त्या मानाद्योरिति भावेन व्यभिचारज्ञानोत्तरप्रमा
त्मकप्रमत्तानिरासायाहे व्यभिचारज्ञाननिवर्त्तकस्य तर्कस्यादिनापि शेषतोपि हेतुतातर्कस्याव्यशक्तित्तिसत्तर्काद्दित्यादि मूलस्य
यथाश्रुतार्थकत्वसंभवे अत्र येनादिनातात्पर्यविरोधेन मनुष्यितमितिभावः तादृशेति प्रमात्वघटके प्रपर्य्यः अभावविन्ने कोटीति
तन्वादि प्रपर्य्यः पुरुषत्वावि शेषणस्य पुरुषसंवद्धस्याभावविकल्पादिति भावः कार्यतानवच्छेदकत्वादिति उक्तमिति शेषः
शंकेतिकारणत्वशंकेत्यर्थः तत्र कार्यकारणभावे-असंगत इति तात्त्विकस्य प्रमाणसापेक्षत्वादिति भावः शंकाप्रतिबंध
इतिविशेषदर्शनतयेत्यादि अनुयोगस्य प्रश्नस्य· असंभवादिति प्रश्नोत्तरभावविरहादिति भावः इतिग्रंथस्वरसादिति
मूलग्रंथानुपपत्तेः परार्थेतीति एवं च स्वरूपसतस्तर्कतानादिसिद्धत्वस्य प्रयोजकत्वेपि नक्षतिरिति ध्येयं· न प्राप्तमिति प्रमाणा राम॰

प्रसक्ता संगतिं परिहरति तथा चेत्यादिना· अर्थापन्नेत्यादिरिति तथा चानुमानत्वादित्यनेनानुमानस्य व्याप्तिग्रहमूलकत्वेन
यद्दर्शनवत्त्वस्यात्र स्वव्याप्यादर्शनं न स्मरणेन न संभवतीति भावः पक्षेतरत्वस्यापि पक्ष एवेति शेषः संभवतीति तथा चोक्तस्य
त्व एव पक्षेतरत्वस्योपाधित्वासंभवेनानुमानप्रामाण्यानानुमानमात्रोच्छेद इति भावः अनिश्चितेतीति तथा च दृष्टाधितावनि
श्चिते साध्यवैकल्यादित्यत्र एकोऽग्रयः पक्षे साध्यानिर्णये ऽनुमानवैकल्यादिति निश्चितसाध्यपक्षके सर्वत्र संभवित्वा
दिति योजना· न चानुमानवैकल्येपि तदनुमानस्यैवानुच्छेदान्नानुमानमात्रोच्छेद इत्यत आह एवं चेति नैव· साध्यव्यापक
त्वे सतीत्याद्युक्तरूपेणोपाधेः उक्तत्वादिति साध्यव्यापकत्वेनेत्यनेन साध्यव्यापकत्वस्य तद्व्यतिरेकान्यत्वहेतुत्वस्यानेन च साधनाव्या
पकत्वस्योक्तत्वादिति भावः यद्व्यभिचारेण व्यापकत्वं तद्व्यभिचारानुमितिस्वरूपयोग्यत्वेन देहदशरूपेणोपाधित्वे न तत्संदे
त्वेपि नानुमानमात्रोच्छेद इति न हि वयमित्यादि मूलासंगतेरतो व्याप्यवृत्तेर्व्यभिचारेति उपधायकत्वेन· उपधायकव्य
भिचारप्रतियोगित्वेन· एवं चेत्यादि· तथा च पक्षेतररूपेणोपाधित्वेन दूषकत्वमयोग्यत्वे तद्वानुमानमात्रोच्छेद

दी॰ ९१

इति सव्यभिचारानुमित्युपधायकत्वगर्भमुपाधित्वमेवासंभवि तत्रापि पक्षेतरत्वोपाधेः संभवादित्युपाधेर्न दोषस्समिति पूर्व
पक्षस्संभवतीतरदेव नेमाशयः तस्येति एवं च मूलेन तत्रेति पाठे विषयत्वर्थे सप्तमी मूलार्थः न हि व्यभिचारादिमूलार्थः मूले
साध्यव्यावर्तकेन येतितन्मात्रमस्येत्यादि पक्षवृत्तिर्यत्साध्यव्यापकस्तेन प्रकृते तस्य पक्षेतरत्वस्य व्यतिरेकेतत्तन्मात्रमस्येत्यर्थः प्र
तिबंधकतयेति तत्त्वे च न ह्यभावसाध्यवत्तातानमुद्रयेति भावः व्याप्यत्वमेवोपपादयति मूले साध्यकसातिरेकरणेति यावत्सत्त्र
तिपक्षोत्थापकत्वेनोपाधेर्दोषकत्वमिति ध्येयं प्रतिकूलतर्केति साध्यं यदि पक्षेतरत्वनिष्ठव्यापकतां कस्मात् न स्या॰ति
व्याप्ततार्थनिरोधियास्य पक्षविशेष्यकज्ञानसामान्यकं स्यादित्याकारकप्रतिकूलतर्केत्यर्थः अनुमानखंडेति किंचिदंशभाग
नेति शेषः ॥ ॥इति श्रीमन्महादेवरचितायां सव्यभिचारप्रकरणभवानंदीव्याख्यायां तर्कदीपव्याख्या॥ ॥ श्रीरस्तु॥ ॥
इत्येव पाठ इति एवकारेणादिपदघटितपाठव्यवच्छेदः तत्परित्यागस्याभावादिति भावः इत्यपि पाठ इति क्वचित्पुस्तके प्रती
तिशेषः तत्र नादरणपाठे असंभवतयेति लक्षणस्येत्यादि असंभवितयेत्यर्थः नहि शेषरतास्येति साध्यतावच्छेदकसंबं राम॰

धावच्छिन्नत्वविशेषणतास्वेमयर्थः क्वचित्स्वपपाठः नचतत्राद्विनिष्वादिपाठोस्ति· तत्रापपाठइत्यस्मादिपद्यपरित्यागाभा
वादितिशेषः वस्त्वाद्यभावमादायासंभवतया समवायेनवन्ह्याद्यभावमादायसाध्यतावच्छेदकसंबंधघटितप्रतीयोग्य
सामान्याधिकरण्यविशेषणस्यासंभवितयातादृशाभावितस्यासंभवितयेतियावत् तद्विशेषणतास्वतद्विशेषणतासेवसा
ध्यतावच्छेदकसंबंधघटितप्रतियोग्यसामानाधिकरण्यविशेषणतास्वेवेतियावत् एवकारेणसाध्यतावच्छेदकसंबंधावच्छि
न्नत्वव्यवच्छेदः अभावावच्छिन्नाइतितत्कालावच्छिन्नविशेषणतया भावविशिष्टाइत्यर्थः इदंचव्यभिचारस्थलेपितादृ
स्वरूपसंबंधेनाभावविशेषणतानतयाचप्रतीयोगिसामानाधिकरण्यस्योपस्थितावनुपस्थितौवतानुमित्यनुपपत्तिरिति
भावः यावंतइतिइदंचव्यभिचारस्थलेपितादृशयत्किंचिदभावप्रतियोगितानवच्छेदकत्वग्रहादनुमितेर्वारणाय· तादृशाः
हेतुसमानाधिकरणाः तत्पुरुषीयानुमितौ· तत्पुरुषीयतत्कालीनानुमितौ· ज्ञानासंभवादिति· सामान्यघटितविशे
षणतानिरूपस्य सामान्याभावबुद्धिविरोधित्वादितिभावः ज्ञानासंभवादितितयाचप्रतियोगिसमानाधिकरणत्वेना

दि

दी. ९२

नाज्ञायमानत्वविशेषणानिष्फलमितिभावः येनकेनचिद्रूपेणेतिनचैवं प्रमेयत्वादिनाज्ञाताव्याप्यभावग्रहेप्यनुमित्या
पत्तिरितिवाच्यं स्वावच्छिन्नप्रतियोगितासंबंधेनावच्छेदके यत्किंचिद्रूपे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कत्वस्य घटितत्वस्य निवेशात् इत्यापत्तीतिअनुमितिप्रसंगइत्यादिः तादृशापद्यर्थज्ञानेतिव्याप्तिज्ञानाकारेत्यर्थः नचै
तोनितव्याप्यप्रतियोगिसमानाधिकरणत्वेनाज्ञायमानाहेतुसमानाधिकरणत्वेनज्ञायमानायावंतोभावास्तत्प्रति
योगितावच्छेदकत्वस्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वघटितरूपेणभावस्यग्रहेहेतुरितिभावः न
प्रतियोगित्वेतिहेतुसमानाधिकरणत्वेनज्ञायमाननिखिलाभावप्रतियोगित्वेत्यर्थः प्रमेयधूमसामानाधिकरण्यप्रमेये उ
क्तरूपेण वह्निमत्वानवच्छिन्नप्रतियोगिताकत्वेन तादृशाभावेतिधूमसमानाधिकरणत्वेनज्ञायमानवत्स्वभावेत्यर्थः त
थाचतदाहत्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिलाभावप्रतियोगितानवच्छेदकत्वग्रहासंभवइति
भावः एतदधिकरणेतिएतच्छब्देनयत्रधूमाधिकरणेरासभत्वस्यपरिग्रहः तेनतसमन्वारोपेणतस्योपपत्तिः तत्संग्र रा०

हेतित्यधिकरणांतरवृत्त्यभावप्रतियोगिहेत्वर्थः तथा च तादृशसाध्यमोत्पादेयीत्यनेनाभिमतस्य धूमाधिकरणेतद्वृत्तिनि
खिलाभावप्रतियोगितानवच्छेदकत्वयमोत्पादस्यासंभव इति भावः ३ हे अनुपपत्त्यंतरमनेनेत्यादिवह्निमात्रानुप
पत्तेराह इत्थं चेति अधिकरणेति धूमाधिकरणेत्यर्थः इत्युक्त इति तावतापि वह्निमात्रानुपपत्तिवारणासंभवादिति भा
वः इत्थं अधिकरणांतरस्येत्यादिरूपेण धूमाधिकरणेति तद्धि एतदधिकरणनिष्ठाभावानामेव धूमसमानाधिकरणा
त्वेन तानादि इति भावः एतद्वृत्त्यभावेति एतद्वृत्तिनिखिलाभावेत्यर्थः एवमग्रेपि ममोत्पादेयीति अग्रेत्यादावेतानादिकं
विनाव्यभिचारिलिंगकानुमितेरपि भ्रमजन्यत्वनियमेन तत्समाधानुमितेरसंभवसूचनापरमात्वमुक्तेस्मरणादी
ति अस्मिन्पक्षे तदपरिग्रहः अनुमित्यापत्तिरिति अयं दोषः स्यात् अभावे धूमसामानाधिकरण्यभ्रमाभावदशायां वो
धः एतेन धूमाधिकरणांतरानुपस्थितावित्यस्य धूमाधिकरणांतरस्याभावनिष्ठवह्नित्वनिरूपकतयानुपस्थिता
वित्यर्थकरणेन तदधिकरणे धूमाधिकरणे तन्महानसे तत्र वह्नेर्निरूपितेन पहतनाया असंभवादाह पहतेत्यादि इति नि

१३

185

दी·

93

व्याप्यभाववद्वृत्तित्वाभिप्रायः भ्रमज्ञानात्मकपरामर्शं विहाय स्मरणाद्यात्मकपरामर्शपर्यन्तानुसरणबीजमाह सामान्य
लक्षणायेति यद्यप्येकैकधूमवत्त्व सामान्यलक्षणयापि धूमाधिकरणान्तरोपस्थितिसंभवादिति भावः अधिकरणान्तरेति धूमे
त्यादिः तत्तद्धूमाधिकरणान्तरानुपस्थिताविति इत्यादीति आदिना प्रमेयत्वादिनाधिकरणान्तरोपस्थितिसंभवेन तद्विरह
मिश्रस्य परिग्रहः महानसइवेति पाठः अनुमितावितीति पर्वतादावित्यनुषज्यते एवं मन्ते संदेहदशायां तत्र तत्राव अभा
वस्यापीति हेतुसमानाधिकरणत्वेन निश्चीयमानस्य साध्याभावविशेषणत्वे तु गौरवादिकं द्रष्टव्यं तत्प्रतियोगितावच्छेदक
त्वात् महानसादिवृत्तिवह्न्यभावस्यापि हेतुसमानाधिकरणत्वेन ज्ञायमानतया तत्स्य धूमाधिकरणे तन्महानसवृत्तित्वेन परिग्रहा
संभवादिति भावः दीधितावेव मितिवह्न्यभाववद्धूमसमानाधिकरणप्रभ्रमदशायामिति दोषः व्याख्यायां धूमवतीति
न त्वावेत्यादि· इतरेषां तु घटाद्यभावानां तु उक्तरूपेण· अमुक्तप्रतियोगिकात्यन्ताभावादिरूपेण व्यभिचारज्ञानदशायामपि· वह्नि
त्वे धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकमिति भ्रमकालेपि· तेन रूपेण व्युत्क्रमप्रतियोगिकात्यन्ताभावादिरूपेण· ३ राम०

ग्रहणमिति तदानीं वह्नित्वधर्मसमानाधिकरणमुक्ताभावप्रतियोगितावच्छेदकत्वग्रहसंभवादिति भावः । नन्वेवं दोषः उ
भयोरेव वह्नित्वेनरूपेण प्रतियोगितानवच्छेदकत्वस्य दुर्ग्रहत्वस्योदोषः उक्तत्वाभावज्ञानदशायामिति सामान्यतो वि
हाय उक्तत्वाभावभ्रमदशायामित्युक्तौ किं बीजमत आह वह्न्याभावेति वह्नित्वावच्छेदेन सर्वः उक्तत्वज्ञानदशायामपि ।
उक्तत्वसंदेहदशायामपि । वह्नित्वावच्छिन्नाभावस्य उक्तप्रतियोगिकत्वसंदेहोऽप्यपकृष्टत्वे इति शेषः । तत्स्यैव ताद
शासंशयापसामग्रीसत्त्वे च । निरुक्तानिश्चयासंभवादिति संशयसामग्र्याः प्रतिबंधकत्वादिति भावः । सामग्रीति संशये मादृग् प्र
मपर्येति तित्याद्युक्तमपदं निरुक्तपरमिति भावः । द्वितीयाद्याभावानामिति अत्र प्रतियोग्यसामानाधिकरण्यघटिता
घटितान्यभिचारयेरनवच्छेदकमित्यत्र अभ्यन्तान्योन्याभावविवक्षाभेदेन वानुपपत्त्याभिमिति नव हु वचनानुपपत्तिरिति ध्ये
यं तानमेवेति एवकारेणाविषयत्वावच्छेद । नहीति हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबुद्धिं प्रति ः प्र
तिबध्यतावच्छेदकत्वादिति हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहत्वस्यैव प्रतिबध्यतावच्छेदकत्वा

२८

१८७

टी ९५

दितिभावः अतिप्रसंग इति तादृशज्ञानस्य वह्नित्वविशेष्यकघटप्रकारकग्रहत्वावच्छिन्नंप्रतिविरोधित्वादिति भावः घटकीभूते
ति घटकत्वं च भेदस्याहि इति भावः भेदसाधारण्येन प्रतियोग्यसामानाधिकरण्यघटितानवच्छेदकत्वग्रहसंग्रहः विषयिता
वच्छिन्नेति तादृशविषयिताशालिग्रहत्वपर्याप्तावच्छेदकताकेत्यर्थः तेन हेतुसमानाधिकरणाभावस्याभावे नग्राभावप्रति
योगितावच्छेदकत्वत्वावच्छिन्नविषयकग्रहत्वावच्छिन्नप्रतिबध्यता या अपि अधिकं त्विति साये न तादृशविषयिताव
च्छिन्नतया तन्निरूपितप्रतिबंधकताभावाय तन्नादृशानवच्छेदकत्वग्रहेति प्रसंगः विरोधित्वस्येति विरोधितावच्छेदकता
पर्याप्त्यधिकरणविषयिताशालित्वस्येत्यर्थः तेन विरोधित्वस्य विरोधितावच्छेदकधर्मविशिष्टरूपतया तादृशज्ञानत्वमादा
यनातिप्रसंगः वह्नित्वविशेष्यकत्वं वह्नित्वविशेष्यकग्रहत्वं घटितत्वस्य नु च्छ्वि विशेषणत्वभ्रमनिरासाय तादृक्सामान्य
घटितेति प्रतियोगितयेति विशिष्टस्याहि नीलो घटोस्तीति नीलघटवह्निमित्यर्थः तादृशावच्छेदकत्वप्रकारकेति अत्र प्रका
रतास्वरूपसंबंधावच्छिन्नाप्रामाण्येनतादात्म्येनावच्छेदकत्वप्रकारकग्रहमादाय तादृशावच्छेदकत्वाप्रामाण्याभावग्रहेनातिप्र राम

संगः तादृशावच्छेदकत्वं चेत् तादृशावच्छेदकत्वेन तादृशावच्छेदकत्वस्याभानादित्याशयः अभावप्रकारेणेति अत्रा
भावेनेति स्वरूपकथनं न तु तन्निवेशोपि इतरप्रकारतायाः तादृशप्रतियोगिताकत्वसंबंधेन किंचित्प्रकारतानिरूपितत्वाभा
वेनैव वारणादिति ध्येयं यद्भावप्रकारकत्वमिति अत्राप्यभावेतिपदं तदभिप्रायेणान तु विवक्षितं प्रयोजनाभावात् अत ए
वानुपदं तत्र हीत्यादिना व्याप्यप्रकारकत्वस्य प्रतिबंधकतावच्छेदकत्वाभिधानमपि संगच्छते तद्भावव्याप्येति तद्व
व्याप्यवत्ताबोधेत्यर्थः प्रकारकत्वस्य व्याप्यप्रकारकत्वस्य अतिप्रसंगादिति तत्र वह्निव्याप्यत्वनिष्ठविषयतानिरूपिताभा
वप्रकारकत्वस्य प्रतियोगितासंबंधेन व्यापकत्वावच्छिन्नप्रकारकत्वावच्छिन्नत्वादिति भावः अप्रामाण्यप्रसिद्धेति अनाहा
र्यत्वस्याप्यप्रसिद्धेत्यर्थः न हि रोधित्वेन तन्निश्चयत्वनिष्ठतानिरूपितप्रतिबंधकत्वेन ज्ञानद्वयेति प्रतियोग्यसामा
नाधिकरण्यघटिततद्घटितज्ञानद्वयेत्यर्थः इत्यपि ज्ञानमिति अपि नाम तादृशवह्नित्वं तादृशप्रतियोगितानवच्छेदक
मिति ज्ञानपरिग्रहः अनुमित्यापत्तिरिति यथा तद्विषयविषयकस्य वह्नित्वावच्छिन्नविशेष्यकतादृशप्रतियो

टी. 95

गीतावच्छेदकत्वप्रकारकग्रहस्य विरोधितया तादृशावन्हित्वं तादृशप्रतियोगितानवच्छेदकमिति ग्रहात्तादृशानुमितिस्तथानि
रुक्तग्रहस्य विरोधितया वन्हित्वं तादृशाप्रतीयोगितानवच्छेदकमिति ग्रहाद्द्विताद्दृशानुमित्यापत्तिरिति भावः तादृशसाध्य
तावच्छेदकेति तादृशसाध्यतावच्छेदकतापर्याप्त्यधिकरणेत्यर्थः यथाश्रुते विशिष्टस्यानतिरिक्ततया पूर्वोक्तापत्तेरवारणा
त् इत्यादिग्रहस्येति आदिना वन्हित्वं प्रतियोगितानवच्छेदकमिति ग्रहपरिग्रहः एवमग्रेऽपि संबंधेति साध्यसामानाधि
करण्येत्यर्थः तेन अभावप्रतियोगितावच्छेदकत्वग्रहाविरोधित्वमुपेक्ष्य तादृशाविरोधित्वादरण· प्रतियोगितानवच्छेदक
त्वादिनामिति आदिना समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वपरिग्रहः निरासइति प्रत्यक्षाविरोधित्वोक्ताव
भावप्रतीयोगितानवच्छेदकत्वप्रतियोगितानवच्छेदकत्वग्रहनिरासेऽपि वह्निमदभावप्रतियोगितानवच्छेदकत्वादिग्र
हनिरासोन संभवतीत्यवरमाविरोधित्वोक्तौ तु स संभवति तस्य समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रह
विरोधित्वादिति भावः असंग्रहइति तस्य समानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधित्वादिति भावः ॥ राम०

188

धारणापि इति समूहालंबनेप्रकारभेदेन विशेष्यताभेदाद्धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वप्रकारतानि
रूपितविशेष्यत्वं निरुक्तावच्छेदकत्वसंभवादिति भावः साध्यसमानाधिकरणहेतुमत्तावगाहित्वस्य स्वातंत्र्येणानिवेशे
नापि वह्नित्वं धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति ज्ञानवारणासंभवतीत्याशयेनाह समूहालंबन
ज्ञानादेर्यौति व्याप्तिलक्षणोपीति अपिनाकारणीभूतज्ञानविषयतावच्छेदकसमुच्चयः तद्विशेषणामिति न व्याप्यतान्यो
न्याभावघटितेतल्लक्षणेलाघवमितिभावः एतदिति लाघवमित्यर्थः तादृशसंबंधताभावेति साध्यतावच्छेदकसंयोगसं
बंधावच्छिन्नप्रतियोगिताकविषयत्वादिना वह्नित्वज्ञानात्यंताभावेत्यर्थः प्रतियोगितावच्छेदकतयेति संयोगेनव
ह्निसाध्यके व्याप्यत्वेति शेषः तादृशावच्छेदकत्वस्य तादृशप्रतियोगितावच्छेदकत्वस्य निष्कृष्टयोर्विशेषणा
नाविशेषेणाहेतुमान्निष्ठाभावप्रतियोगितासामान्ये विशेषणानाविशेषेणासाध्यवान्निष्ठाभावप्रतियोगितानवच्छे
दकावच्छिन्नघटत्वाभावघटितानां लाघवमिति अन्योन्याभावगर्भाणामित्यादिः नचविशेषणानाविशेषेणानिवेशादेव

लाघवमिति वाच्यं तन्न्यायमते साध्यवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकतानवच्छेदकावच्छिन्नत्वाभावनिवेशेन लाघवा
भावात् अथवहितो नरत्वस्यापि तन्न्यूनवृत्तित्वघटितत्वादाहतन्न्यूनवृत्तित्वंवेति यद्रूपमिति यद्रूपपदार्थ इत्यर्थः अन्यपदेति
अत्यंताभावान्योन्याभावयोरित्यादि नन्वतिरेकिरूपापि साध्याद्यभावसामानाधिकरण्यस्य हेतावभावेन तद्ग्रहस्यान्यतरस्यासंभ
वेति केवलान्वयिस्थले चेति विशिष्योक्तिरसंगतेत्यत आह व्यतिरेकीत्यादि प्रसिद्धमिति साध्याद्यभाववद्वृत्तिपदार्थ इत्यादि
न संभवतीति साध्याद्यभावविशिष्टं यच्च साध्याद्यभावभावस्यैवाप्रसिद्धत्वादिति भावः उक्तमिति केवलान्वयिस्थले चेति विशि
ष्योक्तमित्यर्थः प्राचीननये यत्नमत्वयोरनुगमादाह एवमिति व्याप्यादिघ्नादृत्तमिति तत्र यच्च साध्याद्यभावसामानाधिक
रण्याभावस्याप्यवतादिति केनातिप्रसंग इति भावः अत एव समानप्रकारकत्वेन विरोधित्वादिव ज्ञानानुगममिति पूर्वो
पदर्शितमिति शेषः असंगत इति एवकारेणात्यंताभावगर्भव्याप्तिव्यवच्छेदादिति भावः लक्षणायेति लक्षणावव्याप्तिप
देऽन्योन्यपरे वा उचितमिति संदेहे लाघवस्यैव निर्णायकत्वादिति भावः अप्रसिद्धेरिति समूहालंबनत्वस्य प्रतियोगिताम राम०

वच्छेदकत्वादिति भावः ननु नाहत्याद्यवगाहित्वप्रसिद्ध्यर्थमेव समूहालंबनपर्यन्तानुसरणमत आह लाघवादिति अत्रेष्टा
पत्तिमात्रं काहनवेति· न च पितादृशाहेतुत्वमपि· अवच्छेदकतायां व्यासज्यवृत्तित्वे विनिगमनाविरहाभावादाह गौरवे
रणं चेति लाघवात् शरीरलाघवात्· उपस्थितिलाघवमप्याह प्रथमेति प्रातिस्विकरूपेण हेतुत्वे व्यभिचारादाह विभिन्ने
तिसमाधानग्रन्थं जनज्ञानमनुपनीतममयीत्यादिग्रन्थं तात्पर्यविषयमिति हेतुधर्मिकसोपाधित्वज्ञानस्य व्याप्तिधीविरोधित्वे
ननस्वरूपस्येत्यादि यव्याख्यातं मूलत्वरूपस्योपाधिधर्मिकसाध्यसाधकत्वादिज्ञानस्याभिन्नधर्मिकत्वमपाहेतोर्व्याप्तिग्रह
विरोधित्वस्यासंगतिरेवं पूर्वपक्षे व्यभिचारज्ञानस्य व्याप्तिज्ञानाहेतुत्वस्यानुक्तेः नैन व्यभिचारज्ञानस्येत्यादि मूलमप्यनु
क्तं वांनमिवेत्यत स्समुद्दिश्य घटकार्थमनुसरन्नन्यथा व्याप्यवर्ती:पाधाय: विवक्षितार्थेन व्याप्त्यविषयीत्यादिना वक्ष्यमाणमर्थे
विवक्षितार्थमेवाह दोषिनोत यात्वेपीति उपाधिरितीति पाद्यहेत्वाभाससामान्यलक्षणे साक्षात्प्रतिबंधकत्वं च ज्ञानका
प्रतिबंधकत्वे सति न प्रतिबंधकत्वमित्यर्थ इति भावः व्याख्यायां अन्योन्याभावघटितेनेति न व्याव प्रतियोग्यनधिकरण

वृत्तित्वविशेषितात्यंताभावगर्भस्यासंग्रहः तत्र वृत्तिमत्ताया अप्रसिद्ध्या अप्रभावादित्तिभावः अतएव तद्वृत्तीतीति अन्योन्याभावघ
टितेत्यर्थः तथा च प्रतियोग्यनधिकरणत्वघटितस्यापि संग्रह इति भावः अन्योन्यं यत्रास्तं तागुरुके तिष्ठेनीति सिद्धान्त लक्षणोक्ती
त्येत्यर्थः गुणाद्यवच्छेदेनापीति तथा च संयोगिभेदे गुणे न संयोगिभिन्नत्वमित्यादि प्रतीती गुणादौ संयोगिभेद इति षु संयो
गिभिन्नत्वाद्यवच्छेदकत्वाभावविषयिणीति न तु गुणाद्यवच्छेदेन संयोगिभेदे संयोगिभिन्नत्वाद्यभावविषयिणीति भावः सं
योगिरूपेति वस्तुगत्या, संयोगिरूपः प्रतियोगी तन्निष्ठत्वादित्यर्थः तादृशेति प्रतियोगिपदं न्नीतार्थः नाव्याप्तिरिति सत्ता
वन्निष्ठप्रतियोग्यवृत्तिद्रव्यादिभेदप्रतियोगितावच्छेदक द्रव्यत्वादेः संयोगत्वविशिष्टसंबंधेनिष्ठत्वात् शभेदप्रतियोगी
तानवच्छेदकत्वेन संयोगत्वस्य पारिभाषिकावच्छेदकत्वादिति भावः अप्रसिद्धेरिति संयोगेन द्रव्यस्याव्याप्यवृत्तितया
संयोगावच्छिन्नतद्वृत्तेः स्याप्यव्याप्यवृत्तित्वादिति भावः तदनभ्युपगमे त्वाह प्रतियोगिपदं मीविवेय धर्मं चेत्तिसंयोगीसत्ता
दिमाहेति द्रव्यादिभेद माहायैवातिप्रसंगाभावाद्गुणवान् घटेरिमाहेत्वघ्नमादिभेदस्योपाताभावमादायधर्मत्वादिपारिभाषि राम०

कावच्छेदकरूपादेवातिप्रसंगाभावादित्याशयः पूर्वकल्पे संयोगेन द्रव्यस्य व्याप्यवृत्तित्वाभ्युपगमे संयोगेन साध्यता
यां साध्यतावच्छेदकस्यावच्छेदकत्ववारणाय तन्मध्ये दत्तसार्थक्यं संभवतीति एतत्कल्पे च तदभ्युपगमेऽपि न द्वैयर्थ्यमित्याशये
नाह सुतरामिति आहत्येवेति न यावत्पारिभाषिकावच्छेदकत्वस्यैवानिवेशेन नोक्तरीत्यातिव्याप्तिपरिहारसंभव इति
भावः व्याप्यवृत्तितेति अत्र व्याप्यवृत्तित्वं हेत्वधिकरणांतर्भाविनैव कथ्यते तेन संयोगाभाववान् गुणत्वादित्यादावपि प्रति
योग्यवृत्तित्वाप्रवेशात्संग्रहः अयमेव व्यावृत्तिपाक्षिलक्षणस्यादिः तेनानुमितिजनकज्ञानविषयतावच्छेदको
द्याउपदर्शितरीत्याप्रवेशेऽपि न क्षतिः नव्यापकं तद्व्यापकतावच्छेदकसाध्यतावच्छेदकावच्छिन्नत्वेन नाव्याप्तिः साध्य
केन हेतुः उभयत्र एतद्धर्मसामान्यमलक्षणे च संक्षेपं तेन स्वपदस्य साध्यपरतायां न व्युत्पत्तिभंगः अत एवात्र स्वसा
ध्येत्येव पाठः अन्यथा व्युत्पत्तिभंगापत्तेरित्यपि परास्तं संयोगी द्रव्यत्वादित्यादौ स्वसमानाधिकरणाभावप्रति
योगितानवच्छेदकद्रव्यत्वाद्यवच्छिन्नासंताभावस्य द्रव्यत्वाद्यधिकरणेऽसावयविनि सत्त्वेनाव्याप्तेराह प्रतियोगिताव

छेदकमानवच्छेदकरूपेणनिरूप्यपेक्षया व्यापकतावच्छेदकरूपघटितनिरुक्तलघुत्वापेक्षया लघुतरमिति व्यापकतावच्छेद
करूपघटितलघुत्वापेक्षया व्यापकरूपघटितेन लघुत्वस्य लघुत्वादिति भावः नन्वेवं व्यापकरूपघटितलघुत्वा
मेव। न चैतद्घटकत्वे व्यापकतावच्छेदकरूपविशिष्टत्वेन व्यापकरूपस्य प्रवेशेन पूर्वलघुत्वान्नलघुत्वं प्रत्युत गुरुत्वमे
वेत्यत आह इदं त्विति वस्तुकथनमिति व्यापकरूपस्य वस्तुगत्या व्यापकतावच्छेदकरूपत्वे विशिष्टत्वादिति भावः अने
न व्यापकतावच्छेदकरूपविशिष्टत्वेन। उक्तमेव निरुक्तव्यापकरूपघटितमेव। दीधितिकारेणास्मत्तौ न्यायादित्ता कालिक
व्याप्यवृत्तित्वे केवलान्वयिसाध्यकेः व्याप्तिर्दुर्ज्ञानत्वे दैशिकाव्याप्यवृत्तित्वे केवलान्वयिसाध्यकेपि ज्ञानाधीनमाऽ असम्भवाभाव
स्येति न दूषणम्। दैशिकाव्याप्यवृत्तित्वे केवलान्वयिसंयोगाभावादि साध्यकमुपेक्ष्य। अमत्र। कालिकाव्याप्यवृत्तित्वे केवलान्व
यिसाध्यके। दुष्टेषु काधीनत्वेनेति सार्वत्रिकत्वयोगादिसाग्नियेत्यन्वयः सार्वत्रिकत्वेजितप्यावस्यन्ति विषयत्वस्य संस्का
रविषयत्वस्य च केवलान्वयित्वं न सम्भवतीति तत्परित्याग इति भावः जन्यज्ञानेनीतीअत्र जन्यत्वाताभाविषयस्यामा रामं०

रीकत्वेन जन्यज्ञानविषयत्वस्य केवलान्वयित्वमिति ध्येयं सर्वदैवेति तथा च तस्य नाव्याप्यवृत्तित्वमिति न त्वपरित्याग इति भावः
अत्र ज्ञानपदं विषयत्वस्य ज्ञानस्वरूपत्वाल्लाभाय विषयस्वरूपत्वेन तस्याव्याप्यवृत्तित्वेनाव्याप्यवृत्तित्वासंभवादिति ध्येयं
जन्यद्रव्यस्य प्रलयकालासंबद्धतया तन्निष्ठाभावस्य तत्कालावच्छेदेनासंभवादाह व्योमादाविति स्वात्मकाव्याप्यवृत्ति
केवलान्वयिनस्सर्वव्यापकत्वासंभवादाह व्याप्यवृत्तिकेवलान्वय्यंतरस्येति प्रमेयत्वादेरित्यर्थः तदभावासंभवस्येति
गगनाभावाभावासंभवस्येत्यर्थः इदं चाप्रथमलक्षणाभिप्रायेण द्वितीयलक्षणे गगनाभावाभावसंभवेपि गगना
भाववद्वृत्त्यन्योन्याभावाप्रसिद्ध्या व्याप्तेर्दुर्वचत्वादिति ध्येयं वन्ह्यधिकरणेति पर्वतादाविति शेषः अव्याप्तेरिति स्वाधिकरणी
भूतयत्किंचिद्व्यक्तिवृत्तित्वानवच्छेदकविशिष्टावच्छिन्नप्रतियोगिताकेति लक्षणे तु गौरवापत्तिरिति बोध्यं गगनादिमद्भेदे एवं
तिश्चान्यभेदप्रतियोगितावच्छेदकानां हेत्वधिकरणतावत्प्रवृत्तितयान्यभेदस्य लक्षणाघटकत्वासंभवादिति भावः यत्किं
चिद्व्यक्तिसमवेतधर्मानवच्छिन्नप्रतियोगिताक इति पाठः यत्किंचिद्व्यक्त्यसमवेतधर्मावच्छिन्नप्रतियोगिताक इति पा

टी॰ ९९

ऽपि सम्बन्धार्थः द्रव्यद्वयस्यापीति गुरुत्वसाध्यके जातिसाध्यके चातिप्रसंगरूपेत्यादिः नियामकसंबंधेनेति समवायेन स्व
रूपसंबंधेन चेति शेषः संयोगानधिकरणत्वस्येति इदं चाव्याप्यवृत्तेरधिकरणतावप्यव्याप्यवृत्तित्वमिति निरूपणाशयेनः अन्तरा वेति
विशिष्टस्यानतिरिक्ततया विशिष्टसत्ताभावस्य गुणत्ववृत्तिप्रतियोगिकत्वाभावेपि गुणावृत्तितानवच्छेदकविशिष्टसत्ता
त्वावच्छिन्नप्रतियोगिताकत्वादिति भावः इतरथा तु साध्ये त्वहेतोः अतिव्याप्तेरपेक्षहेतोस्तु॰ नादृश्यानिरूपकत्वं स्व प्रतियोगि
निष्ठाधेयतानिरूपकत्वं॰ अन्यावच्छेदेन॰ प्रतियोग्यनधिकरणदेशावच्छेदेन॰ व्याख्याने॰ तादृशानिरूपकत्वस्याव्याप्यवृ
त्तित्वप्रसङ्गे नहि अव्याप्यवृत्तिज्ञापकव्याख्याने॰ तत्कल्पे॰ तादृशानिरूपकत्वस्याव्याप्यवृत्तित्वकल्पे॰ पृथक्शंकानुत्थाना
दिति न च यावत्तत्कल्पे एव पृथक्शंकानुदयेन पृथक्दोषदानासंगतिरिति भावः प्रथमे यावत् साध्यव्यापकव्यापककत्व
रूपानौपाधिकत्वे॰ स्वसमानेनेति अत्रावच्छेदकत्वद्वयमपहाय तादृशप्रतियोगितात्वव्यापकतादृशप्रतियोगिताव
त्त्वमित्यतिलघूपि नहृत्तो संभवतीति ध्येयं॰ अपेक्षाबुद्धिविशेषविषयत्वरूपं सर्वत्वं व्यापकत्वादन्यमनुवचमन अभिमान्यं राम॰

रिमितत्वनिरूपकेति अत्र परंपरया स्वनिरूपकत्वं स्वाश्रयनिरूपकत्वपर्यवसन्नं बोध्यं तेनाभाववत्त्वनिरूपकत्वस्य हेतुसा
मानाधिकरण्ये सत्वनिवेशनदोषो नेति ध्येयं न संभवतीति साध्यसामानाधिकरण्यमात्रस्यैव चालनीन्यायेन हेतुसा
मानाधिकरण्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वादिति भावः अभावस्याखंडत्वादिति तथा च हेतु
सामानाधिकरण्यस्य प्रतियोगितो भेदेपि न क्षतिरिति भावः इत्यतोपि एतादृशलाघवादपि॰ एवमभिधाने साध्यसामाना
धिकरण्याभावघटितलक्षणाभिधाने तनु यस्य त्योऽत्यन्ताभावघटितव्यापकत्वनिवेशाभिप्रायकमिदं लक्षणं तदा हेत्वधि
नो व्यापकतावच्छेदकप्रवेशात् संगतं इत्यत आह तादृशहेतोरिति हेत्वधिताविति आदि॰ ननु॰ लक्षणं॰ अतिव्याप्तिमिति संबंधसामान्ये
न वह्निसामानाधिकरण्याभाववति गगनादौ धूमसामानाधिकरण्याभावादिति भावः अननुगमत्वादिति पत्वतन्वप
र्यवसायित्वादिति भावः ॥ ॥इति श्रीमहादेवविरचितायां सर्वोपकारिण्यां व्याप्त्यनुगमव्याख्या ॥ ॥कार्यकारणभावग्रहे हे
ति व्याप्तिग्रहात्मककार्यं सामान्येनेत्यर्थः स्वमतानाह इति सामान्यममत्या सर्वोपसंहारादिति व्याप्तिग्रहोपायत्वं येनानुभूता

१५०

टी.

199

याः संस्कारसत्वादिति भावः समानाधिकरण्ययोरिति अत्र सामानाधिकरण्यं निरूपकताख्यपर्याप्तिसंबंधेन बोध्यं
तेन द्विवचनसंगतिः महानसीयवह्नीति व्यनुमितिं वेत्यन्तमेकोऽन्वयः वह्निपरामर्शत्वावच्छिन्नकारणताघटितलक्षणा
भिप्रायकः वाकारेणास्यायां तदुभयं तु समानाधिकरण्ययोरेव व्याप्तिरिति पक्षे पर्वतो वह्निमानित्यनिश्चितसाध्यकानुमि
तौ व्यभिचारेण वह्निपरामर्शत्वेन हेतुत्वस्यासंभवेन तत्कृतलक्षणाकरणत्वासंभवमीति उभयत्रैवेति कस्यभेदेनेतिशो
षः स्विवह्निमत्वं निर्दिवतेस्माहस्वेव स्वाव्यतिलक्षणस्यपस्यानुशासनादिति भावः इंद्रियसंबद्धे धूमादौ धूमत्वादिति षट्विशि
षणताया धूमाद्यनुवृत्तितयाऽऽधारसमवसंगतेत्यत आह समवायघटितेति तथा च स्वैविषयिकाधारसममीति भावः धूली
पटले धूमत्वस्याविशेषणत्वादाह विशेषणत्वमिति प्रकारत्वमितितत्पाचेंद्रियसंबद्धविशेषणताविरहिपितत्वानप्रका
रताशाल्येति पर्यवसितं तेन धूमत्वादिनि षप्रकारतापाधूमादावव्यच्छेदस्य लाभेन गौकारेपिनरूक्तेः बहुव्रीह्यापत्तिरिति
अधिकरणव्युत्पत्तिहि अत्र पाशिगरिस्वादिति पमभयोगविषयत्वादिति भावः परंपरेति तत्संबंधेत्यत्र तत्पदमिद्धूयप राम॰

रंज्ञानपदं चवह्निमारणारीत्यानहिरिंद्रियजन्यज्ञानपरंतथाचतस्सन्निकृष्टविशेष्यकस्यजन्यज्ञानप्रकारत्वमत्रपरंपरा
संबंधइतिभावः सैवेतीतितत्पाद्य सैवविशेषणतेत्यस्य सैवविशेषणतापद्यमानतिकाद्यंत्यर्थः तस्याविशेषणताप
द्यमानतिपाद्यत्वकथनंतुतांत्रिकाणांतादृशपरिभाषारक्षणायेतिभावः अत्रैवेतीति अत्रेदंबोध्यंहीयितान्वयस्यवहि
रिंद्रियेणएतज्जन्यज्ञानेजननीयेचेत्यर्थः लौकिकः संबंधइतिकारणतावच्छेदकीभूतसामान्यप्रकारकज्ञानविशेष्य
वहिरिंद्रियस्यलौकिकः संनिकर्षः ज्ञानसकारणतावच्छेदकीभूतसामान्यप्रकारकज्ञानस्यतन्हिंद्रियजन्यत्वमितिवहि
रिंद्रियजन्यत्वमित्यर्थः नियामकंकारणतावच्छेदकतयासहकारितयाचतत्पुरुषीयचक्षुः संनिकर्षविशिष्टविशेष्य
ताविरूपितायात्पुरुषीयचक्षुरिंद्रियजन्यज्ञानप्रकारतानवच्छिन्नविशिष्टधूमत्वात्वेनहेतुतात्पुरुषीयधूमत्वप्रकारकालौ
किकधूमचाक्षुषत्वेनकार्यतेत्यादिरीत्यापर्यवसन्नमिति वह्निः पदस्येतिवहिरिंद्रियस्यप्रत्यासत्तिलौकिकसंबंधतदिं
द्रियजन्यत्वनिवेशोनतुमनसइत्येतत्सूचकस्यवहिः पदस्येत्यर्थः एवंचेतीति एवंचेत्यस्यवहिरिंद्रियप्रत्यास

त्तोर्वर्तमानयोः कारणतावच्छेदकघटकतया मानसेऽप्यन्यज्ञानप्रकारसामान्यमात्रस्य प्रत्यासत्तित्वे चेत्यर्थः अग्रे मनः
संयोगसत्त्वेऽपि तत्तस्य लौकिकत्वं मनोजन्यत्वं व्यावर्तकमिति मनःस्थले लौकिकसंबंधमनोरूपेंद्रियजन्यत्वयोरनिवे
शे इंद्रियसंबद्धविशेष्यकत्वमपि ज्ञाने नानिवेशनीयमित्याशयः ज्ञानलक्षणानिरासार्थं ज्ञानलक्षणायाः सकलाका
गोचरमानसबोधनिर्वाहिनिरासार्थं यत्किंचिदितीति सकलाकाराप्राप्यितो सकलाकारगोचरमानसबोधस्य ज्ञानलक्षणा
येन निर्वाहादिति भावः वर्तमानस्येत्यस्य इति यद्यपि परम्परामित्यनेन तरमेवैतद्वाच्यं न तु मध्यम एव न पार्थिवद्वेतीत्यनेन स
चितास्य रसः परम्परामित्यंतर्भावेनेतिप्रमानिरासाय मध्ये तत्तद्व्यक्तिरिति ध्येयं संयोगस्थले संयोगजनितद्रव्यप्रत
क्षस्थले वहुमात्रेणेति तन्तुअनेवावहुधनिखिलद्रव्यसाक्षात्कारसंतानापत्तिरित्यर्थः अपेक्षणीयत्वस्य सहकारित्व
स्य अवच्छेदनेतदिंद्रियजन्यत्वादिविशेषणोपादानादि अतिप्रसंगेनात्कैवल्यादिनावहुमात्रेणातिप्रसंगेत्यर्थः वि
मितिज्ञानप्रकारसामान्यमेव प्रत्यासत्तिरस्तु किं तद्विशेषणेनेति भावः विशेषणेति परमाकस्यापीत्यादि कारणाद राम०

तित्वस्फुटप्रीत्यजिज्ञासाविषयतयाप्ययमत्तर इति शेषः एतेनेत्यादिनेति अत्र एतेनेत्यस्य इंद्रियसंबद्धत्वानि संविहाय तद्विशेष्य
कज्ञानप्रकारत्वस्य ज्ञानेनेंद्रियजन्यत्वस्य संबंधे लौकिकत्वस्य च निवेशेनेत्यर्थः अन्यथेत्यादि चक्षुर्मात्रानुशापादाह
धूलीपटल इति धूलीपटलस्य इत्यादेरप्यर्थः तेन धूमभ्रम इत्यादेरपि साधारण्यलाभः धूमीयत्वाग्रेति इदं च व्याप्तिवि
शेषवैशिष्ट्यावगाहिज्ञानमेवानुमितिहेतुरित्याशयेन ननु प्रथमोक्तक्रमेण विशेषणफलप्रदर्शनसंगते चिमेनकं च
त्यादिकमसंगतं तेन चरमोक्तक्रमेण विशेषणफलप्रदर्शनाद्यत्न तत्संगमयितुमाह चरमोक्तक्रमेणेति विशेषणे
ति चरमोक्तस्येत्यादि चरमोक्तक्रमेणैवेति केनचिद्विरोधेनाप्ययमपरिगृहीतत्वादिति सामान्याभावस्य संग्रहाय सिद्धत्वा
दिति भावः विशेषणान्तरयोरपि लौकिकत्वतदिंद्रियजन्यत्वयोरपि तद्ग्रहे तत्सामान्याग्रह इत्यर्थः ज्ञानमात्रमिति
लौकिकसंनिकर्षाविगमेयोग्यत्यादिकारणविरहितेन यावद्यापत्याद्यनुपस्थानात्पाग्रेर्न संभवतीति भावः ज्ञानादिनेत्यस्यापि
तिशेषः सामान्याभावेन इंद्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतसामान्याभावेन वह्निसंयोगी संयोगीत्विति संयोगे

९०२

२०३

ही.

नवह्निमत्त्विसंयोगेनहृत्त्वविमर्षः नानोभ्याप्नोसंयोगस्यसंसर्गतयाप्रकारत्वाभावेनासंगतेः सामानाधिकरण्येति
नयावयवर्तीयधूमेधूमव्यापकवह्निमद्वृत्तित्वरूपव्याप्तिग्रहासंभवइतिभावः अनेकेत्यादि अत्ररूपत्रितयादेरनुगत
त्रित्वाद्यवच्छिन्नस्यवारणायावच्छेदकांते नानाधिकरणमत्स्यासन्नघटादेरनेकवृत्तिनावच्छेदकत्वेनघटत्वाद्यवच्छिन्नस्य
वारणायानुगतरूपेति अनेकवृत्तित्वघटितं रूपावच्छिन्नमिति अनेककमितिशेषः तेनैकव्यक्तिवृत्तिघटादेर्व्युदासः अनेकवृत्ति
कमितिनतद्रूपादेर्वारणायहत्यंतं वह्निमत्त्वादेर्वारणायैकमिति नानेद्रतिसतिसप्तमीयं ननुसामान्यस्यस्वाश्रयस्य
वभासकतयाकालादेर्घटित्वानाश्रयतयाततज्ज्ञानमतआहतस्यपीतिन चैवंवह्निमानितिज्ञानोत्तरंसकलवह्निमतो
सामान्यजप्रत्यक्षानुपपत्तिःवह्नित्वस्यपरंपरासंबंधेनतत्राप्रकारत्वादतआहइत्यंचेति नतत्संबंधावच्छिन्नजनकतायां
तत्संबंधावच्छिन्नप्रकारत्वनिवेशोयस्यार्थः वह्निमत्त्वेतिनहाप्रत्ययवह्निमहाहाविमर्षः परंपरेतितदुक्तेत्यादिनानंतरमेव
निरवकाशत्वाद्वह्निमानित्यादिज्ञानस्यवच्छेदःसामान्यजत्वानामितिसकलवह्निमत्ताहोनामित्यादि नचैवंपरंपरासंबं रुम०

धेनवह्निमानवगाहि वह्निमानिति बोधानंतरं सकलवह्निमतां प्रत्यक्षानुपपत्तिरतआह वस्तुतस्त्विति ज्ञानस्यैवेति द्
रं च वह्न्यभावाराशीत्या सामान्यज्ञानं प्रत्यासत्तिरित्याशयेन सामान्यस्य प्रत्यासत्तित्वे नाहृतज्ञानप्रकारतावच्छेदकवह्नित्वा
वच्छिन्नस्य संयोगेन नाहृतज्ञानप्रकारतावच्छेदकवह्नित्वस्येव वा परंपरया हेतुत्वं बोध्यं ज्ञानस्येति इद मपि तात्पर्यप्रत्या
सत्तित्वे सामान्यस्य प्रत्यासत्तित्वे तान प्रकारवह्नित्वस्येति बोध्यं न या कथ्यमानत्वेऽप्यककार्यकारणाभावो तरकल्पनात् सर्वे
उक्तं वा त्वित्याद्विवह्न्यभावानुशयाद्याह स्वंदरुरवेति उक्तत्वेनेति सर्वं देवाख्यं द मैवेत्यादिनेत्याहिः परंपराघटकेति स्वाश्रय
प्रतियोगिकप्रागभावादिमत्त्वरूपपरंपरासंबंधघटकेत्यर्थः वा तुल्यमपदृष्टिनाये त्तितामदृशनं चाति परंपरया प्रत्यास
त्तस्यापि प्रत्यासत्तित्वमुत्पादनायेति भावः आदियदेयग्रासेन त्वेनमसमं आदियदेयग्रासेति । सपिपाठसद्भूति
रूपाद्यात्मकजम्यक्तित्वस्य त्वेरूपत्वादेरेव प्रत्यासत्तित्वमासामनतआह किंचेति नाहृत्य मितिवह्निरिंद्रियजन्यज्ञानहृतिथ्यो
यः सामान्यज्ञानं । सामान्यप्रकारकं ज्ञानं अत्रापि वह्निरिंद्रियसन्निकर्षः संबंधो ग्राह्यः तथा चैतन्मते तत्सुरूपापद्य

१३

टी·

205

113

हेतुः संनिकर्षविशेषस्तन्निष्ठविशेष्यतानिरूपितधूमत्वादिप्रकारताशालिचाक्षुषत्वादिना कारणता धूमविषयकालौकि
कचाक्षुषत्वादिना कार्यता मानसस्थले तु धूमत्वादिप्रकारकज्ञानत्वेनैव हेतुतेति बोध्यं नवीनमतमिति पूर्वकल्पे इंद्रियभे
देन पुरुषभेदेन च गुरुतरानंतकार्यकारणभावप्रसंगात् लौकिकसंनिकर्षस्य संयोगसंयुक्तसमवायादिरूपतया अनुगत
स्य सर्वसाधारणस्य लौकिकसंनिकर्षत्वस्यैकस्याभावाच्चेति भावः इत्थं च · सामान्यज्ञानमात्रस्य प्रत्यासत्तित्वे च · निर्विक
ल्पकात्मकमिति स्मरणात्मकमपि द्रष्टव्यं पर्वतो वह्निमान्धूमादित्यादिनोक्तेः पर्यः कथनमात्रमिति मात्रपदेन
निवेशाच्च वच्छेदः नचैवं घटत्वाद्यादिसामान्यासत्त्वे सामान्यज्ञघटचाक्षुषापत्तिः नह्यमीनादृश्यपालत्वादिसामान्यस
त्वादिना आहत्वाचारीति सामान्यान एव चाक्षुषापत्त्याद्यवच्छेदेनैव · स्वरूपकथनमात्रासद्विषमुराहत्वस्कमरिखितीति अतएवे
ति सामग्रीपदस्य फलोपधायकपरत्वे सामान्यज्ञानघटितस्यैव तथात्वेन तत्र सामान्यज्ञानातिरिक्तत्वरूपांतरत्वं न संभ
वति असाधारणपरत्वे तु नादृशानामालोकादीनां नादृशानांतरत्वं संभवत्येवेति भावः तेन रूपेण · आलोकत्वादिना रूप०

त्याशयेनैवेतिनत्वावतादृशालौकिकोषाभावादीनांतत्रहींद्रियजन्यत्वानंगीकारात्त्वंकृतमेवननुसामान्यप्रत्यास
त्तिजन्यत्वाने स्वातंत्र्येणाकारणत्वंकिंतुतेषांसामान्यप्रत्यासत्याफलजननेसहकारित्वमात्रमितिभावः अनुभवविरुद्ध
मितित्यावसुरभिचंदनमित्यादिवाह्यषेसकलसौरभादिभानापत्तिरितिभावः तद्दमीष्ट्रयेनिस्वातंत्र्येणत्याहि· वहूपमा
णारित्यैवानभिप्रसंगेस्वातंत्र्येणतादृशासामग्र्याहेतुत्वमेंफलमित्याशयेनाह वस्तुतस्त्वितिवाह्यषतान्यवारणायता
दृशातानस्यवाह्यषत्वावारणापत्तादृशात्वंमानसाद्येवनतुवाह्यषमित्यत्रनियामकत्वाभायेत्तियाभवत् सौरभत्वविशि
ष्टेतिवैशिष्ट्यंवैशिष्ट्यंवैलानिकंवाध्यंतेननतादृशासामग्र्याप्रसिद्धिनिवंधनोदोषः एवंसौरभमुख्यविशेष्यकेत्वत्रसौरभपदं
सौरभत्वविशिष्टपरंवैशिष्ट्यंवैलानिकंतेननतादृशवाह्यषाप्रसिद्धिनिवंधनोदोषइतिध्येयं अनतिप्रसंगेसुरभिचंदं
नमित्यादिवाह्यषस्यसकलसौरभादिविषयकत्वाभावसंभवेनलौकिकत्वस्यातिलौकिकत्वंनिवेशपतादृशावोधसामग्र्याः
स्वातंत्र्येणानहेतुत्वमित्यर्थः अनतिप्रसंगपेयपपादयतिसुरभिचंदनमितिसंभवात् संभवदुक्तिकत्वात्· तत्रनेसंभ

मित्युक्तसामग्रीस्वरूपकारणाभावादिति भावः चाक्षुषसामग्री चक्षुःसंयोगादिरूपा तत्सहकारी चाक्षुषः तत्र प्रसिद्धा तद्धर्मविशिष्ट
लौकिकचाक्षुषसामग्र्यप्रसिद्धा तादृशेति तद्धर्मं तद्धर्मिकारणत्वकल्पनादित्यर्थः तद्धर्मविशिष्टविशेष्यकेति तद्धर्मवत्सुखविशे
ष्यकेत्यर्थः एवमग्रेपि तद्धर्मस्यातीन्द्रियत्वादेव लौकिकचाक्षुषकारणतादृशालौकिकेति आपाद्यस्याप्रसिद्धेरिति यत्तु नापाद्या
प्रसिद्धिः तद्धर्मावच्छिन्नप्रत्यक्षापत्तेरेव चाक्षुषसामग्रीकाले तद्विशेषणत्वनियामकाभावकाले च तत्सुखविशेष्यकचाक्षुषपर्यव
सानादिति तद्घटितोपाधिवन्तं तं तद्रसत्वाद्यतीन्द्रियसुखविशेष्यकप्रत्यक्षेपि विरोधिचाक्षुषादिसामग्र्यभावहेतुत्वेन तद्घटितोपाध्य
यतेः तत्सुखविशेष्यकप्रत्यक्षे च मानसमेव प्रसिद्धं एतदभिप्रेत्यैवाह दिगिति प्रतिपत्तव्य इति प्रत्नोपन्निम्र सौरभादिमिन्नास्थि
रत्वादुपपत्त्या आपाद्यत्वादिति याचोपगत्वस्याहेः तस्याऽनासंभवादिति सौरभत्वस्याऽनासंभवादित्यर्थः यत्तु सौरभत्वस्याऽनात्मकसा
मान्यलक्षणाजन्यतावच्छेदककोटौ सौरभत्वप्रकारताया अपि निविष्टतया सौरभत्वसामान्यलक्षणात एव सौरभत्वभानसंभवान्
चेति तद्रसत् संनिकर्षस्य विषयप्रत्यासन्नत्वेव हेतुतया सौरभत्वस्य स्पर्शविषयसौरभत्वायत्तनत्वविषयनिष्ठप्रत्यासत्त्यभावात् राम॰

208

त्वासौरभत्वेऽभावेन सामान्यलक्षणातो निर्वाहस्याशयात् नन्वेवमपि सौरभत्वपर्यन्तानुधावनं व्यर्थं अपेक्षणीयायाः सौरभ
त्वप्रकारकचाक्षुषसामग्र्या अभावेन सौरभस्यापि सौरभत्वसामान्यलक्षणातो भानासंभवादिति आह नवमतइति पूर्वोक्तयुक्त्या
वक्ष्यनरित्यादिनोक्तयुक्त्या· विशेष्ये· प्रकारसाधारणविशेष्ये· अनपेक्षणादिति सौरभमुख्यविशेष्यकचाक्षुषं प्रमेव सौरभमां
शेऽलौकिकचाक्षुषसामग्र्या हेतुत्वस्योक्तत्वादिति भावः नन्वावगाहिस्मरणमूलके उपनीतभाने शुक्तिवृत्तितात्मकधर्मस्य ज्ञाने
न सामान्यलक्षणयैव शुक्तिभानसंभवतीत्यत आह प्रमुखतत्ताकेति संयोगात्मकेत्यादि अत्र निर्विकल्पके व्यभिचारवारणाय प्रथ
मभजन्यांतं तानलक्षणाजन्योपनीतभाने न द्वारतायद्वितीयं अपरापरेति घटत्वाद्यन्योभयानिरितत्वं निवेशपदघटत्वाद्यन्यतस
न्वेतत्त्रितयानिरितत्वादिकं निवेशयन्नर्थः ननु एवमपि घट इति लौकिकप्रत्यक्षस्यालौकिकप्रत्यासत्तिसाध्यप्रत्यासत्त्युभयजन्यत्वा
पत्तिरत्र घटापत्तिमाह घटस्य निर्विकल्पकेति तद्दूरहतीति सामान्यप्रत्यासत्तिजन्यज्ञाने व्यभिचारवारणाय प्रकारकांतं निर्विकल्पके
तद्वारणाय जन्यांतं तन्त्रावगाह्युपनीतभानस्य तत्ताद्रूप्यसामान्यप्रत्यासत्तिजन्यत्वमेवेत्याशयेनाह प्रमुखतत्ताकस्येति ना

१०५

शो.

209

105

संग्रह इति पदस्य स्वकालिकसंबंधेन मद्वृत्तत्वविशिष्टतयोल्लिख्यमानस्य कालिकसंबंधेन तद्वृत्तिपरत्वात् प्रकारकत्वादिति भावः
शाब्दानुभवशाब्दस्मरणयोरिति परस्परमिति शेषः अगृहीतग्राहित्वापत्तिः तन्मते न प्रमात्वापत्तिः तन्मते ऽगृहीतग्राहित्वस्यै
व प्रमात्वलक्षणत्वादिति भावः कश्चिदिति लाघवात्पदज्ञानत्वेन हेतुत्वं न तु गुरुणा पदार्थस्मृतिव्यापारकत्वेनेत्यस्वरसः उभयोः शा
ब्दानुभवशाब्दस्मरणयोः न द्वैविध्यमिति गवादिपदेष्वपि विशिष्टत्वेनेति शेषः इष्टापत्तिरिति तथाच शाब्दानुभवशाब्दस्मरणयोः पर
स्परं कार्यकारणभावो नत्वं यद्धेतोऽभिमतः अपि तु प्रथमपदशाब्दबोधप्रकारत्वे समानप्रकारकत्वेनैव ग्राह्यतेऽत्र इदमिति
भावः प्रमत्वापत्तादिति गौगौर्य इत्यादौ तिरस्कृतज्ञानस्यैव गोत्वप्रकारकशाब्दबोधसमानप्रकारकतया तत्स्वघटकशक्याभाववत्त्वा
मौ शक्तिप्रकारकत्वादिति भावः एतेनेत्यादिव्याख्यामाराद्देयाद्दाह जातिविषयत्वेनेत्यादि गोत्वप्रकारकशक्तिज्ञानत्वेनैवेति एव
कारेण सन्निविषयकत्वे शाब्दबोधप्रयोजकत्वव्यवच्छेदः तथाच शक्तिग्रहे विषयिततया पदस्य शाब्दबोधप्रयोजकत्वं तस्यैव वाच्य
त्वमिति व्यक्तिशक्तिसत्वेपि न तस्य वाच्यत्वमिति प्राप्तेः कुञ्जेनेति कुञ्जशक्तिवादिनाप्यस्ते शाब्दबोधप्रयोजकत्वाभावेन नैयायिक शाब्द०

मनाच्छिन्नो ऽयमिति भावः ननु कुत्र शक्तिवादिमते गोत्वप्रकारकशक्तिज्ञानत्वेनैव हेतुत्वे जातिविषयकत्वप्रकारकत्वस्य का ऽता
नावच्छेदककोटावनिवेशेन तन्मते शक्यतावच्छेदकगौरवदोषस्यासंगत्यापत्तिरिति हृदयं गोत्वाद्यवच्छिन्नं निरस्तं वक्ष्यमाणगौरव
दोषस्य पाठविषयकत्वेपि शाब्दबोधप्रयोजकत्वं तस्यैव वाच्यत्वमिति नियमकल्पनायां गौरवपरत्वेनासंगतत्वाभावात् जातिविष
यकत्वज्ञानानुपपत्तिरिति शक्तिविशेष्यकजातिविषयकत्वप्रकारकज्ञानानुपपत्तिरित्यर्थः उपदर्शितनिरीत्या जातिविषयकत्वे
नैवेत्याद्यपि व्याख्यानं ग्रन्थे येन नादृशज्ञानस्यैव हेतुतालाभादिति भावः निरन्तरामेवेति जातिविषयकत्वस्य ज्ञानानुपपत्तिरित्यनुषज्य
ते ऽक्त शक्तिग्रहे शक्तिविशेष्यकत्वसत्त्वेपि न जातिविषयकत्वप्रकारकत्वमत्रनुत शक्तिविशेष्यकत्वमपीत्याशयेन नितरामि
त्युक्तिः। निरस्तमिति न त्वाखण्डशक्तिमते गोत्वेपि दृष्टा को ऽनि शक्तिग्रहस्यैव गोत्वप्रकारशक्तिज्ञानत्वेनैव हेतुतेति भावः निपत
संस्थानं व्यंग्यस्यैव जातित्वनियमे मानाभावेनाह उक्तेः अवसीतिन तु रासं वितानेति अप्रयाः पूर्ववाद्देनैरूपद्रवन गवादि
पद्मादावपि समानप्रकारकत्वेन हेतुत्वस्य वक्ष्यमाणत्वेन नदसंगत्यापत्तेरिति भावः अपूर्वगवाननुभवप्रसंगाच्चेत्यपूर्व

टी०

वाद्यंशे यासंगतिः स्वरीतिस्त्वागत्यात्रास्वरसदशायां येनाहदीधितौ कश्चिदिति विशेषणतात्पर्यादिलिंगत्याच सामान्यलक्षणानंगीक
त्रीप्यनुमितौ परामर्शादिरूपस्य स्वविशेषणतापर्वतत्वादिज्ञानस्य हेतुतायाः अंगीकारे तासामान्यलक्षणानसिद्धेरिति भावः अननु
भवादिनितत्याचाभावकस्यापि संबंधविधयाभानासंभवदितिभावः नन्वेवं घटत्वाद्यप्रकारकस्य घटादिप्रत्यक्षस्यानुभवादुष्टत्वादे
रप्यनुपास्थितस्यैवप्रकारत्वापत्तिः न च प्रमेयत्वादिना घटत्वादिज्ञानेपि घटइत्यादिज्ञानविरहात्तत्र विशेषणज्ञानं हेतुरिति वाच्यंप्र
मितेपितुल्यत्वादतआह यत्वतत्वेति पंचेतित्वमत इत्यादितेन गुरूणामप्यास्वाप्यनभ्युपगमेपिनासंगतिः व्याप्यादिग्रहइति दीधिति
स्थव्याप्यादिग्रहादिमस्याविभक्तांशो विहाय प्रतीकधारणात् आदिना प्रामाण्यपरिग्रहः इत्यर्थः इति भावार्थः हेतुत्वं विशिष्टवैशिष्ट्यबो
धत्वावच्छेदेन हेतुत्वं कल्पनीयमिति तथाच दंडेमानिमन्नुमितौ विशेषणतावच्छेदकीभूतप्रकृतदंडमान्यार्थं सामान्यलक्षणोपपत्ति
भावः ननुप्रत्यक्षमात्रहेतुतायां न छिशेषणादिविषयतानिवेशोपि सामान्यलक्षणायाअसिद्धातदनिवेशाकथनस्यानुपयोगात
आहप्रत्यक्षस्येत्यादिधेयमित्यन्तरग्रंथः इतिनिरस्तं इत्यपिनिरस्तं ज्ञानादीत्यादिनेति इदंच दीधितौ विशेष्यतानादिने रामं०

नेतिपाठाभिप्रायेण· विशेष्यज्ञानत्वादिनेतिपाठे आदिना संबंधज्ञानत्वपरिग्रह इति ध्येयं· नहि दोषरणाकज्ञानत्वं स्येव तद्विशे
ष्यकज्ञानस्यापि रूपितिकाचिन्न संभवात् संसर्गेन विशेष्यादिज्ञानजन्यत्वानुमितेरपि संभवादिति भावः मानाभावेनेति उक्तरूपेणादि·
तज्जन्यज्ञानस्य च सामान्यलक्षणाजन्यतावच्छेदकं विशेष्यादिविषयकज्ञानस्य च· विशेष्यज्ञानं· विशेष्यादिज्ञानं संज्ञानेति
तथा च सामान्यलक्षणाजन्यतावच्छेदकं सामान्यप्रकारकतदाश्रयविषयकप्रत्यक्षत्वं न तु सामान्यप्रकारतानिरूपिततदाश्रयवि
षयताकप्रत्यक्षत्वमिति भावः एतादृशानिर्विकल्पगोचरज्ञानस्य यद्रूपेण प्रत्यक्षमिति विरहः इति तथा च सार्वत्रिकापादनेष्टापत्ति
रिति भावः· संशयानुपपत्तिरिति स्वरूपतो घटत्वादिनिश्चयसत्त्वादिति भावः प्रतिबंधकादिति प्रतिबध्यतावच्छेदकेव निश्चयात्मक
तत्त्वप्रसक्तिः स्यादिति भावः सामग्रीति स्वरूपतो निखिलजातिधीरूपसामग्रीसत्त्वे· ननु घटत्वेऽपि तद्व्यक्तित्वमनिगाहनेन पंच
टत्वांशे सामप्रकारकघटत्वप्रकारकज्ञानापत्तिरतस्माह· एवमिति तथा च यथा जातित्वप्रकारकज्ञानस्य स्वरूपतो घटत्वज्ञा
नस्य च सत्त्वेन जातिमान् घट इति प्रत्यक्षं घटत्वनिष्ठप्रकारताद्वयवत्तया स्वरूपतो घटत्वप्रकारकत्वं च यावत्पोगितांप्रम

हेघरत्वाद्यंशे धर्मिज्ञानसत्वेन स्वरूपतो घटत्वज्ञानसत्वेन च प्रकारताद्वयवत्त्वयायोगीनां सार्वज्ञ्यं तया सामान्यलक्षणाजन्यप्रत्य
क्षप्रकारताद्वयसत्वेन निरुक्तसार्वज्ञ्यापत्तिर्दुर्वारेति भावः नतु विशेष्यज्ञानमिति विशेषणतानं तु बाधकाभावात्कारणमेवेति भावः॥
॥इति श्रीमहादेवविरचितायां भवानंदीव्याख्यायां सर्वोपकारिण्यां सामान्यलक्षणापूर्वपक्षव्याख्या॥ ॥स्यादेतदिति यावत्तद्धर्मा
नावच्छेदककवुद्धौ तत्प्रकारकज्ञानस्य हेतुतायां विशेष्यतावच्छेदकप्रकारकत्वाविधयात्कृष्णत्वादसमानविषयकत्वनिवेश
प्रयोजनाभावेन तस्यैव स्वप्रकारसंबंधेन संनिकर्षत्वकल्पनात् ज्ञानधर्मिणां संशयविषयत्वानुपपत्तिः अप्रसिद्धधर्मविशेष्य
कधर्मत्वप्रकारकज्ञानस्येतसत्वादिति भावः तद्धर्मेतीति तत्याचधर्मज्ञानस्य धर्मितांप्रत्यासत्तित्वमेव सामान्यलक्षणायाः प्रत्यास
त्तित्वं न तु ज्ञानलक्षणायाः इति भावः संप्रतिपन्नौ सर्ववादिसिद्धत्वे लाघवादाहस्वाश्रयविशेष्यकत्वेनेति सार्वज्ञ्येति निर्विकल्पक स
जन्यभावच्छेदकानाक्रांतत्वादिति भावः तत्तद्व्यक्तित्वादीति आदिना नानाद्वित्रिधर्मप्रकारकत्वपरिग्रहः नन्वेवं ज्ञानलक्षणावैयर्थ्यमि
त्यत ज्ञानरूपसामान्यप्रत्यासत्त्यैवोपपत्तेरत आह इत्थं चेति सर्वदा सामान्यप्रत्यासत्तिजन्यज्ञानापत्तेराह यदा चेति विशिष्यधर्मेति राम०

वेशप्रयोजनमाह नघटत्वादीति विशिष्येंद्रियनिवेशप्रयोजनमाह नचेत्तित्तथापीभिन्नयापिघटत्वादेः शेषप्रमेयत्वादेरपिप्र
त्यासत्तित्वोपगमादिति भावः प्रत्यासत्तितयाइति विशेषणताविशेषेणात्वादितस्य घटत्वज्ञानस्य हेतुत्वस्येतिधर्मितावच्छेद
कप्रकारकज्ञानविधेयत्वादि· तेनघटत्वादेः प्रत्यासत्तित्ववादिनाप्याकाशाभावादेर्नोप्रत्यासत्तित्वोपगमेननतेषांप्रत्यासत्तित्वा
पत्याकथमीश्वरज्ञानस्यप्रत्यासत्तित्वखंडनमित्याशंकानिरस्ता धर्मितावच्छेदकप्रकारकज्ञानस्यैवप्रत्यासत्तित्वोपगमात्
सामानाधिकरण्येन· सामानाधिकरण्यमात्रेण· एवमग्रेपि· मनुतद्विषयतानिरूपितविषयतासंबंधेननतद्बुद्धिप्रतीतदर्मा
वविषयतानिरूपितविषयतासंबंधेनतदभावनिश्चयस्यसमानविषयकतयाप्रतिबंधकत्वेनसामान्यलक्षणावश्यकीत्यत
आहतेषीति नोकथममग्रेनिश्चयात्मकत्वापांसमानविषयकत्वेनेति उक्तरीत्येत्यादि· संदेहोपपादनेयीतिसामान्यलक्षणायेत्यादि
कृत्नसंदेहइतितन्यायात्सामान्यलक्षणयापिनसंदेहोपपत्तिरितिभावः भवतुपसंभइतितयोर्वोक्तरूपविषयकसंशया
नुपपत्त्यातत्सामानाधिकरण्यमात्रेणविशिष्टबुद्धौनदवच्छेदेनविरोधिनिश्चयस्यैवविरोधितयोक्तरीत्यासमानविषयकत

टी॰ याविरोधित्वाभावेन प्रसिद्धधर्मेणैव संशयोपपत्तौ न तदनुरोधेन सामान्यलक्षणावश्यकत्वमिति भावः अनुपलब्धि नानिरि-
क्तेति कर्मधारयः समानविषयकत्वेन प्रतिबंधकत्वेपि समानधर्मितावच्छेदकत्वं निवेशनीयमित्याशयेनाह संशयस्येति
तद्धुरितरूपेणेति समानविषयकत्वेन प्रतिबंधकतामते महानसीयधूमो वह्निव्याप्य इति निर्णयस्यापि धूमत्वेन तद्विषयके
धूमो वह्निव्याप्यो न वेति संशये प्रतिबंधकतया न तदुपपत्तये तदवच्छेदकं समानधर्मितावच्छेदकत्वं न प्रवेशितमिति सूचना-
य तद्रूपेणेत्यनुक्त्वा तद्धुरितरूपेणेत्युक्तं अत एव समानधर्मितावच्छेदकत्वानंतर्भावेण प्रतिबंधकत्वादेव तद्रूपत्वेन तद्रू-
पव्याप्तित्वेन समानविषयकतामात्रेणाप्रतिबंधकतावादिमतेपि तत्र समानधर्मितावच्छेदकत्वानंतर्भावेऽप्या-
येनाह अभ्युपेयेत्यादि उपपादयति प्रसिद्धरूपभिन्नत्वधर्मितावच्छेदकविशेषदर्शनेनातिरिक्तसंभावनायाश्च योग-
मुपपादयति प्रसिद्धरूपेणेत्यादि रूपेण वायुत्वाभावव्याप्यत्वनिर्णयसत्त्वे तस्यादि संशयायोगाद्रूपं वायुत्वाभावव्याप्य-
न वेति संशयायोगात् तत्स्वरूपं वायुत्वं न वेति संशयपर्यवसाने न तदानीमननुभवादिति भावः तद्धुरितेत्यप्रसिद्धरूपमित्र रान॰

त्वघटितेत्यर्थः रसादिवेति स्त्र्यादिनागंधादिसकलगुणाक्रमादिसकलपदार्थपरिग्रहः इत्यर्थः इतिभावार्थः सामान्याभावेति
घटादिसामान्याभावेत्यर्थः संनिकर्षो यद्यपीति सामान्यलक्षणास्वीकार इति शेषः नैयायिकस्येति मीमांसकैस्सामान्यलक्षणा
नंगीकारादिति भावः व्यभिचार इतितज्ज्ञानं विना तत्प्रकारकज्ञानासंभवादिति भावः व्याघवादाहज्ञानविशेषणेति · नपेक्षित इति
अभाव इति शेषः तेन तमोभिन्नघटादावितरत्वेन माने विवादाभावेपि न क्षतिरिति ध्येयं · संख्यायायोगादिति अभावत्वधर्मितावच्छे
दकाकाभावत्वसंशयायोगादिति भावः प्रतियोगिनिर्विकल्पकानन्तरमनुभवविरुद्धस्य घटाद्यभावप्रत्यक्षस्यापत्तिरेवाभावप्रत्य
क्षे प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य हेतुत्वे मानं तत्र न हेतुत्वं योग्यानुपलब्धिविशेषणतया अभावप्रत्यक्षत्वस्यैवका
र्यतावच्छेदकत्वेन तदुक्तादुष्टनिर्विकल्पकानन्तरं घटाभावप्रत्यक्षापत्तिर्दुर्वारा घटत्वरूपेण घटज्ञानं विनापि तत्पापटत्वादिरू
पेण पटादिज्ञानसहकारेण पटाद्यभावप्रत्यक्षजननेन घटत्वरूपेण घटज्ञानविरहस्याकिंचित्करत्वात् न चाप्रमत्तप्रसङ्गः सत्का
रित्वात्तत्पत्तिरिति वाच्यं तथापि घटत्वप्रकारकघटज्ञानसत्त्वे उक्तापत्तेर्दुर्वारत्वादिस्याशेकापातस्यात्रापि न तत्र हेतुत्वमविच्छिन्नमिति

टी. योगिताकाभावप्रत्यक्षेऽन्याप्रकारकत्वाङ्गीकारेण प्रतियोगिज्ञानहेतुत्वेनोक्तापत्तिरिति समाधानमित्याशयेनाह ननु भूतलमित्यादि घट
त्वप्रकारकघटज्ञानसत्त्वे घटो नास्तीत्याकारकबुद्धेरेवोदयेन न वक्ष्यमाणापत्तिरतोऽत्र पाठानुसरणं अभावत्वाप्रकारकत्वेति प्रति
109 योगितया घटीय इत्याकारकस्येत्यर्थः आपत्तिरिति घटत्वप्रकारकघटज्ञानसहितेन्द्रियसंबद्धविशेषणतासत्त्वेन तत्कार्यताव
च्छेदकाभावप्रत्यक्षत्वावच्छिन्नापमाफलत्वनसहापत्तिरिति भावः पटाभावत्वाहिना घटाभावावगाहिनि भ्रमरूपे पटो नास्तीत्यादिप्र
त्यक्षे व्यभिचारवारणाय घटत्वरूपेण घटज्ञानकार्यतावच्छेदके घटत्वावच्छिन्नप्रतियोगिताकत्वावगाहित्वस्यावश्यं निवेशनीय
त्वे इन्द्रियसंबद्धविशेषणताया अपि कार्यतावच्छेदके तद्रूपे निवेशनीयं अन्यथा तत्रैव भ्रमे व्यभिचारेण घटत्वरूपेण घटज्ञान
स्य तस्याः सहकारित्वासंभवादेवमुक्तानुभवापत्तिर्दुर्वाराऽस्मानुभवस्य वस्तुगत्या घटत्वावच्छिन्नप्रतियोगिताकानुभवत्वादित्याशये
नाह प्रतियोगितावत्त्वावगाह्यभावप्रत्यक्षत्वमिति मात्रैवेति वाच्यमिति शेषः घटत्वावच्छिन्नप्रतियोगिताकेति घटत्वावच्छिन्नप्र
तियोगिताकत्वावगाहीत्यर्थः तेनोक्तभ्रमे न व्यभिचारः इत्येव इत्यादौ च पर्यवसितमिति घटत्वरूपेण घटज्ञानसहकृतघटवत्ता रूपम०

भावसहकृतघटाभावनिष्ठेन्द्रियसंबद्धविशेषणतायाघटत्वावच्छिन्नप्रतियोगिताकत्वावगाह्यभावप्रत्यक्षत्वावच्छिन्नोत्पादकत्वेन
नन्वित्यस्यावतारणिकोक्तदोषाभावात् ज्ञानुभवापत्त्यभावाच्चेति भावः व्यभिचार इति साध्याभावलक्षणायाः इहंत्वादिनावधानेऽ
स्यादि। तस्यतद्धर्मावच्छिन्नप्रतियोगिताकत्वावगाहित्वाभावेन प्रतियोगिज्ञानकार्यतावच्छेदकानाक्रान्तत्वादिति भावः तेनेतितत्पा
चविशेष्येविशेषणमित्यादिविषयताशालिभावप्रत्यक्षानंगीकारेणविशिष्टवैशिष्ट्यबोधात्मकेवविशेषणतावच्छेदकप्र
कारकनिश्चयस्यापेक्षणतेनविकल्पकोत्तरमभावप्रत्यक्षापत्त्यसंभवेनतत्रप्रतियोगिज्ञानहेतुत्वमप्रामाणिकमेवेतिभावः
ननुप्रतियोगिज्ञानस्यस्वातंत्र्येणाहेतुत्वेपिविशेषणतावच्छेदकप्रकारकविशेषणनिश्चयस्यहेतुत्वानुरोधेनैवसामान्या
भावभानेयावत्प्रतियोगिरूपविशेषणनिश्चयार्थंसामान्यलक्षणांगीकारस्यावश्यकत्वमित्यतआह नन्वितितत्पाचविशेष
णतावच्छेदकप्रकारकनिश्चयमात्रस्यैवतत्रापेक्षणेनविशेषणनिश्चयस्यानावश्यकतयानसामान्यलक्षणासिद्धिरितिभा
वः द्वितीयेतु सामान्याभावधीविषयीभूतसकलप्रतियोगिसंनिकर्षार्थंसामान्यलक्षणांगीकारेतु अन्वयव्यतिरेकाभ्यांतज्ज

110

नकत्तापां विशेषणाविषयकत्वनिवेशस्याव्यापकत्वमित्याशयेनाह पूर्वोक्तेति घटत्वप्रकारकज्ञानत्वस्वरूपेणेत्यर्थः अथ पक्षति
रेकादेवासिद्धिरित्याशयेनाहाप्युपेत्येति एतदाशयेनैव हि थितो हेतुत्वेपीत्यपिशब्दोपादानेऽस्वं च हीथितो यत्नियोगिज्ञानस्य हे
तुत्वेपीत्यस्यप्रतियोगीघटादेरुपविशेषणाविषयकत्वस्यविशिष्टवैशिष्ट्यावगाहिज्ञानजनकतावच्छेदकत्वेपीत्यर्थ इति शेषः· नन्वप्र
तियोगिकेमिति हुट्व्यक्तिप्रतियोगिकेत्यर्थः तद्धटज्ञानत्वेनातत्प्रतियोगिज्ञानत्वेन हेतुतेति तज्ज्ञानप्रत्यक्षत्वे तदभावज्ञानापत्ति
वारणाय भवशाकी निवेश्यः प्राचीनेति स्वमते समनियताभावैक्यात तत्सत्त्वे व्यभिचाराद्योध्यः यावत्तेजोज्ञानादितिनाद्यशोम
दिति एव मध्येपि तद्वर्थे· यावत्तेजोज्ञानार्थ· सामान्यलक्षणाप्रत्यासंगे कार्यमिति तत्प्रत्यवप्रतियोगिज्ञानहेतुतामाघ्रमेधकारणप्रत्यक्षाम्नु
रोधेन सामान्यलक्षणासिद्धिरिति भावः ननु ध्वंसप्रागभावयोरत्यन्ताभावविरोधेन ध्वंसप्रागभावाधिकरणे सामान्याभावासं
भवेन कथमुक्तसामान्याभावस्यायकारत्वसंभवऽत आह ध्वंसेति· प्राक्‌ व्यधिकरणधर्मावच्छिन्नाभावघटितमयमजलेग·
प्रागभावध्वंसयोरिति · अत्राश्रयनाशजन्यध्वंसस्यात्यन्तसंभवोपि संभवतीति न तु प्रागभावस्येति प्रागभावस्याभ्युपगतत्वमित्याशयः एवम्•

येनप्रागभावस्यपूर्वनिपातः यत्रपावर्शेरितितथाचअधिकरणतेजसांध्वंसप्रागभावयोरंधकारपदार्थत्वेनितंभविनामत्रा
संभवेपिनदोषइत्याशयः कुत्रकियन्निस्तेजोभावेस्तमोव्यवहारइत्यस्यनिर्णीतुमशक्यत्वादाह किंचेति· तथाचेतितथा
भावेयावत्त्वानिवेशेनअधिकरणतेजसांध्वंसप्रागभावयोरप्यत्रासंभवेपिनदोषइतिभावः यावदभावेतिनत्वाभावाभा
वप्रत्यक्षंपूर्वंनियमतस्तद्धिशेयाभावकूटेपिसंनिकर्षसत्त्वादितिभावः अन्यथाकल्पत्वादितिसामान्यलक्षणयापीत्यादि· तथा
चांधकारस्यासंवेद्यतापत्तेरव्याप्तिरितिभावः तेजस्त्वादिनेतिआदिनातदधिकरणत्वसंग्रहःतेजसंसर्गपरिग्रहः तेजस्त्वस्याधि
धिकरणतेजस्साधारणत्वेन ध्वंसप्रागभावप्रतियोगितातिप्रसक्ततयानतदन्ततिप्रसक्तंधर्ममादाय तत्कालावच्छेदेनेतितत्पदं ध्वं
सप्रागभावपरं व्यधिकरणतेजोनिष्ठतदधिकरणाद्वृत्तित्वस्यतत्कालानवच्छिन्नतयानैतस्यातिप्रसक्तत्वमितिभावः तत्र
प्रतियोगितावच्छेदकावच्छिन्नेतिअत्रावच्छेदकत्वद्वयंस्वरूपसंबंधरूपं बोध्यं तेनतेजस्त्वादेरपिनद्वित्वादिरूपावच्छेदक
त्वेपिनक्षतिः कथमिति तेजस्त्वादेर्नानादेशप्रागभावप्रतियोगितावच्छेदकत्वाभावादितिभावः अन्यतमाभावइतिअन्यतमत्वेना

टी· १११

221

रोक्षसंबद्धस्यते·तद्याभावात् तन्नस्प्रतियोगितावच्छेदकावच्छिन्नाभावप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वात् अत एव·अयंनाया
वराएव तद्याभावादेव·घटस्याघवच्छेदेनैव·घटत्वाद्यवच्छिन्नप्रकारताकत्वेनैव·तद्याव यद्याघटध्वंसप्रागभावादीनां घटत्वाद्य
न्नप्रप्रतियोगिकत्वेन प्रत्यक्षं तद्यांधकारघटकतेजोध्वंसप्रागभावयोरपि तेजस्त्वाद्यप्रतियोगिकत्वेन प्रत्यक्षसंभवान्नानु
पपत्तिरिति भावः अनावश्यकत्वादिति तथा च तेजोभावकूटे ध्वकारप्रतीतिविषयत्वं न संभवतीति भावः मास्त्विति अनेन सामा
न्याभावमानानुरोधेन सामान्यलक्षणायाअनावश्यकत्वेपीति सूचितं अन्यथा· सामान्यलक्षणां विना·मदुक्तदिशाअप्रमेत
भावे इंद्रियसंबद्धविशेषणतायाएवेत्युक्तरीत्यासंनिकर्षार्थमेव सामान्यलक्षणोत्तिन च सामान्यलक्षणायाएव संनिकर्षत्वे
कल्पंसंनिकर्षार्थिकत्वोक्तिरिति वाच्यं तद्धि इंद्रियकरणकतद्धर्मवित्त्वबोधसामग्रीसापेक्षायाएव तस्याः संनिकर्षत्वेन प्रत्यक्षं ते
नादृशसामग्र्यभावेन तस्याः स्वतः संनिकर्षत्वासंभवेन तत्याके: इदं·घटमुख्यविशेष्यकं घटोभविष्यतीत्याकारके·उपनी
तविशेष्यके तिउपनीतमुख्यविशेष्यकेत्यर्थः मनसेन्नि रहंमत्यक्षमित्यनुव्यवसायेविरोधादिति लौकिकप्रत्यक्षएवसाम   साम·

ग्र्याव्यंजकत्वेन वह्निविषयकस्य न स्याल्लौकिकत्वमत्र सामग्र्या व्यंजकत्वविचारासंभवादिति भावः घटेन भविष्यन इत्याका
रकमन्यह्लाभिप्रायेणाह घटविशेषणकेति अनेन घटो भविष्यतीत्यनेन · सामान्यप्रत्यासत्त्यनंगीकर्त्रविशेषणाधीहेतुत्वा
नंगीकारादाहहेतुत्वाभिप्रायेणेति सामान्यलक्षणयेति इदं च पूर्वापि दर्शितरीत्या न तद्धर्माश्रयमुख्यविशेष्यकत्वाद्युपादेयव
नहींद्रियकरणकतद्धर्मवत्त्वबोधकत्वे लौकिकत्वसामग्र्या अपेक्षेत्याशयेन नेत्रज्ञानसंनिकर्षापेक्षयैवेति पूर्वग्रंथाविरोधकत्वस्या
यथाश्रुताभिप्रायकत्वादिति प्रागभावसाध्यकेनेति व्याप्तिश्च यत्र यत्तद्गुणावच्छेदेन घटादिचरमकारणं तत्र तद्गुणावच्छेदेन
घटादिप्रागभावइत्याकारकेति ध्येयं बलवत्त्वादिति अथ यानुमित्यनुनविषयकलौकिकप्रत्यक्षसामग्र्याएव बलवत्त्वेन प्रत्य
क्षे भवतीयोगपंशे लौकिकप्रत्यक्षसामग्र्यभावात्कथं बलवत्त्वमिति चेन्न तथापि समानप्रागभावलौकिकप्रत्यक्षेच्छायां तन्मात्यक्षसं
भवे नद्धेतुरोधेन सामान्यलक्षणाया आवश्यकत्वमित्यत्र तात्पर्यात् · असत्वेनेनीति घटादिकार्योत्पत्तिहेतोश्चरमकारणप्रत्य
क्षं न न तत्र व्याप्तिस्मरणं न तः पक्षधर्मताज्ञानमिति न तदानीं प्रागभावस्यासत्वमिति भावः ज्ञानस्येति कपालादाविमादि

दी· नेननियतताधिकरणकप्रत्यक्षोपपत्तिः कार्यपधानमाप्यत्वस्यग्रहपर्यंतं प्रागभावस्यासत्वेनतत्प्रत्यक्षायोगादाहतत्तत्कावेति न
ष्ठेति अनेनप्रागभावस्यासत्वेनेति प्रागुक्तं समाहितं नेति· तत्प्रत्यक्षासंभवइत्यग्रेननान्वयि· विनिगमनेति· लाघवादित्यविनि
गमनेत्यर्थः ज्ञानसेवेति एवकारोप्यर्थे· नन्वेवमपिप्रागभावलौकिकप्रत्यक्षेबाधकाभावः कार्यपधानव्याप्यत्वस्यैवात्रचक्षुः
ष्ठुणानभवेनप्रागभावव्याप्यत्वस्यापिप्रागभावकालेज्ञानसंभवात् तत्राह एवंचेति प्रत्यक्षाभ्युपगमेलौकिकप्रत्यक्षाभ्युपग
मे· संनिकर्षस्येति लौकिकेस्यादि· कारणत्वेति लौकिकप्रत्यक्षेविषयसंनिकर्षयोः कारणत्वस्यक्लृप्तत्वादितिभावः गौरवादिति
तथाच प्रागभावस्यायोग्यत्वेनलौकिकप्रत्यसंभवइत्याशयः अनुमितिरेवेति तयैवतद्व्यवहारसंभवादितिभावः मतभेदेन·
नव्यमतेन· प्राचांमतेनाह यद्देति प्रागभावप्रतियोगीत्वस्येति प्रथमकल्पे प्रागभावनिष्ठघटप्रतियोगीकत्वस्यर्थः घटविशे
ष्यकानुमानकल्पेयथाश्रुतमेवेतिध्येयं नन्वयम्घटोभविष्यतीतिप्रत्यक्षमित्यादिनाप्रत्यक्षप्रतीतिमुपक्रम्यपूर्वपक्षेभविष्य
त्वंहिसाध्यनावच्छिन्नमारणात्याद्बोधप्रक्रियोपदर्शनेनसमाधानमनुपपन्नमनस्तदाशयमाहनन्वित्यादिनाघपेनास्तीत्याकारक राम·

224

मिति प्रागभावप्रत्यक्षमित्यनेनान्वयः ननूत्पत्तिमत्तया प्रागभावप्रतियोगीनयोत्पन्ने ऽनुत्पत्तिमत्त्वाभावेन प्रागभावप्रतियोगि
त्वासंभवात् वर्त्तमान प्रागभावप्रतियोग्युत्पत्तिकत्वमित्यसंगतमतः प्रतीकमधृत्वैव तद्व्याख्यायमाह उत्पन्नेऽपीति क्रियात्मकतये
ति हरणासंबंधस्य क्रियात्मकत्वहरणस्यावाच्यत्वादिति भावः तत्प्रागभावः उत्पत्तिप्रागभावः प्रामाणिक इति तथा चोत्पन्नेऽस्युत्पत्तिम
त्त्वमिष्टमेवेति भावः अस्वीकारादिति सामान्यलक्षणानंगीकर्तृमिरित्यादिः इदंभविष्यत्वमिति इदमितिप्रतीके भविष्यत्त्वमिति
पूरणीयमिति गतेर्वेति वर्त्तमानादिहिनस्यापि गतत्वः परादिन तयापरत्वः पदार्थत्वादिति भावः वर्त्तमानेत्यादि उत्पन्नेऽपीत्यादिः
अनन्वय इति उत्पन्नेऽनुत्पत्तिमत्त्वाभावेन बाधादिति भावः एवं इहाग्रघटोभविष्यतीत्यादौ यात्र यद्देशाविशेषकालविशेषया
रधिकरणत्वेनान्वये ध्वंसतीत्यादौ तेन ध्वंसतीत्यादावपि अन्वये अधिकरणत्वेनान्वये ननु भविष्यतीत्यादाविव ध्वंसतीत्यादावप्यु
त्पत्तिनैव प्रत्ययार्थ इत्यत आह अत्रेति ध्वंसतीत्यादावित्यर्थः एव मग्रेऽपि प्रत्ययार्थेति आख्यातत्वेनाख्यातार्थत्वमर्थः प्रतियोगि
त्वे पच्यमानार्थघटाद्यन्वितप्रतियोगित्वेनान्वयापत्तेरिति धात्वर्थनाशोत्पन्नेऽपीत्यादि सबाधितइति भावः अनन्वयाया

टी॰ ११३ 113

नास्तीतियाथेवाधेनेत्यादि॰ तस्यधात्वर्थस्यस्वभेदान्वयानुरोधाद्वृत्तिवस्त्वर्थेऽस्तिनिरूपितमुख्यत्वमित्यादिभवत्रत्वउदाख्यातयोः भूधा
तोरितिद्दहाघघटोभविष्यतीत्यादावर्थोत्पत्तिः सन्नेवेति एवकारस्योत्पन्नत्वव्यवछेदः प्रयोगः स्यादितितत्पाद्यसर्वत्रभूधातोरु
त्पत्तिरेवार्थः अनुत्पादनस्यसत्तापदमप्युत्पत्तिपरमेवेतिभावः प्रत्ययार्थः भविष्यत्त्वम्प्रत्ययार्थः लक्षणा चेति आख्यातस्य
त्यादि॰ नन्वेवं देशविशेषकालविशेषयोर्घटोधनिर्वर्त्यस्वरूपसत्तायामन्वये भवनेष्वः समुत्पद्यतेतिप्रागुपदर्शितदोषादुर्वारत्व
न आहदहायेतिप्रागभावदशितिमेनभवनेष्वद्दत्यादिदोषवारणात् प्रतियोगितिस्वरूपसत्तात्मकप्रतियोगिनि॰ अनेनप्रागुपदर्शित
स्यध्वंसाभाविनीत्यादिदोषस्यकपालनाशेत्यादिदोषस्यचवारणंतत्प्रयोजनं घटतमक्कालाधिकरणीकार्याएतद्देशाघतनकाला
धिकरणाकवर्त्तमानप्रागभावप्रतियोगिनोस्वरूपसत्तानशाब्दबोधघटइत्याद्यन्वयबोधः अन्वयसंभवप्रयोगादितिवदुन्नीदि
गाभविष्यतीत्यर्थ॰ तादृशप्रयोगेऽभयत्राप्यसंभवादित्यर्थः उभयत्रान्वयेनैवतादृशप्रयोगसंभवादित्यादि नाशानन्तरंतिवा
योगिनोरिति॰ नाशेन्वयादृष्टे नहिनंदुपतीत्यादिप्रयोगः तत्प्रतियोगिध्वंसेनध्वंसाविनाशकेयरध्वंसादन्ततौतिप्रयोगः रम०

तथा चाद्यतनकालत्वान्निरद्यतनकालत्वान्न भविष्यत्त्वादौ भविष्यति योगी घट इत्यन्वयबोधः अन्वयासंभवादिति तथा च भविष्य
तीत्यादावुत्पत्त्यर्थकत्वं भूधातोरावश्यकमिति भावः नन्वेवं भूधातोरुत्पत्त्यर्थकत्वे भूसत्तायामित्यनुशासनविरोधो दुर्वार इ
त्यत आह भूधातोरिति सत्तामात्रेति न घटाकाशं भवतीत्यादौ सत्तारूपार्थसंभवेन न तत्परोक्तानुशासनविरोध इति भावः भू
धातोरुत्पत्त्यर्थकत्वे नानार्थत्वापत्तिरनुशासनविरोधतादवस्थ्यं चेत्यत आह तत्रैवेति अन्यदेशान्न हि इति तथा च भूधातोर्लक्ष
णायोत्पत्त्यर्थकत्वे च न नानार्थत्वं न वा मुख्यार्थपरानुशासनविरोधश्चेति भावः अनायत्तेति अन्वयानपेक्षेण स्वप्रतीत्यपेक्ष्य
सज्येनेति भावः पूर्वोक्तेति चिरविनष्टेपीत्यादिनाग्रेणानुपदर्शितेत्यर्थः इहाद्य घटो भविष्यतीत्यादौ हि घोत्पत्तिमानस्यानुभ
वविरुद्धत्वमित्यस्वरसादाहाहुरिति प्रागभावप्रतियोगिकमिति न थाच तदनुरोधेन सामान्यलक्षणावश्यकेति भावः नत्वइह कपाले
एव मग्रेपि घटत्वावच्छिन्नप्रागभावप्रतियोगिताकमिति इदं च प्रतीकं अन्वय इति अनुषंगेणान्वयः अन्यगामित्वादिति सामान्या
भावावगाहिनाद्यशब्दसमयानुरोधेन प्रागभावध्वंसयोः प्रतियोगिताप्यपि घटसामान्यस्वीकारादिति भावः चरमघटेति

महाप्रलयस्यादि॰ अत्र रहस्यं नीतिनकपादे॰ प्रागभावस्य घटप्रागभावस्य सामान्याभावता घटसामान्याभावता॰ एवमपि
सर्वाधिकालेतिसंसारस्यानादित्वादितिभावः अनुक्तोति शुद्धघटत्वावच्छिन्नाभावस्यैव तत्प्रत्ययविषयत्वादितिभावः नन्वभाव
इतियदासेनाभावत्वेवत्वादि॰ परध्वंसाद्यभावद्वयस्यार्थः सिद्धान्तेति अभावमात्रेयोगीकाले तिरिक्ताभावानंगीकारस्यप्रसिद्धत्वेनम
र्थः भावत्वेति अननुगतानामेवाधिकरणानामननुगतपदार्थैः ध्वंसाद्यभावस्येनतादृशधीविषयत्वसंभवेवेभपर्थः अभन्वेतिभा
वात्मकाधिकरणोद्यभावत्वाभावादितिभावः भावाभावसाधारणाभावत्वांगीकारेप्याह अनेकेयाग्मिति शाहृत्तिमागभावस्याद्
त्यर्थः संभवद्धियन्नरतयाप्रकालीनाभावादिविषयकतया॰ नाहरोमेति अत्यन्ताभावविलक्षणप्रागभावत्वेस्यर्थः अप्रमाण
संभवदिश्यत्वंनरत्वेपिशहसवत्वंनरसाधकत्वे॰ ताहद्यायन्यायस्यान्नसंशोधमत्वमाशंकाहतत्वचेत्यादि॰ अतिरिक्ता
भावेति अत्यन्ताभावातिरिक्ताभावस्यार्थः उत्पन्नेरितिअतीउत्पत्तयेतिशेषः अनन्यथासिद्धअन्यथानुपपद्यमानेन
त्यनित्यवंहीति घटोत्पत्तिप्रयनित्वंहीत्यर्थः ध्वंसेतीति नचैवमपि महाप्रलयेनियसंगः घटादिध्वंसभेदात्मकपटादिध्वंसप्रति राम॰

योगीयचरमध्वंसभिन्नाद्धितिवाच्यं ध्वंसपदस्य ध्वंसमात्रनिरूपकप्रतियोगित्वपर्यन्तत्वाभप्रयोजकत्वोपपाभात् ननु सुखदुः
खाभावान्यतरस्यैव स्वतः पुरुषार्थतया पापध्वंसस्यान्यतरत्वतया स्वतः पुरुषार्थत्वासंभवेन तत्साधनतया च गौणपुरुषार्थ
त्वासंभवेन प्रायश्चित्तफलत्वासंभवात् पूर्वकल्प एव साम्प्रतं· नवोक्तदोषः निष्फलस्यापि योगक्षेमसाधारणजन्यत्वसंभवाद
तत्राह नवीनमत इति स्वत इति बलवद्द्वेषविषयाभावत्वस्यैव स्वतः पुरुषार्थत्वप्रयोजकत्वेन सुखदुःखाभावयोरि
व पापध्वंसस्यापि स्वतः पुरुषार्थत्वसंभवस्यैव अत एवाहिकं दुःखध्वंसादेः स्वतः पुरुषार्थत्वं तत्रत नवीनोक्तं संगच्छत इति
भावः अत एव· वृजिनमारारोत्पादानसंभवादेव· आपाद्येति नष्टदुरितपुनरुत्पत्तिरूपापाद्याप्रसिद्धेः आपादकात्· आपादन
संभवात्· प्रथमदुरितोत्पादापादकयोः प्रसिद्धिसत्त्वादिति भावः तदभावादेव· तद्दुरितसामग्र्यभावादेव· कालीनेति
कालोऽत्र क्षणरूपः तेन स्थूलकालमादाय न दोषः अविकल्पकस्य चतुर्थादिक्षणे पुनरुत्पादापत्तिर्न संभवति चक्रैयो
र्वापर्यन्तनिर्वाहाय चरमकतत्वध्वंसत्वेन हेतुना कस्यचिद्विशेषगुणस्यानपरविरहादित्यनुमायेताहनिर्विकल्पकस्येति द्वितीय

११५

229

न्या॰ 115

न्तीयज्ञानयोः पुनरुत्पादापत्तेर्निर्विकल्पकप्रतिबंधकतयैवनिराससंभवादाहयत्तु पर्यन्तं ज्ञानइतिचतुर्थ्यादिहेतुताइत्यर्थः
तत्रचक्षुःसंयोगादिघटितसामग्री विकल्पकसामग्र्योस्तत्तीयादिहेतुत्वेपिसत्त्वादितिभावः तत्कालीनेतितत्कार्यनिष्पत्तिकालीनो
त्पत्तिकेत्यर्थः ध्वंसादीतिध्वंसानन्तरस्यापिनादशास्यविनिगमनाविरहेणप्रतिबंधकतयात्राहितानन्तरेत्यर्थः विनिगमनावि
रहेणेतियोहेतुतयापुनरुत्पन्नपुनरुत्पादवारणासंभवादितिभावः हेतुतायाइति अनंतेत्यादि प्रागभावहेतुतामतेप्युत्प
न्नेपितत्कार्यापत्तेः किंचित्प्रागभावसत्त्वेनविशिष्यैवतस्यावाध्यत्वादितिभावः मिथ्याज्ञानवासनायाइति मिथ्याज्ञानजन्यसं
स्कारस्येत्यर्थः मिथ्याज्ञानंचात्माहंगौरोहंइत्यादिज्ञानं कल्पितइति तथाचतत्त्वज्ञानेनोत्पत्त्वज्ञानेनवासनानाशा
न्नधर्माद्युत्पत्तिरितिभावः ननुस्वसमानकालोत्पन्नपदार्थानांप्रागभावस्यसमनियतत्वादेकेननानंतानांकारणत्वक
ल्पनगौरवमतआह किंचेतिन चेतितस्यभावत्वइतिशेषः ध्वंसप्रतियोगीतिजन्यसत्त्वस्यकार्यतावच्छेदकत्वेप्रागभावा
नंगीकारेजन्यस्यप्रागभावप्रतियोगीत्वरूपत्वासंभवेनध्वंसप्रतियोगीत्वरूपत्वमित्याशयेनेदं आनादित्वेतिविना रामः॰

शिसमवेतस्यसाक्षिनियमादितिभावः अनुपपत्तिरिति इति नतस्यभावत्वमितिशेषः अतएवतस्यभावत्वाभावादेव-
सः निरुक्तोधर्मोधर्महेतुः सामान्यादितुल्यत्वेतिविनाशितयासामान्यादित्वाभावेनतुप्रत्यक्षोनिर्मितिभावत्वेनाभावत्वेन
चेतिविनाशिसमवेतभावस्यसाक्षिनियमास्यवत्वेनानिर्णयः समवेतत्वेनाभावत्वेनानिर्णयः अतमितिनेयामता
द्यविद्यावादिनयानस्येवानाद्यविद्यानामकत्वादितिभावः सामग्र्यव्यवहितोत्तरकालत्वस्यसामग्रीसमयध्वंसाधिकर
णसमयध्वंसानधिकरणत्वेसतिसामग्रीसमयध्वंसाधिकरणसमयस्य-नान्वितिनमयावनोक्तरीत्यात्रपुनरुत्पत्त्या
पत्तिरितिभावः तदधिकरणलक्षणोक्तिरत्र द्वितीयादिलक्षणासंबंधेऽतिव्याप्तिवारणायाद्यपदंप्रागभावविशेषणं प्र
थमलक्षणप्रागभावस्याधिकरणमहाकालत्वान्नियताऽसंभववारणायलक्षणेति घटसमानकालोत्पत्तिकत्वे पाधा
त्मकस्यलक्षणसंबंधेऽतिव्याप्तिवारणायचरमलक्षणपदं महाप्रलयोत्पत्तिसाधारणंचेदं महाप्रलयात्मकचरमध्वंसा
त्मकलक्षणमादायैव तत्र लक्षणसमन्वयात् महाप्रलयानंगीकारे गुरुलक्षणानवधिनामिदं गुर्वभिप्रायेन लाघवाद

टी० 116

क्षणाद्यधिकरणयावत्काले इति स्वप्नाद्वितीयादिक्षणसंबंधेऽतिव्याप्तिवारणाय चरमाधिकरणान्तं कालविशेषणं प्रथमक्षण
स्यापि यावत्कालप्रागभावानधिकरणत्वादसंभववारणाय तदधिकरणेति प्रागभावविशेषणं तदधिकरणं यस्येति बहु
व्रीहिणा तद्रूपार्थकं यत्किंचित्कालिकसंबंधेन प्रथमक्षणप्रागभावस्य तद्वृत्तित्वाभावादसंभवः पर्याप्तेन तदधिकरण
त्वस्य यावत्कालविशेषणत्वलाभेन यावदंतर्गतमहाकालप्रागभावाप्रसिद्धा प्रथमक्षणस्य तादृशयावत्कालांतर्ग
तप्रथमक्षणप्रागभावानधिकरणत्वेन घटासंभवस्य दुर्वारत्वात् द्वितीयादिक्षणस्य तादृशतृतीयादिक्षणप्रागभावा
धिकरणतयातिप्रसंगतादवस्थ्यमतो यावदिति प्रागभावविशेषणं कालिकसंबंधेन तद्वृत्तित्वलाभाय प्रथमकालपदं का
लिकसंबंधेन प्रागभावाधिकरणत्वलाभाय घटसंकालपदं घटाद्यधिकरणेति घटादिसंबद्धत्वपर्यः जन्यमात्रस्य कालो
पाधितया ज्ञानस्यापि समयत्वादुक्तदोषतादवस्थ्यात्तादृक्कालिकसंबंधेन जन्यभावीति तद्धटपूर्वकालीनस्य नाशादिभावीति
तद्धटविशेषणं उक्तरीत्या ज्ञानस्यापि समयत्वात्तादृक्कालिकसंबंधव्यापकमिति कारिकास्थं घटान्तं व्याचष्टे ध्वस्त इति राम०

तथा घटस्वलक्षणाध्वंसानवच्छिन्नस्य लक्षणायोग इति फलितं ननु सामान्यतः लक्षणाः समयस्याभिधानमयुक्तं द्वितीयलक्षणो
त्पन्नध्वंसप्रतियोगिस्थूलकालसंबंधेऽतिव्याप्तिवारणाय द्वितीयलक्षणापदस्य लक्षणान्तर्विशिष्टपरतायाश्चावश्यक
त्वादित्यत आह अत्र चेति उत्पत्तिमत्वादिनाद्यस्थूलकालसंबंधस्याप्याद्यलक्षणासंबंध एव पर्यवसानेनोत्पन्नत्वस्य व्यर्थ्यादि
ति भावः उभयत्र उभयत्रापि व्याख्यातेनोक्तातिप्रसंगावारणादाह यदीयेति यदीयोत्पत्तिपूर्वकालीनतत्स्थानसंबंध
स्य घटोत्पत्तित्वाभावादाह घटोत्पत्तिलक्षणा इति अविनश्यदवस्थानज्ञानसंबंधस्योत्पत्तित्वं मध्यमसमयपदोपादाने व्य
संभवीत्यत आह विनश्यदवस्थामिति तज्ज्ञानध्वंसीति तज्ज्ञानसंबद्धत्वर्थः मध्यमसमयपदमिति नान्यतिमुक्तामायं न
ननु क्रियेति अत्र क्रियामात्रस्यापि ध्वंसस्येति च सावधारणोऽत्र मध्याह्नमात्रस्य कालोपाधित्वाप्रतिलक्षणे यावत्क्षमा
रणातिव्याप्त्यप्रसंगतेः । ननु प्रतिलक्षणांकस्याविच्छिन्नाशेन जन्यमात्रस्य कालोपाधित्वेन तद्द्वयोत्पाद द्वितीयादिलक्षणाविन
वपदाभ्यास्यापि तद्विरियसमये संबंधस्याकांक्षितत्वात्तस्य च द्वितीयादिलक्षणावृत्तिध्वंसप्रतियोगित्वान्नोक्तातिव्याप्तिरि

टी० ११७

117

233

मत्त्राह न हेतोस्त्वादिति कालोपाधित्वाभावादिति जन्यमात्रस्य कालोपाधित्वानंगीकारादित्याशयः अत एव सर्वक्रियामात्रस्ये
त्याद्युक्तेः यत्नोत्क्षणं क्रियाया विनाशाभ्युपगमेपि द्वित्रिक्षणमध्ये क्रियाया विनाशोत्पत्तौ जातत्वमेवासिद्धमत आह यन्निष्ठक्षणमितिल
क्षणांतरोत्पत्तिलक्षणं निरुक्तेति स्ववच्छेदकत्वस्यानतिरिक्तवृत्तित्वरूपस्य व्याप्यत्वे पर्यवसानादिति भावः नन्वित्थं तत्त्ववसर्वेषामिन
देर्योनुपपन्न इति भावः पूर्वोक्तेति पदस्य घटोत्पत्तिक्षणादिस्वाद्युक्तस्यार्थः न तु स्वरूपायापीति अपिना कालिकसंबंधेन ध्वंसस्य स्वत्वेनोत्ति
त्वामसमुच्चयः अथ क्षणावच्छिन्नस्य कर्मणा एव क्षणत्वमित्याशयेन क्षणलक्षणमुक्त्वा तादृशस्य क्रियामात्रस्येव क्षणत्वमि
त्याशयेन क्षणांतरमाहस्वध्वंसेति द्वितीयादिक्षणस्य पदार्थमाद्ययासंभववारणाय प्रतियोग्यंतं पदार्थविशेषणं अती
तपदार्थमादाय तद्वारणाय स्ववृत्तीति क्षणादौ यो घटात्मकस्थूलकालेतिव्याप्तिवारणाय पावृत्तीत्यंतं यथाश्रुते इति क्षणिकमित्या
दिव्यवाहिनाज्ञानादि परिग्रहः स्ववृत्तिरिति स्ववृत्तित्वं च वर्तमानतारीत्या कालिकसंबंधेन बोध्यं अत्र ध्वंसप्रतीयोगितोरकक्षणाव्याप्ति
त्वाभावेन स्थूलकालव्याप्तित्वेन वक्तुनासंभवाति प्रसंगो सत्वादिति असंभववारणायेति शेषः अनंगीकारे त्वितित यावभेदस्य व्या

राम०

व्यवहितत्तयास्थिरस्यकमादेः क्षणमपिस्ववृत्तिध्वंसप्रतियोग्यनाधारत्वासंभवादसंभव इतिभावः यावन्तीति इदं चनादृशायां किंचि
त्ध्वंसवैशिष्ट्यमादाय तादृशसंसर्गवारणाय। लक्षणत्वे। लक्षणत्वसंभवे। किंचित्कालावृत्तित्वं। किंचित्कालावृत्त्यभावत्वे। पूर्ववर्त्ति
कालिकसंबंधेन स्ववृत्तित्वस्य यावदभाववैशिष्ट्यस्य लाभायेत्यर्थः। अतिरिक्ताभावानंगीकारदशायां यावन्तीति रिक्ताभावघटित
मुक्तलक्षणं न संभवतीति भावः। ध्वंसविरोधादिति इदं चातिरिक्तध्वंसस्य परितः स्वपूर्वत्वमिमामाशयेन। उभयं स्ववृत्तित्वस्य पूर्ववृ
त्तित्वोभयं। द्वितीयादित्युक्तौपि स्वस्य पूर्ववर्त्तियत्किंचित्पदार्थवैशिष्ट्यसत्वादतिव्याप्तिरतो यावदिति कालिकसंबंधेन स्वपूर्ववृ
त्तित्वनिवेशप्रयोजनमाह नैमित्तिकालिकसंबंधेन स्ववृत्तित्ववैशिष्ट्यनिवेशप्रयोजनमाह नवेत्यादिना इत्याकाशस्य ज्ञानस्य
तिश्रवैनादृशैक्षणत्वानव्याप्तिमादाय वनिरुक्तनिवेशादुष्प्रयोजनसंभवेन स्ववृत्तित्वस्य प्रथमोक्तत्वेपि कालिकसंबंधेन तन्निवेश
प्रयोजनं प्रथमं नोक्तमिति ध्येयं। असत्वेपीति अव्याप्तिरित्यनेनान्वयः सत्वेपि उक्तत्वान सत्वेपि अतिव्याप्तिरित्यनेनान्वयः स्वपूर्व
त्वमिति लक्षणलक्षणाप्रविष्टमित्यादि उत्पत्तिलक्षणाप्रविष्टलक्षणस्येति। उत्पत्तिलक्षणास्वनिष्ठपाठे उत्पत्तिमदित्यनावादित्यस्य उत्प

टी०

त्रिघटेरनत्क्षणाघटितत्वाद्विमर्थः स्वानंतरोत्पन्नस्य स्वद्वितीयक्षणोत्पन्नस्य वासंभवेनोक्तरीत्या महाप्रलयक्षणेनाव्याप्तिरित्याशये
नाह महाप्रलयाभिरिक्तक्षणोति। यावद्वितीतिक्षणावविशेषणमितिशेषः नघटोत्पत्तिक्षणाइत्यादि। यद्यपिक्रियायाउत्तरसंयोग
नाशपतयाकपालक्रियाजन्यकपालद्वयसंयोगजन्यघटोत्पत्तिक्षणे वयवक्रियानाशस्तथाप्युत्तरसंयोगजन्यतदुत्पन्नर
संयोगजन्यकार्यतत्संयोगवद्घटेनाकपालावयवकपालिकावयवेनकपालसंयोगजन्येनकपालावयवकपालिकातत्कपाल
संयोगजन्येतत्कपालतत्कपालसंयोगस्तेनघटोत्पत्तिक्षणस्यलाभिप्रायेणाह नस्याद्वितीयपूर्वकालाप्रसिद्धेरितिभावः। स्थि
रघटादिस्थले क्षणद्वयमध्ये क्रियायाउत्पत्तिविनाशाभावेपि तृतीयादिक्षणोत्पन्नसंभवेन नरुधिकरणक्षणाप्रसिद्ध्या तदुत्पन्नेनाव्या
प्तिरित्याशयेनाह नाभावश्चप्रागभावविनिश्चयःस्थिरइत्यादि प्रतिक्षणोत्क्षेपोत्पत्तिविनाशयोः संभवेन तथाहोत्तेरुत्पत्तिनिश्चयइत्यत आह महा
प्रलयोसत्वाविनिश्चयस्याप्रसिद्धिरिति महाकालस्याक्षणत्वाभावात् तत्संबंधस्योत्पत्तिनाशाभावाच्चेतिभावः। क्षणस्यावश्यकत्वादितिमहा
कालीयघटाद्यधिकरणतापात्त्यादि। एवमन्येपि अनुगमे शेषिनिश्चयवच्छेदकतयेत्यादि। तेषामेवानिश्चायकत्वादितिभावः। समा०

करणेति स्वध्वंसेति ध्वंसप्रतियोगितानाधारत्वादित्यर्थः ह्येवंरूपैर्पूर्वैरित्यादि · चरमध्वंसस्यैवेति इदमुपलक्षणं चरमध्वंससंबंध
स्यैव चरमध्वंसस्य महाप्रलयोत्पत्तित्वादित्यपि द्रष्टव्यं मतांतरमाह नान्येत्यादिना · महाकालेलक्षणात्क्षणव्यवहारविषयत्वस्य के
नाप्यनभ्युपगमादप्रसक्तप्रतिषेधापत्तेरस्वरसाद्वाहकश्चिदिति लक्षणाघटितमितिलाघवादित्यादि · अत्रदीधितावुत्पत्तिरित्येव
पाठः उत्पत्तिशिष्यपिकेत्यादिति पाठस्तु प्रामादिकः एतल्लक्षणस्यनिर्दुष्टत्वादिति ध्येयं अत्रापि · लक्षणाघटितोत्पत्तिलक्षणे ·
इति बोध्यं · इत्यतो जन्यमात्रस्यैव कालोपाधित्वं बोध्यं तेषामपि · स्वानधिकरणतत्तन्नामपि · यत्किंचिद्घटके · यत्किंचिद्घटनापत्तेः स्वा
नधिकरणासुनाहयातेषु · तत्पदार्थापादनं · तत्पदोत्पत्त्यापादनं · कादाचित्कत्वे · किंचित्कालानुत्पत्तिकत्वं · कारणोपि · नकाला
व्यवहितपूर्ववृत्तिकारणाभावप्रयोज्यमित्यर्थः कादाचित्कत्वस्य · किंचिद्देशानुत्पत्तिकत्वस्य · कारणोपीति देशवृत्तिकारणाभा
वप्रयोज्यत्वादित्यर्थः सामानाधिकरण्येति समवायघटितेत्यादि · अस्य याकार्यकादाचित्कत्वस्य कारणकादाचित्कत्वानधीनत्वे
उत्पन्नमेरोरित्येतादृशधीमत्तितादृशघटाभ्यासेव · तद्भूमेत्वापादकाभावइतितत्त्वेत्यर्थः नत्वेनतत्वेन तत्र घटित्वेन · कथमिति

सामान्यसामग्र्या एव व्याप्त्यादिकाया: सत्वादिति भावः नन्वदृष्टत्वेति विशेषसामग्रीसहकृततायाएव सामान्यसामग्र्याः फलव्याप्य
त्वादिति भावः नन्वदृष्टाद्यधिकरणतंतुरूपविशेषसामग्र्येव तत्राप्यसीत्यत आह नन्वयरानधिकरणेति अभावादिति विशेषधर्मा
वच्छिन्नं हेतोरेव विशेषसामग्रीत्वेन तादृश्यानंतर्तंतौ विशेषसामग्रीत्वासंभवादिति भावः ननु नन्वपटस्य समवायेन स्वाधिकरणानंतं
नरेघापि सत्वेन तत्र तादृशस्यपेन तत्र तंतोरभावेनव्यभिचारात्कथं तत्र घटत्वेन ननं नंतर्वृतांतस्यानेकत्वमित्यत आह अत्रेदमिथ्या
दि· व्याप्यवाह्य उत्पत्तिसंबंधेनेति तत् पूर्वकालेतदृश्यवकिन पूर्वकाले नास्तीति तथा चैवं दैशिकव्यभिचारस्य दैशिकव्यापकताविघट
नद्वारैव हेतुताविघटकत्वात्पाविशेषकारणतायां कालिकव्यापकतायादैशिकसामानाधिकरण्यमात्रस्यव निविषत्वेन दैशि
कव्यापकतायाश्चविवेशेनो दैशिकव्यभिचारस्यनदोषत्वमित्याशयः एककालीनत्वादिरूपं विशेषसामग्रीवैशिष्ट्यं सामा
मान्यसामग्र्यामस्येवेत्यत आह विशेषसामग्रीवैशिष्ट्यं वेत्यादि· मन्वेवंस्याश्चिद्विशेषसामग्र्यास्तादात्म्यरूपं वैशिष्ट्यं तस्या
श्चित्समवायरूपं तादृश्यननुगमः स्यात आह स्वयमद्येत्यमिति यादृशविशेषसामग्र्या येन संबंधेन हेतुतात्तस्यास्तेनैव संबं राम०

धोवेशिष्ट्यमितिनानानुगमइत्याशयः सर्वत्रैवकारणतायांकालिकदैशिकव्यापकत्वाद्वयमेवनिविशतइतिवादिनांमतमाहकेचि
त्विति व्यभिचाराभावाद्विनिनतंतुत्वेनतन्यरत्वेनकार्यकारणभावेकालिकदैशिकव्यापकत्वाद्वयमेवनिविशतइतिशेषः नन्वेवम
यित्रियासंयोगयोः कार्यकारणभावेव्यभिचारेणाव्यापकत्वाद्वयनिवेशासंभवेनपूर्वोक्तप्रकारस्यावश्यकत्वेकिमर्थमेता
वानुक्लेशइत्यतआहएवमीति एवमपिसमवायेनकार्यमितिनियामकान्याभइत्यस्वरसादाहाङ्कुरिति सामानाधिक
रण्येति समवायविशेषणतोभयघटितेत्यादि ननुद्वयोस्तंत्वोः कारणत्वकल्पनमपिहौकस्यप्रागभावस्यकारणत्वेला
घवमितियुक्तानेकत्रप्रागभावासिद्धावपिद्वितंतुकएवप्रागभावसिद्धसंभवेनानेकत्रप्रागभावसिद्धाविन्यादिनाद्वितंतुके
प्रागभावसिद्धेरन्यत्रप्रागभावसिद्धिमूलकत्वोक्तेरयुक्तेमतआहद्वयोरेवेति आशयःअनेकत्रेत्यादिग्रंथस्याशयः तदेवा
शंकतेनचेति तत्रनवतंतुकपटेतत्वेन दृष्टांतंतुकपटध्वंसत्वेन महापटपूर्वस्वसमयेरोत्पत्तिर्भवितिव्वेत्याशयेनाहइदंचेति
प्राक्कालेपीत्रिस्यापिनोत्तरकालपरिग्रहः भवतिभवत्येव नन्वेवंद्व्यणुकवतिदृष्टांतरानुसरणाकर्यतत्रदृष्टांततंतुकपटोत्पत्तिरिन्तप्रा

हस्ततरेति अभिघातेन वेगाद्यभिघातादिना· तत्समवायिकारणसंयोगनाशेनेति शेषः तत्रापीव· त्वन्मते तु कपटनाशादेव
घटनाशात्तु कपालयोरपि शिरिति तदानीं द्व्यणुकाभावस्य प्रतिबंधकाभावस्य हेतोस्तत्र सत्त्वादिति भावः विनिगमनाविरहेण नानाध्वंसा
नां प्रतिबंधकत्वे गौरवादाह तन्नाशकेति· तत्र च तत्क्षणावच्छिन्नत्वं च· सत्त्वेन· तत्क्षणवृत्तित्वेन· कार्यानुत्पादेः तत्पूर्वपाणकार्या
नुत्पादप्रयोजकस्याभावं· तत्तत्क्षणे नाम्नैव ति यावत्तत्तुल्यत्वेन जनकत्वासंभवादिति भावः अवच्छेदकतयैव कारणतावच्छेदकतयैव·
यतनाद्यनादिकारणीभूततयागभावीनामित्युक्ते तत आह अवच्छेदकत्वेपीति कारणतावच्छेदकतया नत्वभिहितावपीत्यर्थः वेतिरिक्त
प्यर्थकं कारणत्वमिति तदनन्तरं योग्यं तयावकारणत्वमपि स्यादिति नचेष्टं असमवायिकारणस्येति इदमुपलक्षणं समवायिका
रणान्तरनाशवतां तत्तन्तोरपि अंशेपीत्यपि बोध्यं ननु कालिकतत्पदविशिष्टप्रागभाववत्त्वापन्नमिति निवेशान्न दोषः अतीतानागतसंयोगाना
मतयात्वादत आह ननु तत्तु मात्रेति दैशिकतयेति तत्त्यावत्कालिकव्याप्यत्वनिवेशेन मटोत्पादकविद्यमानसंयोगानामदै
शिकव्याप्यत्वमेव निवेशनीयं तत्त्यावातीतानागतसंयोगानामपि तयात्वेन तत्पटानुत्पत्तिप्रसंगनाशस्य सत्त्वमिति भावः नैवं राम०

१२०

मितिअतीतानां विशेष्यत्वेनानागतानां विशेषणत्वेन वा कारणत्वादिति भावः तत्पटेति इदं च विशेषणतां नमदसमानकालो
त्पत्तिकतत्पटानंतरकालवृत्तिसंयोगवारणाय तत्पटसमानियतकालसंयोगवारणाय तत्पटानधिकरणमितितत्पट
ध्वंसेरिति इदं चातीतसंयोगवारणाय वारणायवारणायापि अपिनातीतवारणपरिग्रहः स्वस्वविशेषपर्यंतानुसरणा
त्केशरत्पा स्वरसाराहुः आहुरिति तत्वे नैवतद्ध्वंसेनैव वारणायेति एतद्धारतांवसंयोगत्रयमात्रसत्वेतत्पटोत्पत्तिवारणा
येत्यवधेयं अतिगौरवादित्यादिकारणतावच्छेदकगौरवस्याधिक्यादिति भावः निमित्तस्येवेति चकारोनुक्तासमवायिकारणोकत्व
समुच्चायकः आचार्यइतितन्मते च कपटघयोरिसंबंधेन द्वित्वोत्पत्तिवारणाय तत्र पर्याप्तिसंबंधेन तत्प्रागभावस्य हेतुत्वं वाच्यं
व्यासज्यवृत्तिधर्मप्रागभावस्यापि व्यासज्यवृत्तित्वस्वीकारान्न दोष इति भावः एतेनेति विस्तरस्तोत्तिस्त्रापीति · परस्य न तीयस्य
द्वित्वोत्पत्त्यापत्तिः प्रागभावं विनाप्युपपादिता · अत्र केचित् अपत्त्यं तत्वेन तान स्पादर्शोत्पादस्य वारणाय इदं घत्वावच्छिन्नेप्रयत्नं
न मिथ्याज्ञानजन्यवासनानां तत्तद्ध्वंसत्वेन हेतुत्वे हेतुत्वे गौरवमिति लाघवादिदं घटत्वावच्छिन्नमप्यादत्न्यसानप्रागभावत्वेन हेतुत्वं

१२१

२४१

दी० कत्त्वमतइतिप्रागभावसिद्धिः नचतस्यसामग्र्यादितुल्यत्वसंभवेनाभावत्वेमानाभावइति पूर्वोपदर्शितदूषणमसंगतमितिवाच्यंमा

121 वत्वग्राहकप्रमाणाभावेनैवतस्याभावत्वसिद्धेरितिवइतितरसत् ध्वंसेनातिरिक्तप्रागभावकल्पनामपेक्ष्यलाघवेनाद्यजनक

तावच्छेदकतयाजन्यकाभूतवासनास्वेवैकजातिकल्पनायाउचितत्वादितिदिक् अधिकमस्मत्कृतभवानीदीप्रकाशेनुसंधेयं व्या

ख्यायां। संयोगात्यंताभावइति। ल्वप्रतियतपूर्ववर्त्तिताकत्वादिहेतुर्वाप्यइति अत्रावच्छेदकतासंबंधेनसंयोगेप्रतितेनसंबंधे

नसंयोगात्यंताभावस्यहेतुत्वंबोध्यं प्रादेशिकत्वेतिदेशविशेषावच्छिन्नत्वेप्यर्थः एवमग्रेपिप्राकारेणेतिक्ष्मतियतपूर्ववर्त्ति

ताकत्वादित्यत्रावच्छेदकतासंबंधेनतिरतीयांशेऽवच्छिन्नत्वं कार्यतानिरूपकत्वरूपहेतुत्वेकदेशकार्यतान्वयि वाच्यमितिअत्रावच्छे

दकतासंबंधेनसंयोगंप्रतितादात्म्येनयावत्त्वेहेतुत्वंबोध्यं अभावात्तादात्म्येनाभावात् नत्ववच्छिन्नइति अवच्छेदकतासंबंधेन

तत्रेत्यर्थः नचद्रव्यत्वादिपरः उभयेतिसंयोगात्यंताभावप्रागभावावच्छेदकोभयेत्यर्थः हेतुत्वापेक्षयाअनन्यथासिद्धत्वघटक

त्वनापेक्षयाप्रागभावस्येतिक्ष्मतियतपूर्ववर्त्तिताकत्वादिहेतुत्वंअनन्यथासिद्धत्वमात्रे तस्यच प्रागभावस्यच स्वावच्छे राम०

एकावच्छेदेनऽवच्छेदकतानाघटितसामानाधिकरण्यसंबंधेन स्यादितितथा चोक्तरीत्या लाघवात् प्रागभावसिद्धिर्नस्यादिति
शेषः शाखावच्छेदेनेति उत्पद्यमानसंयोगस्य शाखानवच्छिन्नत्वेन नियामकाभावादित्यर्थः यथाश्रुते तु क्रियासंयोगयोः स
मवायसंबंधेन हेतुहेतुमद्भावेनासंगत्यापत्तेः तदवच्छेदेन शाखावच्छेदेन वाऽंशेऽवश्यमित्यादि प्रादेशिकत्वेति तथा च त
द्दशक्रियायां निरुक्तजनकत्वेनैव संयोगस्य प्रादेशिकत्वनियमोपपत्तौ किं तु यथा द्रुकत या प्रागभावकल्पनेनेति भावः
अभावेनेति निरुक्तजनकत्वासंभवेनेति शेषः तत्र तत्क्रियासमये देवे ज्ञेय एवकारस्यान्वयेनेत्यनंतरं योज्यः तथा च तत्र तत्क्रियायाम्
स्येनैवेत्यर्थः एवकारेण निरुक्तजनकत्वव्यवच्छेदः हेतुतया हेतुत्वस्य वकुप्ततया प्रागभावाभावादेवेति तथा च निरुक्तजनक
त्वस्यासिद्धतया प्रादेशिकत्वनियामकत्वासंभवेन प्रागभावस्य तन्नियामकतया कल्पनमावश्यकमिति भावः नन्वेवमपि वृ
क्षाभिमुखक्रियातः शाखावच्छिन्नसंयोगोत्पादे हेतुत्वीरः तस्या एव तत्र सत्त्वेन हेतुत्वसंभवात् न अत आह शाखेति क्रियांतरस्य शा
खाभिमुखक्रियायामेः तत्र शाखावच्छिन्नसंयोगे तत्त्वेन तत्र सत्त्वेन हेतुत्वादिति फलानुरोधित्वात् कल्पनाया इति भावः ली

लाघवमीकारेति तस्य चायमाशयः लाघवात्स्वच्छेदकमनंतभोक्षैव प्रतियोग्यभावयोर्विरोधः मूलेह्यहद्वेनकपिसंयोगइत्यादिप्र
तीतौ तांवच्छेदकतिवृक्षकपिसंयोगावच्छेदकत्वाभावो मूलादिनिष्ठो विषय इति · अथाप्यच्छेदीति नचसिद्धासिद्धिभ्यां व्याघात इति
वाच्यं उक्तविरोधेनार्थतस्तन्निरासइत्याशयात् तस्यैवेति अन्यथाधाराद्वाहिकत्वस्यैवानुपपत्तेरिति भावः। पूर्वत्रप्रथमेद्वि
तीये · चतुरणविशेषस्य निर्विकल्पकावगाहितया चतुर्णास्य · रावकारणतिकारणतांतरानुपगमेप्यतिप्रसंगाभावादितिभा
वः तथात्वं · अतींद्रियत्वं · प्रत्यक्षेतिप्रागभावप्रत्यक्षमर्थः तस्यप्रागभावस्य · संबंधितावच्छेदकेति निर्विकेल्पकत्वमर्थः प्रा
नप्रागभावत्वादीति प्रादिनाप्रत्यक्षप्रागभावत्वपरिग्रहः दीधितौ रावकेति अवच्छेदकत्वादिसंबंधेनेमर्थः आदिनातादात्म्यप
रिग्रहः कार्यभावस्येति यावत्साद्यवच्छेदकस्य वा साध्यहेतुत्वे प्रतिमाप्यमिकनिर्विकल्पकं प्रतिचेति शेषः उक्तरीतिकार्यभावस्य
शरीरावच्छेदकस्येति शेषः उक्तरेत्यस्य निर्विकल्पकोत्तरेत्यर्थः व्याख्यापां पंचमतुरणइतिवनुर्यहरणे निर्विकल्पकोत्तर
णानस्यनाशादितिभावः उक्तरत्वंसंबधं समभिव्याहृतस्य नाशयेनाह ध्वंसावच्छिन्नेति लाघवादाहुनादशेति प्रायमिकनिर्वि राम॰

कल्पकेत्यर्थः शाखादेरिति। संयोगस्याहेशिकत्वनियमापेक्षेति शेषः अतिरिक्तभागाभावेतिरेतस्य हेतुत्वेव न विनिगमनावि
रहः धर्मिग्राहकमानसिद्धत्वस्यैव विनिगमकत्वादित्याशयः द्विसमवायिकारणकस्थले एकस्यासमवायिकारणसंयोगस्य
तत्वेन हेतुत्वादेवतन्तुत्वाद्यनियमसंभवादाह वक्ष्यतीति। चरमतन्तुसंयोगस्य तत्वेन हेतुत्वे द्व्यणुकपटादेः स्वाश्रयतावच्छेदकतन्तुद्व
भिन्नत्वानुपपत्तेराह संख्याविशेषस्येति द्व्यणुकेच। संख्याविशेषस्य द्वित्वस्याद्यनियामकत्वेन असमवायिकारणेनेति चरमतन्तु
गतैकत्वेनेत्यर्थः नादृशेति चतुर्थरूपस्य कारणत्वेनैवेति तथा चैतद्रूपमारातीत्याद्वित्वस्य लाघवासंभवेन प्रा
गभावस्यैव न सिद्धेरिति भावः अत्र प्रथमद्वितीययोः द्वितीयतन्तौ यदा द्वित्वं तस्यासमवायिरूपमिति तस्य समवायिप
त्वे चिद् समवायिसत्वेऽप्यसमवाय्यनुमाह द्वयोर्द्वयोः प्रथमोत्पन्नगतद्वित्वादेव चरमोत्पन्नगतैकत्वस्य च सत्वेनानयोर्विशेष्य
कारणत्वे भिन्नतरसमवायिनां तन्तूनां द्वित्वेन हेतुत्वस्यावश्यकतया नादृशाकारणत्वे मानाभाव इत्यस्य रसादाहव्यायस्तत इति
विनिगमनाविरहेपीति तथा च त्रित्वस्थले पि लाघवाभावान्नमा गमाभावसिद्धिरिति भावः कल्पनान्तरस्य पूर्वोक्तधर्मादिकल्प

 123

नान्वयस्य॰ तत्र त्रित्वादौ॰ एकस्याग्रहेनियत्वाद्वनस्याः सर्वत्राविशेषेणासत्वादित्यसंगत्वेतिभावः एकत्वद्वयमोत्रेतिमात्रपदे
नत्वतीयैकत्वस्यवच्छेदः द्वयोर्हित्विज्ञानेएकत्वद्वयमात्रज्ञानेपि त्रित्वाद्यनुत्पादो विवादपदम्ः द्वित्वज्ञानसहकृतैकत्वज्ञानादेः त्रित्वा
द्युत्पादकत्वमतेतत्रत्रित्वद्युत्पादादृतत्वाद् द्वित्वाज्ञानदशायामेकत्वद्वयज्ञानेतितदित्तिज्ञानविशेषणायामित्येकत्वद्वयज्ञानेतृती
येकत्वमपि विषयस्तज्ज्ञानगतनद्धक्तित्वमेवेत्यर्थः ततत्रित्वप्रतीतिप्रत्ययमाशयः सामान्यतोव्याससम्भवान्निसंख्यायामपेक्षा
बुद्धेर्हेतुः अपेक्षात्वंचनानैकत्वावगाहित्वं॰ नानात्वंचानुगतानाति प्रसक्तेर्द्वित्वादमपूर्वमिति एकत्वद्वयज्ञानत्वेनहेतुत्वंपर्यव
सन्नं त्रित्वादिस्थलेप्येकत्वद्वयज्ञानसत्वान्नव्यभिचारः एवंचोत्कापत्तिवारणाय त्रित्वादौ तृतीयैकत्वावगाहेकत्वद्वयज्ञानत्वा
दित्वादौ हेतुत्वेयत्नामान्ययोरितिमायेनतत्रित्वयस्तितिएकैकस्यतज्ज्ञानस्यतद्वक्तित्वेनहेतुत्वमावश्यकमिति नादृष्येतिति
एकत्वज्ञानेत्यर्थः एवमग्रेपि अपेक्षाबुद्धेः ईश्वरयोगीतरपेक्षाबुद्धेः सयाकारणत्वेतिविनिगमनाविरहेणातत्वेनकार
णताद्वयेत्यर्थः त्रित्वादेः पूर्वत्रित्वादेरसत्वेनविशेषणत्वासंभवादाहायलक्षणीभूयेपि स्वस्यस्वजनकतावच्छेदक सम॰

त्वानंगीकारेत्वाह स्वित्वाघाघ्रेयेति आत्मखंडोपाध्यातिरिक्तस्यानन्तमलस्य स्वरूपतोवच्छेदकत्वासंभवादाह तत्प्रागभावेति
त्वेति युगपदुत्पन्नस्यायुपलक्षकं युगपदुत्पन्नस्वरूपयौगपद्यस्येति येन आत्मयोग्यविशेषगुणो युगपत्संभवतीत्यत आह यौ
गपद्यमिति व्यक्तीतितनतद्व्यक्तित्वावच्छिन्नत्वमर्थः यत्तत्सममितिपौर्वापर्यघटितत्वस्येत्यादिः सामान्यलक्षणेति तदाज्ञानत्वादि
नानन्तानां युपस्थापनेपि तत्तद्व्यक्तित्वावच्छिन्नघटितपौर्वापर्यज्ञानासंभवादिति भावः ज्ञानेच्छेति स्वरूपयोग्यस्य ग्रहादेवेत्या
दिनियतस्यातिरेकेति पौर्वापर्यघटितनियतव्यतिरेकमात्रमर्थः कार्यकारणेति स्वरूपयोग्यत्वं सामान्यतइत्यादिः अवश्य
तिसामान्यलक्षणाकारेणापीत्यादिः अभ्युपेत्येति अन्वयग्रहस्यापि कारणताग्राहकत्वमभ्युपेत्येत्यर्थः वस्तुतस्त्वतीन्द्रियस्य
प्रयोजनाभावइतिभावः इच्छात्वविशिष्टेति इच्छोपलक्षणं ज्ञानेच्छास्थले ज्ञानत्वविशिष्टोपनीतभाने इच्छात्वविशिष्टलौकि
कप्रत्यक्षात्मकस्येत्यपि द्रष्टव्यं तेन ज्ञानेच्छास्थले ज्ञानत्वेच्छात्वनिर्विकल्पककाल एव ज्ञाननाशात् तत्पर्यन्तं तदा ज्ञानत्वादि
नान्वयग्रह इति शंकानवकाशः सामान्यलक्षणानंगीकर्तृविशेषणताज्ञानहेतुत्वानंगीकारेणाति विकल्पकापत्तेर्वेत्या

यायेनाह विशिष्टेतिपर्य्यवसानमात्रलक्षणापर्य्यवसन्नं पंच्ये· एवं किन्त मितिसामान्यलक्षणानंगीकर्त्तृत्वादि· विशेष्यविशेषणानि
नि इच्छात्वप्रकारकगुणाभावेन न तद्दृशोविशिष्टवैशिष्ट्यबोधस्य तत्त्वासंभवादिति भावः इतिमते· इतिसिद्धांतिमते· प्रकारां
तरेण· कस्यनुत्पादइत्याद्युक्तप्रकारेण अन्वयमात्रेति मात्रपदेन पौर्वापर्यव्यवच्छेदः तद्ग्रहस्त्वनुमानादिनैवेति भावः ता
नयोरेवेति वाहुल्याद्देवहुमिनो योगादेर्ह नुत्पादनादिग्रहणोवाहुल्या युत्पात्तिर्नेष्यते इच्छादिकालेचमदुत्पत्तेरिष्यतेराव
वाधकाभावात् अतएव ज्ञानायोगपद्यादेकमनइतिसूत्रेणानयोरयोगपद्यानिषेधसंगच्छत इत्याशय· विंशत्येतीति
चैकपेक्षत्वानानावेशेत्पादसंभवात्तु नियोगपद्यांगीकारेणनिरवयवत्वात् इति चायं विंशत्यंगुलीषु विजातीयतियत्नेच्छोत्वा
दृष्टानुरोधेनमहत्यंगीकारस्यसार्थक्यादेतेनानेतिगौरवसंभवत्येर्थः तृतीयार्थोऽवच्छिन्नत्वसंबंधेन गतत्वेनापि नियतस्यगौरवत्वाभावा
प्रतियोगित्वस्य· अन्यथा एवास्यांगीकर्तृमतेलाघवेनतत्प्रकारकग्रहविषयत्वस्येव तन्नियामकत्वसंभवतीत्यतआह अन्य
थास्वात्मनंगीकर्तृमतइति संभवतीति प्रमेयत्वादिनोपस्थितेस्तादृशव्यवहारजनकत्वाभावादिति भावः नच्छावत्तेनापत्त राम०

क्षनियामकत्वस्यावर्त्तनायतद्व्यावर्त्तेतत्वमागतेच्छाविषयोपाधिस्यैवसामान्यलक्षणावच्छेदकीभिभावः विशेष्यविशे
षणाभावेविनिगमनाविरहादाह प्रकारकज्ञानत्वेनवेति कारणताद्वयस्यावच्छेदकत्वेप्यवच्छेदकलाघवमस्त्येव
नत्वाह किंचेति · बाधेतिआधातिप्रसंगवारणाय सामानाधिकरण्यं द्वितीयमतिप्रसंगवारणाय समानविशेष्यत्वंप्रत्यासत्तिः
तयाचकालिकीव्यापकतासमवायेनव्यापकताविशेष्यतयाचव्यापकत्वेनैककारणतायामेवनिविष्टेतिनातिप्रसंग इतिभा
वः प्रकारविशेष्ययोर्म्मध्येनाधिकभावस्यासर्वत्रदुष्परिच्छेदत्वादाह किंचेति · प्रमेयत्वादिनेतिज्ञानेच्छायांचाव्याप्तेति नोत्पादि
तिस्तत्राह संसर्गस्येहादिरितीतिभावः एवमग्रिमग्रन्थेपिसत्वादित्यनंतरमयंशेषोबोध्यः एकस्मिन्नितिनानाव्याकारणताव्य
त्वे सामग्र्यभावोनानाव्यापकताविशिष्टस्यैकस्यानिवेशादित्याशयः अन्यथा · सामग्र्यभावोनानाव्यापकताविशिष्टायाएक
व्यक्तेरनिवेशे · उक्तातिप्रसंगः उक्तरीत्यातिप्रसंगः तमेवाह व्यधिकरणेतिप्रमास्वत्वसादिनिकाले आत्मन्येवेसादि · नर्किंचि
द्वितीयक्षणेहयैकालिकैरेवाधिकव्यापकतयोः सत्वेनोक्तस्थलेतिप्रसंगवारणायनाहशैकव्यक्तिनिवेशस्यावश्यकतयावपूर्व

१२५

टी.

249

कानि प्रसंग इति प्रघट्टकार्थः वाच्य इति तथा च ज्ञानागोचरविषयकेच्छानुरोधेन सामान्यलक्षणावश्यकीति हृदयं अन्यासक्तिन्न
मिति शास्त्रज्ञानमित्यादि प्रत्ययेन विषयता संबंधोपि सन्निकर्षो नियामक इत्याशयस्तेन न पूर्वापरविरोधः अविशेषादिति यथा
यथि यथार्थख्यातिरूपकार्यजनकयोरित्यादि दोषाभाववैशिष्ट्यग्रहादीति दोषाभावसहितभेदाग्रहादित्यर्थः आदिनादोषस
हितभेदाग्रहपरिग्रहः वस्तुतो दोषाभाववैशिष्ट्यग्रहयोरेकैव संख्यानान्वयः आदिनारजतत्वाभावाग्रहपरिग्रहः उपपत्तिरि
ति नन्वनेनत्वविशेषाद्देव सहकारित्वेन लक्षणासंभव इत्याशयः कारणेति जन्यत्वारित्यादि दोषस्यैवान्यरजतत्वग्रहप्रतिबं
धकदोषस्यैव उपस्थितमिति इदं चानुपस्थितेचेत्यादि पूर्वोक्तदोषनिरासायोक्तं तस्य योभेदाग्रहः नन्निषेधयोरजतभेदाग्रहः
त्वानुपगमादिति भावः तत्पक्षकादिति विभिन्नपक्षकादित्वे साधनपक्षधर्मयोरेकावच्छिन्नसाध्यव्यापकत्वघटितत्वपक्षकाद्युपा
धित्वरूपस्यापरत्वाच्छिन्नसाध्यव्यापकाप्रपक्षकाद्युपाधेरलक्ष्यतयैवाव्याप्तिनिरासादिति भावः उपाधिद्वयस्य साधनपक्षधर्माव
च्छिन्नसाध्यव्यापकोपाधिद्वयस्य सत्प्रतिपक्षतया अन्यथाऽऽसिद्धत्वादिति तात्पर्यात् उपाधिद्वयस्य संकीर्णत्वे व्याप्तेरसंभवस्तत आह असंकीर्ण
त्व एवेति भिन्नत्वं एवेत्यर्थः उदाहरणद्वयं साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिद्वयं दर्शयितुं यथायं घटः प्रत्यक्षत्वाद्धूमि
मत्वं येन दर्शयितुमाह तदुपाधिद्वयस्यासंकीर्णत्वोपपादकं परस्परमेदकमाह पक्षे साध्याभाववत्त्वनिर्वाह्युः प्रत्यक्षः विभुत्वादि
त्याद्यादित्यादिः साधनावच्छिन्नसाध्यव्यापकस्यापीति आत्मत्वादेरिति शेषः पक्षसाधनवदन्यतरत्वेति वा धात्मान्यतरत्वस्य पर्यः

टी० 149

हेतुमतीति घटः प्रमेयः आकाशान्ताद्भिन्नाद्विभिन्नादि तद्व्यापकासंभवइति तत्रपक्षधर्मावच्छिन्नसाध्यव्यापकस्यैवसंभवइत्या
शयः हेतोरिति घटः प्रमेयः प्रमेयस्यघोघ्रयत्वाद्भिन्नाद्वाविभिन्नादिः स्यादितितत्रसाधनस्यापिपक्षधर्मत्वादितिभावः त्रितयं
पक्षवृत्तिसाध्यकत्वहेतुमद्वृत्तिसाध्यकत्वपक्षाद्वृत्तिहेतुकत्वेतित्रितयंव्यापकत्वोपपादनायेति साधनावच्छिन्नसाध्यव्याप
कत्वस्यसाधनसामानाधिकरण्यंविनानुपपन्नत्वादितिभावः नियमेति पक्षावृत्तिहेतुसमानाधिकरणात्वावच्छेदेनसाधनावच्छि
न्नसाध्यव्यापकत्वनियमेनयथा तादृशस्यपक्षावृत्तेः पक्षावृत्तेरिति इदंचपंचम्यंतं एतस्यचभेदः मितयनेनान्वयः भेदश्चप्रकारानुयो
गिकभेदं एवमग्रेपि साध्यवतीतीति अत्रघटः प्रमेयोनित्यद्रव्यत्वादित्याद्यहेतौवुद्भूतरूपवत्त्वस्यहेत्वसामानाधिकरण्याभावात्सा
ध्यवतीत्युक्तं ननुसाध्यवतिहेत्वसमानाधिकरणस्यापिकेवलहेतुसामानाधिकरण्यसंभवेनसाध्यवतिहेतुसामानाधिकरण्यस्य
केवलहेतुसमानाधिकरणात्मभेदकत्वसंभवइत्यतआह हेतुसमानाधिकरणस्येति अर्थतइति अन्यथासाध्यव्यापकत्वघ
टितोपाधित्वस्यैवासंभवादितिभावः लक्ष्यंभेदप्रतियोगिहेतुसमानाधिकरणेलक्ष्यं एतस्यसाध्यवतिहेत्वसामानाधिकरण्यस्य एतम०

भेदकत्वं पक्षाभ्यन्तरे हेतुसमानाधिकरणात् भेदकत्वं पक्षेतरत्वविशेषितस्य साध्यवति हेतुसामानाधिकरण्यस्य भेदकत्वं संभ
वत्येवेत्यत आह स्वरूपमिति पक्षेतरत्वाविशेषितस्यैव हेतुसामानाधिकरण्यस्य भेदकतया स्वरूपत्वमिति भावः मूले पक्ष
धर्मावच्छिन्नसाध्यव्यापकस्य प्राक्प्रदर्शनेन दीधितौ साधनावच्छिन्नसाध्यव्यापकस्याप्रदर्शनमसंगतमत आह
साधनपक्षधर्मयोरिति वह्निर्द्रव्यत्वेति किंचिद्विशेषितवह्निर्द्रव्यत्वेत्यर्थः तेनोक्तेतररूपवत्त्वस्य बाधस्य वह्निर्द्रव्यत्वाय
पक्षधर्मावच्छिन्नपक्षेतरत्वव्यापकत्वेऽपि नक्षतिः प्रमायाः प्रमेयत्वे प्रमेयत्वस्य स्वाश्रयत्वस्यापि वह्निर्द्रव्यत्वावच्छिन्नप्र
मेयत्वव्यापकत्वमत आह प्रमायाः प्रमेयत्वेति ननूक्तेतररूपं प्रमेयत्वस्य विशेषितस्यैव कुतो नोक्तमत आह समवायेने
ति तथाज्ञातस्य साध्यव्यापकतयाज्ञानस्य अदोषत्वादिति इदं च योग्यतासाध्यव्यापकतयाज्ञाते सति दोषाधिरिति यथे
रानित्वदोषत्वमित्याशयेन वस्तुतितस्याभिप्रायेणेति अत्र मूले पक्षस्य शरीरप्रमाणायतनेया शरीरप्रमाणस्य पक्षेतरत्वे पाम
लस्यैव वस्तुतिव्याप्तिपरत्वं संभवतीति ध्येयं सिद्धान्तलक्षणेति वस्तुमात्रासिद्धान्तलक्षणेत्यर्थः अप्रसंगरवेति प

टी·

150

हेतुसाधनवदन्यतरत्वेनेत्यर्थः इत्यंशे चेति तिनयावाईश्वनादिः पक्षधर्मावच्छिन्नसाध्यव्यापकत्वसंभवेपीति ज्ञानाभावदशायां शुद्धसाध्यव्या
पकतया ज्ञातस्य दूषकत्वमानुभविकेनेत्युपपन्नमिति भावः तदवच्छिन्नेति काकत्वावच्छिन्नेत्यर्थः काकत्वप्रकारकप्रमाविषयत्वादे
रिति काकत्वावच्छिन्नरूपामत्वव्यापकस्यापीत्यादिः मित्रातनयत्वपक्षकानुमाने चेति मित्रातनयत्वरूपामत्वसाधकं स्वावच्छिन्नरूपा
मत्वव्यापकत्व शाकपाकजत्वव्यभिचारित्वादित्याकारकानुमानेत्वित्यर्थः मानुषत्वं हवत्वं न इति प्राचां स्वत्वस्यैकत्वादिति भावः अयं
वक्ताचिन्त्यः पाठः एकस्याभावादिति न ध्यायत्वपरेन पदिमानुषत्वरूपहेतोरुपादानेन तद्रूपासिद्धिर्यदि च मित्रातनयत्वरूप
पक्षोपादानेन तद्रूपासिद्धिरिति भावः मित्रातनयत्ववतीति सप्तम्यर्थो भेदस्तत्स्वत्वाभाववत्त्वञ्च यः तथा च तादृश्याः शाकपाक
जत्वाभाववन्मित्रातनयवृत्तित्वाभावादित्यर्थः व्यभिचारिणि मित्रातनयत्वादि हेतौ· शुद्धसाध्येत्यादि शुद्धरूपामत्वादि साध्यव्या
पकरूपामसामग्र्यादिव्यभिचारस्यापीत्यर्थः अखंडाभावत्वमेव विवक्षितमिति रूपामत्वसमानाधिकरणेति· शाकपाकजत्वाबाध
दृष्टेरितीयं च सप्तम्यन्तविशेषणमखंडत्वस्फोरकं नद्भीति शाकपाकजत्वादिहतीत्यर्थः इदमप्यखंडत्वस्फोरकं पक्षान्तविशेषणं राम०

व्यापकाभावस्याखंडत्वेनैव वैयधिकरण्याभावसंभवान्नेत्यतो व्यापकतावच्छेदकाभावस्याखंडस्योपपादने बीजमाह मुख्यसाध्येति· यथामसा
मग्रभावादेरपीत्यर्थः· ताहृशाभावस्य· निरुक्तरूपावच्छिन्नाभावस्य· व्यापकतावच्छेदकस्येति व्यापकतावच्छेदकत्वोपलक्षि
तरूपेणेत्यर्थः व्यापकप्रतियोगिकाभावविवेशे सद्धेतौ व्यभिचारः व्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभावनिवेशे व्या
पकतावच्छेदकप्रमेयत्वाद्यवच्छिन्नाभावाप्रसिद्धिरित्याशयः तथा चेति व्यापकतावच्छेदकत्वोपलक्षितेन तत्तद्रूपनिवेशेत्यर्थः तत्त
द्रूपेणैव व्यापकतावच्छेदकसमनंतर्भाव्य वस्तुगत्या व्यापकतावच्छेदकत्वस्य तत्तद्रूपघटितोक्तरूपेणैव गौरवमिति हेतुतावच्छेदकको
टौ शाकपाकजत्वादावुपलक्षणतयापि साध्यव्यापकतावच्छेदकत्वनिवेशे वैयर्थ्यादिति भावः कतिपयेत्यवच्छिन्नसाध्यव्या
पकमुख्यसाध्यव्यापककतिपयेत्यर्थः अहिंसी सौकर्यार्थमित्यादि· व्यापकतावच्छेदकत्वानिवेशे पूर्वोक्तप्रवासगौरवस्य परिह
रानिमित्तानन्यत्ववनीत्यादिना· हेतुत्वस्यानितत्या वाधिकसंग्राहकतया विकासकत्वेन तन्निवेशसार्थक्यात् व्यपासगौरवं माभा
सताकमेवेति भावः अखंडत्वासंभवादिति ताहृशान्यतरत्वावच्छिन्नेतन्मूलसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभा

टी॰ 301 151

वैतद्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावयोरभिन्नत्वाद्व्याप्यत्वे नैतद्धूमसमानाधिकरणाभावप्रतियोगितावच्छे
दकत्वस्यैवावच्छेदकत्वात् । तादृशाभावनरन्याभावच्छिन्नैतद्धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावावच्छिन्नाभावाप्रसिद्धे
श्चेति भावः । अत्र । एतद्धूमवान्वह्नेरित्यादेः । नासाधकत्वेतितत्र्याच्चसोपाधित्वादिसादि मूलमेतत्स्थलाभिप्रायकमेवेति भावः । व
स्तुतस्त्विति । तत्र्याच्चोपाधेः साधकतासाधकत्वमेवासिद्धमिति सोपाधित्वादिमादि मूलोक्तदोषो न संभवतीति भावः । व्यभिचारे
ति साध्यव्यभिचारेत्यर्थः । एवमग्रेपि न हेतुत्वसंभवः इति पक्षधर्मत्वानिश्चयादिति भावः । समयरीत्येति । उपाधिसंदेहमेव व्यभिचार
संदेहादिति भावः । तथा । हेतुः नन्वेवमसाधकत्वानुमानस्य दोषहेतुकत्वानुपपत्तिरत आह असाधकत्वेतित्वनुमितिं नवापि दोषहे
तुकत्वानुपपत्ता दोषघटितहेतुकत्वमेवाभ्युपेयं तत्र समाव्याप्तिरिति नोत्पमितिभावः । साधनपक्षधर्मघटितलक्षणयोरवधानेना
पत्तिस्वायत्तद्रूपेपीत्यस्य तदभिप्रायकत्वेस्वारस्यान्येवाह पक्षधर्मावच्छिन्नेति अभिधानुमितिश्रनाकांक्षितत्वाभिधानस्यैवा
यंतिरस्तपत्तयातत्र्याचेत्यादिनोक्तार्थतिरोपपादनायतत्र्याभिधानस्यावश्यकत्वादिति भावः । प्रदर्शितं । प्रदर्शनयोग्यत्वं साधने राम॰

तित्साधकेत्यर्थः ज्ञानत्वादिनेति यावत्तत्रैव्यत्रतत्परैनोल्लाव नपरामर्शासंभवइत्याशयः नहिद्वयस्येत्यादिनिरासइत्यंतेनतत्पदे
नसाध्यव्यभिचारपरामर्शोनिसंभवतीत्युक्तं नन्वसिद्धिप्रतिबंधपरमेवास्त्वित्यत आह नवेतिव्याप्तिचेतितन्याप्यपरामर्शयोग्यविशि
ष्टसाध्यव्यभिचारस्याप्रक्रांतत्वेन परामर्शासंभवात्तत्प्रक्रांतत्वार्थमाख्यातमितिभावः पूरयतीतिविशेषणवासिद्धेरभावादित्यादिः एतद
घटेत्यादि अनुपपत्त्यसमीपत्वेन्यर्थः व्यभिचारित्वादिसंबंधेन व्याप्त्यादेः संभवादाह व्यभिचारित्वादेरिति संबंधत्वेपीति अकारेता
तस्यासंबंधत्वमानाभावइतिसूचितं अनभ्युपगमादिति हृत्पतियामकसंबंधस्यव्याप्यतावच्छेदकत्वाभावादितिभावः ननुतथा
पि साध्याभावे नोपाधेरप्यासोनानुमितः इहोपाधिरितिव्यवहारोपपादकत्वादिशानस्यापिकथं चित्प्रकारांतरेणोपपादनसंभवादि
त आह इतरथान्विति तादृशोपन्यासस्यप्रकारांतरेणोपपादनेन्वितिअर्थः इत्येवार्थइति तथाचेदमेवप्रकारांतरेणोपपादनमि
तिभावः वक्तुमुचितमिति तथाचलहृदयानां तादृशोपन्यासोऽनुचितएवेतिभावः ननुसमप्रयाव्यभिचारप्रतियोगितावच्छेदक
त्वल्लहृदयोऽस्पत आह सम्प्रदायेति नोचितमितिउपाधेर्व्याप्त्यादेरसत्त्वेनेत्यादि युक्तमिति तत्तत्रीसालहृदयांविनानसंभवती

टी०

303

तीभावः ननु द्व्यणुकत्वावच्छिन्नं अन्तराद्व्यणुकत्वावच्छिन्नस्य लघुत्वान्नविभागोपपादकत्वादेवास्य काकः श्यामो मित्रातनयत्वा
दित्यादौ साध्यव्यापकत्वाद्वेः शाकपाकजन्यत्वस्योपाधेः पक्षीयसाध्येति काकीयश्यामत्वेन पर्य: साध्यसत्त्वात् साध्यनिर्णयसत्त्वात्
व्यभिचाराप्रसिद्धिः व्यभिचारानिर्णयः बाधावतारे वेति तथा च पक्षसमं तस्मिन्व्यभिचारानिर्णयः सुकर इति भावः पर्यवसि
तेति पक्षातिरिक्तत्वसमं तस्मिन्नपि तादृशसाध्यस्यानिश्चयत्वस्य व्यभिचारनिर्णयसंभवादिति भावः तथा सति पर्यवसितसाध्य
व्यभिचारनिर्णयस्य साध्यसामान्यव्यापकताबोधविरोधित्वे विरोधी वह्निसामान्यव्यापकताबोधविरोधी स्यादिति तथा च समान
प्रकारकत्वेनैव विरोधित्वस्य वाच्यतया पर्यवसितसाध्यव्यभिचारनिर्णयस्य साध्यसामान्यव्यापकताबोधविरोधित्वं न संभवती
ति भावः ननूद्भूतरूपे निरवच्छिन्नकोऽप्याकारस्यैव व्यापकत्वेन मीमांसकमते नोदाहरणाप्रदर्शनस्यानौचित्यादिति भावः पक्षावृत्तित्वे सको
तीति अत्र पक्षावृत्तित्वे पक्षनिष्ठाभावप्रतियोगित्वं एतेनात्मावृत्तित्वमुपाधिनां घटकसंबन्धेनैव वाच्यमन्यथा ईश्वरादेरपि कालि
कादिसंबन्धेनात्मायोगात्कालादिपक्षवृत्तित्वादव्याप्तेः एवं चासमवेतत्वे पक्षे पक्षसमवेतत्वासिद्ध्या समवायेन तत्रोपाधावव्याप्ति राम०

रितिनिरस्तं नन्वेवं पक्षवृत्ते साधनव्यापकस्य सत्त्वे तेनैव वारणात्पक्षावृत्तेः स्थलान्मूले साधनाव्यापकत्वविशेषणं व्यर्थ
मत आह इत्थं चेति सत्त्वे तोयादाविन्धनपर्यसाधनव्यापक इति पक्षाप्रज्ञाविलापादि अभिप्रायस्य साधकत्वस्येति प्रमेयत्वइत्या
दिः सिद्धमुपसंहरति इत्थं चेति विवक्षितं मूले विवक्षितं। असमवेतत्वेत्यादिनेति उभयव्याप्यनित्यद्रव्यासमवेतत्वरूपसा
ध्यस्योपपाद्यसंभवादिति भावः ननु द्रव्यसमवेत इत्यादिना स्फुटतरत्वविवरणमसंगतं तद्व्याप्यवत्ताज्ञानजन्यानुमितेरेव तद्वि
षयकत्वेनानित्यद्रव्यासमवेतत्वव्याप्यवत्ताज्ञानजन्यानुमितेर्नित्यद्रव्यासमवेतत्वविषयकत्वस्य दुर्वचत्वादत आह द्रव्यसमवेत
त्वं हि द्विविधमित्यादि द्रव्यसमवेतत्वविशिष्टेः नित्यद्रव्यसमवेतत्वानित्यद्रव्यसमवेतत्वोभयात्मकद्रव्यसमवेतत्वरूपसामान्यनिश्च
यविषये द्वारकेः विश्राम्यतीति भावः प्रथमाशयः यथा सामान्यतः अनुमितिसामग्री एकविशेषबाधसहिता परविशेषबोधिकान
था सामान्यनिश्चयसहितैकविशेषबाधसामग्र्यपि अपरविशेषबोधिका न ह्यनीमपरविशेषसंदेहानुदयात् एवं चानित्यद्रव्य
समवेतत्वाभाववनिश्चयसहितद्रव्यसमवेतत्वव्याप्यवत्ताज्ञानजन्यानुमितेः पि च द्रव्यसमवेतत्वनिश्चयसहितानित्यद्रव्यसमवेतत्वा

भावव्याप्यवत्ताज्ञानजन्यानुमितेरपि नित्यद्रव्यसमवेतत्वविषयकत्वं सुवचमेवेति अत्रार्थे दृष्टान्तमाह अप्रामाण्याभावानुमि
ताविति नित्यसमवेतत्वाभावानुमितावित्यर्थः अपर्यवसानादिति विषयात्वाभावादित्यर्थः तथा च तदभावव्याप्यवत्ताज्ञानजन्यानुमितेरेव तत्
द्विषयकत्वमित्येवासिद्धमिति भावः अरुणेति अरुणाधिकरणेत्यर्थः उद्देश्यः आन्तरकालिकमानसज्ञानविषयः स्यादि
ति शेषः तथा च साध्ये द्रव्यपदानुपादाने द्रव्यसमवेतेः। नित्यसमवेतत्वाभावानुमितेर्नित्यद्रव्यसमवेतत्वात्मकपर्यवसित
साध्यविषयकत्वरूपस्फुटतरत्वं न सिद्ध्यतीति भावः प्रकारान्तरेणास्फुटतरत्वविवरणप्रकारमाह विशिष्टाभावस्येति अनतिरि
क्त यावद्विशेषणाभावरूप पर्यवसितसाध्यविशेष्याभावाभ्यामनतिरिक्तत्वया पर्यवसानेन तिसृविशेषणाद्धीन्यायादिति भाव
अनित्यत्वाभाववद्वृत्तीति नित्येत्यर्थः परमाणवसिद्धिं विहाय तन्नित्यत्वासिद्धिपर्यन्तानुधावने बीजमाह सावयवत्वसिद्धेवेति द्व्य
णुके द्रव्यसमवायित्वसिद्धावेवेत्यर्थः यद्वा एवं द्व्यणुकस्य संभवादिति तथा च जन्यत्वानुपादानेऽपि रूपादेर्व्यतिरेकसहचारेणा
व्याप्तिग्रहसंभवान्न तदुपादानवैयर्थ्यमिति भावः जातिविशेषेणेति तथा च विजातीयमहत्त्वानधिकरणद्रव्यत्वमेव हेतुरिति भा राम॰

वः अप्रवेशात् हेमाद्यप्रवेशात् (ननु साक्षात्परंपरासाधारणतत्समवायिद्रव्यत्वमेव तदवयवत्वमिति) वैयर्थ्यमिति सम्यगपर
स्यैत्यादि· तादृशेति नियमहत्त्वव्याप्तेन यावन्महत्त्ववृत्तीत्यर्थः अवयवद्रव्ये अवयवद्रव्यमहत्त्वे· तदभावात् तादृशजातेरसंभ
वात् ननु साक्षात्परंपरासाधारणतत्समवायिद्रव्यत्वमेव तदवयवत्वमिति तदवयवावयवस्यापि तदवयवत्वे संभवतीत्यत
आह हस्तत्वादीति परिच्छिन्नपरिमाणवत्त्वस्यैव विभुपरिमाणापेक्षिकापकृष्टव्यवहारनियामकत्वेनान्नियामकतयाम
तादृशजातिसिद्धिरतोऽपकृष्टपरिमाणतादृशाकार्यकारणभावे अवयवद्रुत्वतादृशजात्यवच्छिन्नयोः कार्यकारणभावे अ
पकृष्टेतिभावः साधनं तेनापकृष्टव्यवहारलाभः एवमग्रेपि व्याहृतेमितित्यव्यवहारविशेषणं अवान्तरेति तादृशजात्यवा
न्तरेत्यर्थः वैभववेतीति वैभवत्वं विभुपरिमाणत्वं नन्वननुगतजातिभिरनुगतव्यवहारोनुपपन्न इत्यत आह तथा चेति एकप्र
कारकत्वप्रयुक्तनिरूप्यात्मकव्यवहार एकप्रकारकत्वं व्याप्यतानुबंधितया बोध्यं एकाकारत्वाद्युपयोगस्तु तदात्मकानुगतव्यव
हारस्य नवकृष्टसाधकत्वमिति अन्यथा सिद्धिलाघवादपि तादृशाननुगतव्यवहारादनुगतमहत्त्वादिसिद्ध्यापत्तेरिति भावः सिं

हासम्भवाश्चविनाहृत्यानुगतव्यवहारात्ननुगतहरित्वादिसिद्धाविशापत्तेराह वैभवनिवेशितताहृत्योति इत्यादिना हस्तित्वादीत्यस्य यः
अनुगम इति तथा च निरुक्तजातित्वेनानुगतेनानुगतीकृत महत्त्वविशिष्टत्वाद्यननुगतत्वात्तिभिरेवानुगतस्यानुपरिमाणव्या
प्तत्वविभुपरिमाणापेक्षिकापकर्षव्यवहारस्योपपत्तौ न नाहृत्यानुगतव्यवहारानियामकतयापि न्यमहत्त्वव्याप्यत्वयावन्महत्त्व
वृत्तिजातिसिद्धिरिति भावः कल्पतामिति निरुक्तजातित्वेनानुगमीकृतानामपि हस्तित्वादीनां व्यापकत्वे न गौरवमित्याह
श्चव्यवहारविषयतावच्छेदकत्वासंभवादिति भावः तथापि माहृत्य व्यवहारविषयतावच्छेदकत्वेनेकत्वाहृश्जातमभ्युपगन्तु
रपि जातेः त्रसरेणुमहत्त्वव्याप्यत्वयावन्महत्त्ववृत्तिजातेः महत्त्वयोरिति सम्बन्धे तौ सामानाधिकरण्यघटकाधिकरणत्वादि
तं जात्योः भिन्नमहत्त्वव्याप्यत्वयावन्महत्त्ववृत्तिजातित्रसरेणुमहत्त्वव्याप्यत्वयावन्महत्त्ववृत्तिजात्योः घटपटमहत्त्वेइति तत्रैवे
भवापेक्षिकापकर्षव्यवहारस्य त्रसरेणुमहत्त्वापेक्षिकोत्कर्षव्यवहारस्य च सत्त्वादिति भावः तन्देवेनाहृत्य जात्योरभावेवैभवादि
घोत्कर्षविधितावच्छेदकजातिभिन्नतावृत्त्यजातीनामनुगमात्पूर्वं विभुपरिमाणापेक्षिकापकर्षोऽनुगतव्यवहारोपपादनेपि राम०

त्रसरेणुमहत्त्वापेक्षिकोत्कर्षेऽनुगतव्यवहारः कथमुपपादनीय इत्यत आह एवं चेति नाहंशाजात्योरभावे चेत्यर्थः तत्रापि
त्रसरेणुमहत्त्वापेक्षिकोत्कर्षेऽपि इदंत्वानुगतव्यवहार इत्यनेनान्वितं हार्दमीति हार्दं ग्राहकतर्कः तदेवोपपादयति परमाणु
त्वमपीति तादात्म्याग्रहे गतानादात्म्यग्रहमूलकतर्कैरगतकस्मिन् यदीदं स्वव्यभिचारि स्यान्न तदा स्वात्मकेन स्यादित्याकारकोबोध्यः
अत एव नाशात्म्यग्रहमूलकतर्कस्य व्याप्तिग्राहकयोगित्वादेव तादात्म्यानुमानिश्चयो नद्रूहाभ्यां अन्यथा उपाधिशरीरेऽसत्ता
निवेशे एतद्दृष्टिनैव स्यादेतद्दिग्नाहि वादिनेव तदभिमतं एतद्धाद्यभिमतं अमूलकस्य विहितिवाद्देनइति शेषः ताहृशेतिस
मव्याप्यत्वघटितेत्यर्थः वन्नूपाधिसंशयस्य व्यभिचारसंशयाधायकत्वेन साध्याधिकतया संदिग्धेऽपि व्याप्यैरनिश्चयात्पक्षधर्मताव
लात्साध्यसिद्धिसंभव इति निश्चयपर्यन्तानुधावनमनर्थकमत आह उपाधिसंदेहेति मतेः तत्कोषक्लृप्तेऽपि परिष्करोतिनीमूलो
नहेतोदोषोद्धारे तत्साहि त्वाभयोगपद्यतावृत्तिव्यक्ताभावादिकालीनपक्षधर्मताधीनानुमितिविषयता दोषः मूलोक्तदोषःस्या
दि नोतितथाचसोपाधित्वनिश्चयकाले साध्यसिद्धिसंभवेऽपि कालान्तरे तत्साध्यसिद्धिमादायसाध्येपक्षधर्मतावलम्बनम्

टी॰ 155

309

संभवान्न निरुक्तलक्षणयोः संभव इति भावः यद्रूपावच्छिन्नं यद्रूपाक्रान्तं तत्समनियतेपि व्यापकतायाः स्वरूपतो ऽविरोधित्वादाह विरोधित्व
मिति यत्किंचिद्विशेषप्रमाणस्याव्यावर्तकत्वादाह प्रमाणेति ज्ञानत्वं विहाय प्रमाणत्वनिवेशबीजमाह तेनेति प्रमाणत्वनिवेशेनेत्यर्थः प
क्षवृत्तिधर्मस्येति पक्षीयसाध्यव्यापकतायामप्यन्वितं पक्षाभावस्य मदृशायामिति इत्थं च पक्षीयसाध्यव्यापकपक्षवृत्तिधर्मनि
ना योग्यज्ञानत्वघटितस्य साध्यसिद्धिविरोधित्वस्योपपादकतायोगेन नातिव्याप्तिरिति पक्षे साध्यसिद्धिविरोधिनः पक्षीयसाध्यव्या
पकपक्षवृत्तिधर्माभाववत्ताज्ञानस्य प्रमात्वाभावेन पक्षीयसाध्यव्यापकतायां विरोधिप्रमाविषयत्वरूपविरोधित्वाभावादि
तिभावः अत्र पक्षवृत्तिधर्मेतिव्याप्तिवारकस्य मानत्वस्य तद्घटिततयाः यत्किंचित्पक्षवृत्तित्वेन धूमं तज्ज्ञानपर्याप्तत्वं उपाधितावघट
कसंबंधेन वाच्यत्वस्य तत्तयाः समवेतपक्षे ऽप्रसिद्ध्या तत्र स्वसमवायेनोपाध्यव्याप्तेः किंतु पक्षवृत्तिसंबन्धाभावप्रतियोगितावच्छे
दकरूपावच्छिन्नत्वरूपं तस्य च व्यापकताविशेषणत्वमेव समुचितमित्याशयेनाह स्वेति पक्षवृत्तिधर्मेतिव्याप्तिवारणाय
विरोधित्वस्य प्रमात्वघटितत्वे चेत्यर्थः रूपेणेति व्यापकताघटितमवच्छिन्नत्वं तन्नोपाध्यः विरोधिज्ञानविषयेति विरोधितान राम॰

विषयतावच्छेदकेत्यर्थः तेन व्यापकतामात्रस्य समूहालम्बनात्मकानिरुक्तज्ञानाविषयत्वेपि न क्षतिः दुर्वचमिति व्यापकत्वस्य
तद्घटितत्वादिति भावः उक्तव्यापकत्वस्य फलोपधानरूपत्वे सर्वत्रासंभव इति तत्र यत्नयोग्यतारूपत्वमभिप्रेत्याह एवं चेति
ननु व्याप्तिनिरूपकतावच्छेदकतया साध्याभाववत्त्वस्यापि नाहृत्रतानविषयतावच्छेदकत्वेन तद्व्यतिरेकप्रतियोगित्वेन साध्यः
तिप्रसंग इत्यत आह तादृशज्ञानेति नान्विदमसंभवि साध्याभाववद्वृत्त्यापाद्यभाववान् पक्ष इत्याकारकपरामर्शे पक्षधर्मत्वस्य सं
सर्गनियामानेनाप्रकारतया निरुक्तावच्छेदकत्वासंभवादित्यत आह व्याप्यविशेष्यकेति साध्याभाववद्वृत्त्यापाद्याभावः पक्षवृत्तिरित्या
कारकेत्यर्थः तत्त्वं निरुक्तावच्छेदकत्वं कथमिति तत्र्याव्यहेतुकत्वादावव्याप्तिरिति भावः कथमसुद्धे इति तत्र च शाकपाकजत्वादा
वव्याप्तिरिति भावः स्वरूपतस्तद्धर्मराहित्यमप्येव्यिन्वकरमत आह तत्त्वेन निर्मिन्न इति समानविषयत्वेनैव विरोधित्वमभ्युपेत्याप्या
ह एवमिति निरर्थकमिति वह्निसामग्र्या हेतुपदार्थतत्त्वव्यतिरेके साध्यासाध्यविरोध्युत्पादकत्वाभावेनैव वारणादिति भावः
संमुग्धाकारेति साधारणेत्यर्थः न हेत्वोपपादयतीति नेति निरुक्ते निवर्तकतात्त्विकत्वाभावादिति न्यायाद्रि– ननु तद्धर्मावच्छिन्नगतार्थकमिति व्यभिचारा

व्यापकतावादिभिरसंगृहीतस्य साधनव्यापकस्यैकस्य संग्राहकत्वम् नन्वाह व्यस्तेनेति स्वसंमतेत्यादि लक्षणतायां स्वमतेन लक्षणता-
यां अतिव्याप्तिरिति एतच्च लक्षणाकर्त्रसंगृहीतत्वेनालक्ष्यत्वादिति भावः पक्षधर्मेः पर्वतो धूमवान् वह्नेरित्यादावार्द्रेन्धनादेः असंग्र-
हः इति पक्षमात्रवृत्तित्वघटितलक्षणाभावादिति भावः ननु मतद्वयमपि न तदुपाधेरसंग्रहे गमकप्रयोजकमत आह तथाचेति अस्मा-
पि साधनाव्यापकत्वघटितलक्षणाव्याप्तेः नोपि साधनभेदेन तद्भेदेन सोपाधित्वनिरुपाधित्वाभ्युपगमेन साम्यं स्वसाम्यं तथात्वं सो-
पाधित्वे निरुपाधित्वं च नेयपक्षेनैव चिन्तामणिकृन्मतेव॥ ॥इति महादेवरचितायां सर्वोपकारिण्यामुपाधिपूर्वपक्षव्याख्या॥

॥इत्यादेरिति मूलस्येति शेषः वक्ष्यमाणामिति मूलमिति शेषः लक्षणेनेतीति यद्यपि अत्र व्याप्तिलक्षणादावेव लक्षणतावच्छे-
दकानभिधानेन दोषस्तथाप्यत्र लक्षणतावच्छेदकस्य व्यभिचारोन्नायकत्वादेः मतिभेदभिन्नतया तदभिधानमावश्यकं स्वमीया-
ईइति पक्षाभिचारित्वेनेत्यत्रेत्यादि बाधादिति उत्पन्न एव तत्कारणत्वादिति भावः उत्तरपक्षे इति साध्यव्यभिचारोन्नायकेत्यर्थः तस्य-
यद्व्यभिचारित्वस्य नवाधितमिति व्याप्तिपक्षधर्मतावद्रूपलिंगत्वेन तस्य कारणत्वाबाधादिति भावः अव्याप्तस्येत्याभीति याम०

अनुमापकोपाधावव्यभिचारित्वाभिप्रायेणोक्तं व्यापकानुपाधावतिव्याप्तिरिति भावः अनियमनादितिलक्षणे मकारविशेषस्या
भिवेशादिति भावः संग्रहायेति गौरमित्रात्मनयस्यपर्यालोचिद्धिकरणमाहायसंग्रहोबोध्यः इष्टिवेनोद्वृत्तित्वमित्येवपाठेन नुद्ध
त्तित्वसामान्यमित्याशयेनाह वृत्तित्वमिति सामान्यपदेनिवेवाहिकेत्यादि नानोदेशीधर्मो सामान्यपदाभावादसंगतिः असंगता
द्यसंपत्तिवद्गामारामरीत्येत्यादि नन्वेवं ताद्दृशवृत्तित्वसामान्यस्यसाधनाद्वृत्तित्वादसंभवइत्यतआह व्याप्यस्यादीति तद्धर्मकव्यापकादि
पदेत्यर्थः अवच्छेदकेतिस्वन्वयितावच्छेदकेत्यर्थः अन्वयः व्याप्यादिपदार्थविषयः अन्यथानस्यवृत्तित्वनास्यान्वये वृत्तित्वा
दिपदेनिवृत्तित्वादिबोधकस्याद्विपदेस्यर्थः (अवच्छेदके) यत्र्लोसाधनवृत्तित्वेनस्वान्यत्रवृत्तिपदं बोध्यं आधेयतावच्छेदकेतिताद्दृशा
वृत्तित्वावच्छेदकेत्यर्थः सामानाधिकरण्येनेति अन्वयोबुद्धितियत्नात्सम्भवइत्यनुषंगेणान्वयः तेन ऊर्ध्वस्थलनिवेशेन वृत्तित्वसामा
न्येसाधनवृत्तित्वाकावघीतिवैचाच्चित् सामान्यपदाभिप्रायेशंतेनयत्र्लतेतादृशोऽभावेपिनक्षतिः तद्धर्मघयेति आधेयतावच्छे
दकाश्रयेत्यर्थः तत्तव्यक्तित्वेनसाधनवृत्तित्वसत्वेनेव क्षत्यर्थइतिवृत्तित्वादिपदसमभिव्याहारइतिविभक्तिविपरिणामेनानुषज्ञ

टी. १५७

न्वयः तेन नानान्वयः तथा चोक्तस्वरूपमनुसारणीयोऽप्यत्वान्वय एव वौवाहिकसामान्यपदे यादृशं नन्नु साधनप्रसिद्धिव्याप्य इति ना
संभव इति भावः दोषिनोऽप्रसिद्धत्वसामान्यमपि तिपाद्येव इति नान्वयतार्थस्य व्याहतत्वादित्यादि नतु सामान्यपदं नोपात्तमिति दी
धितिकृतेत्याह तथा यत्ताहशायाश्रयत्वे युक्त इति भावः दृष्टान्तपदस्य संधनत्वो यत्र हेतुकलेदृशत्वादिनैव स्यात् दुरुसंधे विज्ञानवद्दुप्रो
हिसंधनत्वयरत्वेवा संयोगेन हेतुतायामप्यप्रसिद्धेर संभवादाहयथाश्रुतमिति अप्रसिद्धत्वेनेति आर्द्रेन्धनादेर्लङ्घनाय सत्त्वा
पहेतुनाघटकसंबंधेन स्वस्तित्वस्वावच्छिन्नगीयत्वादितिभावः विशेषितमिति इदं चावच्छिन्नसाध्यव्यापकोपाधिसंग्रहाय तत्र
शुद्धपाकपाकजत्वादिव्यभिचारस्य काकत्वादौ व्यभिचारे तासाध्यव्यभिचाराव्याप्यत्वेपि सत्त्वाभिव्यातनयत्वश्यामभित्रातनय
त्वमात्रविशेष्यकधीविशेष्यत्वादिसहितस्य साध्यव्यभिचाराव्याप्यत्वादितिभावः अविशेषितमिति शुद्धसाध्यव्यापकसंग्रहाय
सामान्यगर्भतायामिति व्युत्पत्तिवत्त्वलभ्यत्वात्तस्या इति भावः स्वरूपासिद्ध्यर्थ हेतोः पक्षधर्मत्वार्थेना वन्मात्रविशेष्यकत्वस्य ताव
च्छिन्नविशेष्यकत्वाभावस्य तयाः स्वंशाभावघटकतयाः वैयर्थ्यादितिभावः धूमप्रागभाववद्वेर्भिदाहवैयर्थ्यमित्याशयेनाह राम०

157

तद्धिशेष्यत्वे सतीति । इत्यस्य । इत्यस्यैव सामर्थ्ये अनुमापकत्वसंभवे वैयर्थ्यादिति जलत्वोपादाने तु तत्रैव व्यभिचारवारणाय
तत्सार्थकमिति भावः तन्मात्रेति सत्त्वादित्रितयमात्रेत्यर्थः अप्रसिद्धेति जातिमात्रे धर्मिमानस्यावश्यकत्वादिति भावः गंधाभ
वेति यावत् तत्र व्यभिचार इति भावः विशेष्यांशे इति विशेष्यतारूपांशद्वयमित्यर्थः विशेष्यं पृथिवीत्ववद्वृत्तित्वं नोपाधीति न पा
वात्र पृथिवीत्वाभावे तत्राप्रसिद्धिरिति यावत् किं विशिष्टेत्यत्र न विशेष्यत्वे वैशिष्ट्यादिलक्षणं तत्स्वरूपं तत्र ह्रस्वत्वमिति भावः नोपाधित्वं
नोक्तलक्षणतावच्छेदकाक्रान्तत्वं तादृशव्यवहारे निरुपाधिव्यवहारे इत्यर्थः निरुक्तेति साध्यव्याप्यत्वेनाभिमतव्यभिचारप्रतियोगि
त्वस्येत्यर्थः एतस्य गौरवेणात्राधीतिमेतावत्त्वयः व्याप्यत्वासिद्धव्यापकत्वादिकमिति हेतोरिति स्यादिति पदोपसंग्रहात्साध्यव्या
प्यत्वासिद्धव्यापकव्याप्यत्वाभावप्रतियोगित्वस्यैवेति व्याप्यत्वासिद्धप्रतियोगित्वस्येति पाठे व्याप्यसिद्धिपदस्याभावोऽर्थः यद्ध
र्मावच्छिन्नाभाववद्वृत्तित्वं किंचित्साध्यावच्छिन्नविशिष्टवृत्तित्वसामान्याभावः साध्यस्य तादृशव्याप्यत्वाभावव्याप्यः साधने हेतोश्च तद्धर्मवत्त्व
स्य व्यभिचारपदद्वयस्याप्यव्याप्यत्वपरतालभ्यस्यैवेत्यर्थः प्रथमोपादानं तु व्यर्थत्वात् तेन तस्य पूर्वमेव तादृशावच्छेदकत्वखंडः

टी. नेपितयौ नतत्रांके विनिति अत्र पृथिवीत्वाभावादिव्याहृत्तोपाधिव्यवहारविषयतावच्छेदकमवस्थापनप्रकरणेनाहृदशारस्यां
158 नरत्वेइनस्यैवोचित्येन पृथिवीत्वाभावादिसाधारणत्वहृदशारस्यांनरत्वेइनस्यानौचित्येन संदर्भविरोधोस्त्वरसोद्घत्वः कश्चित्तुकेवि
त्वित्याद्यिमतानंतरमन्तरोवेति पाठस्तत्राप्युक्त एवार्थः। यथ्याश्च नेपृथिवीत्वाभावादिसाधारणत्वहृदशारूपत्वेइनानौचित्यासंस्
गतेमनियोगित्वस्येति वाकारश्च पाठस्तु मामाद्दिकएवअत्र नत्वाभाव्यमितिनिरुक्तयाभ्यभावः साध्यः एवंहेतावपि पृथि
वीत्वाभावसंग्रहायाहविशेषिताविशेषितेनेति तज्ज्ञापकत्वइति समप्यर्थी घटकत्वंव्याप्याद्यन्विते· साधनस्येति षष्ठ्यर्थो
धिकरणत्वे साध्यव्यभिचारपदार्थैकदेशे साध्याभावव्यन्वितेइत्यं वसाधनवति साध्याभाववत्वस्योपाध्यभाववत्त्वस्यचला
भेपेक्षेयंत्याद्यमित्याशयः मूलार्थइति दोषपरिहारो नमूलार्थइत्यर्थः ननु दोषरहितस्य तत्तानेष्टुपाधिव्यवहारविरहेरागौ
रवसत्वेपि दोषसंकलितस्यैव तथात्वमुपेयतइत्याशंकते दोषिनीतत्रूपेति आरोपांतत्रूपस्यमितहेत्पाद्युक्तरूपस्येत्यर्थः व्य
भिचारस्य साध्यव्यभिचारस्य प्रतिस्फुटतयेतितथा चोपाधिनाव्यभिचारोन्नयनं तस्मादुपाधित्वज्ञानएव साध्यव्यभिचारज्ञा राम०

नास्तीति भावः त्वदुक्तेपि समयैवमित्याशयेनाह त्वदुक्तेपि तुल्यमित्यस्यार्थ इति तत्रापि विरुद्धसाधारणयोः स्वव्यभिचारस्यातिस्फुटत्व
स्य च तुल्यत्वमित्यर्थः तथा चाद्येप्याद्युक्तेनहेत्याद्युक्तोभयोरेव ज्ञानेप्युपाधिव्यवहारविरहेणालाघवस्याकिंचित्करत
यानायत्यागुरुरपिपदकर्मावच्छिन्नाभावेत्याद्युक्तधर्मस्योपाधिव्यवहारविषयतावच्छेदकत्वमिति भावः पृथिवीत्वाभाववदावृ
त्त्येकाधिकरणमंतर्भाव्य हेतौ स्वसाध्यव्यभिचाराभावादिति भावः अत एव सर्वसाध्यसमानाधिकरणास्सदुपाधयः
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारितेति प्रागल्भैरुक्तं अधिकरणस्यापि॰ नहुमविशिष्टाभावापत्तिस्थितयालिंगि[?]धिक
रणस्यापि॰ एवमग्रेपि॰ अग्रवैशादिति तथा चोक्तविवक्षणासंभवेनोक्तव्याप्तिदुर्घटैरिति भावः एतेनेत्यादिवक्ष्यमाणा
रीत्योक्तातिव्याप्तेरसंभवादाह एवमिति आधेयतायानिरूपकतावच्छेदकभेदाद्धेतेन द्रव्यसमवेतत्वेन द्रव्याभिन्नसमवेत
त्वयोर्नैक्यत्वमतव्याप्तेरहेतुनिष्ठेति उक्तव्याप्तेः नाद्यात्म्येनव्याप्तेः येन च स्याभावादिति व्याप्यतावच्छेदकसंबंधेनैव पक्षधर्म
ताज्ञानस्योपयुक्तत्वे चोपाधिव्यभिचारस्य तादात्म्येनपक्षावृत्तितया तादात्म्येनव्याप्येव्यभिचारोन्नयनयोग्यतायाअसंभवादि

टी. तिभावः द्रव्यत्वाभावे नेतीति अत्रानुज्ञापकत्वमुक्तं यन्नयोग्यतासाध्यव्याप्तिपक्षधर्मतारूपा एव सम्बन्धाभावघटितेपि नवसं

159 योगो द्रव्यत्वादित्यादौ विभागाद्यवृत्तिव्याप्तिरिति वाच्यं व्याप्तेः प्रतियोगिवैयधिकरण्याघटितत्वात् विशेष्येतिसंयोगाभा

वेत्यर्थः गुणो द्रव्यत्वाभाववान् गुणत्वादित्यादौ विशिष्टाद्यव्याप्तेरेव सम्पन्नत्वादिति भावः अत्र न मितिपरं भावत्वेन व्याप्यत्वाप

अविवक्षणादित्याशयः यद्भाववमात्रवृत्तीति नच यद्भावत्वेनैव सम्बन्धकृ अभावरूपोपाधावव्याप्तेः अव्याप्तिः द्रव्यं स

त्वादित्यत्र संयोगाद्यावृत्त्याप्तिः यद्रूपवत्त्वेनवेतीति न च संयोगवदन्यत्वस्य गुणो द्रव्यत्वाभावो ज्ञापकत्वेन जले गंधा

भावानुज्ञापकत्वेन च द्रव्यं सत्त्वादेर्धवद्रव्यत्वादित्यत्र संयोगादौ नाव्याप्तिरतिव्याप्तिश्चेति भावः पूर्वेति पक्षमीविच्छिन्नाभावे

त्यादीत्यर्थः अस्यापि तुल्यत्वेनेत्यस्य परम्परयोपाधित्वस्यापि केचिदित्यत्राखरसं संसूचयन्नाह वस्तुतस्त्विति यत्पर्याप्त्यव

च्छिन्नस्य यत्पर्याप्त्यवच्छेदकावच्छिन्नस्य साध्यसमानाधिकरणार्द्रेधनादेरार्द्रेधनत्वादिनोपाधित्वेत्याह उपाधितावच्छेद

कस्येति उपाधितावच्छेदकतापर्याप्त्यधिकरणस्येत्यर्थः वृत्तितावच्छेदकत्वेन तत्पर्याप्त्यधिकरणत्वं वक्तव्यमिति अत्र याव गम०

मवाच्चन्द्रेरिसत्र हृदवृत्तित्वविशिष्टद्रव्यत्वत्वादिनोपाधिनापत्तेरितिभावः लाघवं लाघवादितिग्रंथे यो लाघववैयर्थ्येन
विशेषणांशवैयर्थ्येन· धूमाभावेति द्रव्यत्वत्वावच्छिन्नाभावादेरेव धूमाभावो व्यापकत्वादितिभावः तथा चान्तरवेत्यादिग्रंथा
दः सम्यगेवेत्याशयः महानसेतिपक्षाभिचारित्वेनेत्यादि पूर्वोक्तस्यार्थः तन्मते यावत्स्वन्तरस्विनिकल्पव्यभिचरतया अनुमान इति
अत्रवारणाभावप्रयुक्तेत्यामनुमानत्वात्स्वानुमितिजनकत्वात् मनुमितिस्त्वार्थः तस्य च यथा संरक्षेन हेतुमत्वभानेसा
ध्यवत्वमानेवान्वयः साध्याभावेति साधनवतीत्यनुषज्यते तद्धदितितद्धर्मिणोपाध्यभावसाध्याभावयोः परिग्रहः अन्ययोः
पूर्वकल्पेतत्कल्पयोः अवच्छिन्नत्वस्याव्यावर्तकत्वादाहतउपाधिनेतिपुनः शब्देनताहृशोपाधित्वाभावः सूच्यते इत्याशयेना
ह व्यभिचारानुमानस्येति पूर्वस्य साध्यसमानाधिकरणत्वेनेत्यस्य· द्वितीयस्य साध्यसमानाधिकरणाद्धन्नित्वे नवे सत्त्वेनोपाधि
त्वमितिरहृदं यत्पूर्वकल्पानुसारेणाद्वितीयेतरवच्छिन्नाभावस्येत्यायुक्तरीत्योपाधिव्यापकत्वाभावात् अत्र तद्धर्मावच्छिन्नपक्षोक्ती
त्यादेः सर्वत्रावच्छेदकत्वेन तत्पर्याप्त्यधिकरणत्वं तेन नोपाधिव्यापकतातद्वस्थ्यं व्यभिचारितयेति धूमवतीत्यादिकं विदुःशेष

दी· १६०

319

रोत्निनिर्धूमवह्निमत्त्वादिविशेषणतात्पर्यः व्यर्थतयाविशेष्यत्वकृत्त्वाभावस्य व्यर्थतयातदनुसारेणाद्वितीयकल्पानुसारेणतद्विशे
षणं साध्यसमानाधिकरणत्वादिविशेषणतो· साध्यसमानाधिकरणत्वादितितयाचस्पर्शाभावस्य जलपरमाणौ अव्याप्त
त्वावच्छिन्नसाध्यव्यापकतयासाधनाव्यापकतायावसंगात्स्वत्वमेवेतिभावः पूर्वं· तेन जलत्वकृत्त्वाभावेनादिनानद्धारणे
तिनद्द्रव्यस्योपाधितावारणतात्पर्यः तदंते गर्भाव्यापिपदं भावस्योपाध्यव्यापकतावच्छेदककोटिप्रविष्टस्य विवक्षणामभ्युपगम्यापित
त्र· स्पर्शाभावजात्यगत्त्वाकृत्वाघवायातेअप्रयाग्नीवस्पर्शजलत्वादिमद्वृत्तितेनेत्युक्तौ स्वद्वृगौ स्वापत्तेरितिभावः उत्तरत्रापिप्र
तियोगीनसाहृद्वृत्तित्वस्यैवचेत्यत्रतस्य तद्वृत्तित्वस्यैवेत्यत्रवयथायथं यथोक्तरीत्या वोध्यं शाद्वृत्त्वाघवायप्रयेमायस्यजस्या
पिवरमंहूयराहृतेवोध्यं इदं च तदेतेनभाषितं ताम्यनुत्तिहानं चः मौनिवारेणेति उक्तविवक्षणासंभवेपितदभ्युपगमवादेनेता
र्यः तथाविवक्षायां तदेतनमीवविवक्षायां· सदुपाधौ· महाकालत्वाभावप्रकारकप्रमाविशेष्यत्वादौ· उक्तत्वात्· द्वितीय
कल्पस्यावतारणिकायामुक्तत्वात्तवहम्मानलहृत्वाहृतांतइतिघटेसाध्यव्यापकत्वात्गगनादौ साधनाव्यापकत्वादि राम०

320

तिभावः घटोपयुत्पन्नविनष्टघटे घटत्वाभाववत्संयुक्तत्वेन साध्याव्यापकत्वमाशंक्याह घटोपयुत्पन्नेति घटत्वाभावव
वत्त्वं घटत्वेन घटावयवेष्वेव याहः वस्तुतो गगनादेरवृत्तित्वाद्वाह वृत्तिमत्त्वे सतीति उक्तरीत्याः धिकरणस्यैव पक्षेन साधकत्वाभा
वेक्यं साधकत्वमत आह इति घटत्वादेरिति महाकालस्यो घटादिस्पन्नोक्तरीत्या सद्धेयाभावत्वान्व्यापकाभावस्या
प्यत्वावच्छेदकत्कोटिप्रवेशासंभवादाह व्याप्यायां श्रोष्ठिवादेनेति अभ्युपगमवादेनेत्यर्थः सत्वादिति गगनपरिमाणा
दिवृत्तित्वात्मकयोर्घटत्वव्यभिचारित्वघटत्वव्यभिचारित्वव्यभिचारित्वयोरभेदादिति भावः समवायेन वृत्तित्वमेव व्या
दिवृत्तित्वादिति तथा च रूपादिवृत्तित्वात्मकस्य घटत्वाभाववत्संयुक्तत्वाभाववत्समवेतत्वस्य घटत्वव्यभिचारित्वव्यभिचारित्वस्य घ
टत्वाभाववत्संयुक्तत्वरूपघटत्वव्यभिचारित्वाभेदेन संभवतीति भावः घटत्वव्यभिचारित्वस्य घटत्वाभाववत्समवेतत्वा
त्मकघटत्वव्यभिचारित्वस्य तदभावस्य ताहृशघटत्वव्यभिचारित्वाभावस्य च अखंडत्वे घटत्वाभावभिन्नत्वे घटत्वाभा
ववत्तियदादेरेताहृशघटत्वव्यभिचारित्वाभावात्सत्वेन समानियतत्वाभावादिति भावः न च घकीति घटत्वव्यभिचारित्वा

टी. १६१

321

भावप्रकारोऽयमर्थः घटत्वेसत्यादिनिरूपकतावच्छेदकभेदेन शक्तित्वभेदादिति भावः नैयत्याभावेप्यनतिप्रयोजकत्वादाहवस्तुतस्त्विति नवि
वह्निमद्भिन्नत्वस्य महाकालामावत्वादिमत्त्वोपाधावव्याप्तेरिति भावः घटत्वेनेति न्यायेत्यादि आशयं मत्वेति तत्त्वाद्यांतरार्थकेय
मिति भावः प्रतियोगिनः प्रतियोगितावच्छेदकावच्छिन्नस्य तद्वृत्तित्वस्यैवेति एवकारः प्रतियोगिनइत्यत्राप्यन्वेति दीधितावप्ये
वं तत्रापीवकारस्यावच्छेद्यस्यायोगोलकत्वाभावाभावत्वानवच्छिन्नेन तद्वृत्तित्वे यादृशहेतुत्वस्याभावएवानुपाधित्वे बीजमिति ध्येयं प्रां
तिमुद्धारयति दीधितौ तस्येति व्याख्यायां साध्याभावे निरूप्ययोगोलकत्वाभावाभावत्वावच्छिन्नेनेत्यादि हेतुतावच्छेदकरूपेणाप्रयो
गोलकत्वत्वादिरूपेण उपस्थितत्वात् अयोगोलकत्वादेरुपस्थितत्वात् साध्यावच्छेदकत्वमपि नेत्यनुपपत्ते नीलधूमत्वादेरिवल
घुधर्मघटितस्यैव व्याप्यतानवच्छेदकत्वेन कंबुग्रीवादिमत्त्वादेर्व्याप्यतानवच्छेदकत्वमेवासिद्धमतआह तत्रेति कंबुग्रीवादिमत्त्वाद्य
विन्यर्थः लघुधर्माप्रवेशोपीति तत्त्वाच्च लघुधर्मघटितस्यापि तत्समनियतस्य गुरुधर्मस्य न व्याप्यतावच्छेदकत्वं लघुधर्मस्यावच्छे
दकत्वेनैवोपपत्तेरिति नियर्यवसितं लघुधर्मघटितस्य गुरोर्व्याप्यतावच्छेदकत्वे बाधकाभावः नियमेन लघूपस्थितावेव गुरोरुपस्थितेरिति एवं

गास्योचितत्वादिमस्वरसाधारणाहुरिति तथात्वासंभवादिति निरुक्तावच्छेदकत्वासंभवादित्यर्थः क्रमेणामित्रानतयत्वादीनां धर्मत्वा
घव्यापकत्वात् धर्मत्वाघव्याप्यत्वात् धर्मत्वावच्छेदकत्वे मानाभावाच्चेति भावः यद्धर्मवत्तीति यद्धर्मवद्वृत्तिसाध्यमित्यर्थः य
द्धर्मसामानाधिकरण्यविशिष्टसाध्यमिति यावत् शोधितो साध्यसाधनसंबंधेतिसंबंधः सामानाधिकरण्यं तत्त्वव्याप्यतास्वनि
रूपकत्वादाश्रयत्वसंबंधेनेत्याशयः लाघवाद्धेतुव्यापकत्वात् यांसाधनविशिष्टेतिसामानाधिकरण्येनेत्यादि साध्यसाधनसंबं
धेति साधनविशिष्टसाध्येत्यर्थः यथाश्रुतशब्दात् यद्धर्मावच्छेदेन साध्यमित्यादिमूलग्रन्थात् लाभः लाभोवाच्यः इतीतितदसं
गतहेतुत्वेनान्वितः इत्यतः इत्याद्यपात् आह न चैवाहमाद्यधर्मविरोति साधनव्यापकीभूतद्रव्यत्वादिधर्मेत्यर्थः अन्यतरत्व
मिति साधनवत्तामात्रसाध्यवदन्यतरत्वाद्युक्तमित्यर्थः ताद्रूप्येणाव्यभिचारत्वेनव्याप्यत्वमितितद्धेतुकोक्तत्वात्निरूपकतासंबंधः
तत्सत्वेपि निरूपकतासंबंधेनोक्तरूपव्यभिचारसत्वेपि उक्तरूपावच्छिन्नेति साधनव्यापकीभूतधर्मावच्छिन्नेत्यर्थः साध्यव्याप
कत्वमिति वह्निरिन्द्रियाग्रत्यत्वस्येति शेषः अतीन्द्रियधर्मसमवायीति समवायेनातीन्द्रियधर्मवानित्यर्थः जनकत्वावच्छिन्न

टी०   १६२   323

102

स्येति जनकत्वस्य जनकत्वरूपसाधनव्यापकत्वादित्यभिभावः साध्यस्येति गुरुत्वस्य पतनानात्मककार्यानुकूलत्वानीतोद्रिपत्वादित्यभा
वः वह्निरिन्द्रियामनःपदत्वस्य घटादेः साध्याव्यापकत्वात् व्यमुपाधित्वमतआह गुरुत्वावच्छिन्नेत्यादि इति मतेनेति स्पर्शवन्मात्र
वृत्तित्वमतेयानस्यामूर्त्तत्वावच्छिन्नसाध्यव्यापकत्वं बोध्यं लक्षणपाद्यमनोपाधिपरतयोक्तिलक्षणयाम्योपाधिपरतयापीतिवो
जनावह्निमत्कारकमनस्त्वाभावात्मकोपाधिपरतयापीत्यर्थः घटस्येति सघटइत्यर्थः तद्धर्मोपलक्षितधर्मविशिष्टेत्यविशिष्टस्त्वमि
त्यर्थः अनुगमयेत्यादिलक्षणामाक्षिपत्राशयः नवत्राप्यवच्छिन्नसाध्यव्यापकोपाधौ शाकपाकजत्वादेः स्वाननधिकरणसाधना
धिकरणावृत्तिधर्मप्रमेयत्वाद्यवच्छिन्नसाध्यस्य साध्याधिकरणमात्र एवसत्वेन तादृशधर्मावच्छिन्नसाध्यव्यापकत्वाभावेनव्या
प्यापत्या तत्तद्धर्मविशिष्टेत्येवव्याख्यातरस्तुकरीनालक्षणाभेदे अत्रावच्छेदकदृष्टमतआह साधनाव्यापकत्वपरित्यागेनेत्यत्र इतीत्यर्थ इति
धूमवान्वह्नेरित्यादावपि तदपि इदमहत्वसामानरत्वादिरेव तादृशोधर्मस्तत्माद्यपक्षलक्षणासमन्वयः व्याप्तिनिरूपकत्वमित्यादि केचित्तु
यद्धर्मावच्छिन्नसाध्यव्यापकत्वं यद्धर्मविशिष्टसाध्यनिष्ठव्याप्यतानिरूपकत्वं तादृशानिरूपकत्वं च यद्धर्मविशिष्टसाध्याधिकरणवृ   राम०

त्यभावप्रतियोगीतानवच्छेदकावच्छिन्नत्वं तथा च तादृशावच्छेदकत्वं लघुस्य गुरुत्वेन याप्रतियोगीतानवच्छेदकत्वेन तत्र लाघवात् धूमाधिकर
णाद्वृत्त्यभावप्रतीयोगितावच्छेदकत्वस्य धूमस्यैव प्रतियोगितावच्छेदकतया गुरुत्वसाध्यव्यापकोपाधावव्याप्तिरित्याशयेनाह यद्यपीति व
ह्नि धूमत्वेनैवेत्यादि एवकारेण तादृशधर्मावच्छिन्नधूमत्वस्यावच्छेदः तादृशावच्छेदकधर्मेति स्वानधिकरणघटितनिरुक्तावच्छेद
कत्वासमर्थनेयत्यात्रावच्छेदकत्वसंभव इति तत्परित्यागः तादृशोतिचालनीत्यायेनेत्यादिः अयं परः उपाधित्व इति प्रमहत्त्वसाध्यक
व्यभिचारिणिवायुः प्रमहत्त्वप्रमेयत्वादित्यादौ गुरुसाध्यव्यापकस्योद्भूतरूपवत्वोपाधेः वह्निईश्वत्वावच्छिन्नसाध्यव्यापकतायै
वोपाधित्वासम्भवस्यादिति भावः एवमपि क्लृप्तस्य निरुक्तोपाधित्वस्य परित्याग एवेत्यत आह वह्निईश्वत्वमिति तथा च निरुक्तो
पाधित्वस्य क्लृप्तत्वमेवासिद्धमिति भावः द्व्यणुकजन्यत्वे तितिपदद्व्यणुकजन्यत्वमेव सम्यक् द्व्यणुकपर्यन्तानुधावनं व्यर्थं न चापि
मनसोप्यणुत्वेन तज्जन्यत्वविशिष्टमनपहत्त्वस्यानेपि वह्निनेन त्र्योद्भूतरूपासत्वान्न तादृशसाध्यव्यापकत्वमुद्भूतरूपस्येति तत्र व्याप्ति
रतो द्व्यणुकपर्यन्तानुधावनम् तथात्वाभावात् साधनावच्छिन्नं पहत्वमविच्छिन्नं वा साध्यं प्रति व्यापकत्वाभावान् घटगुरुत्वस्य तत्र

टी १६३

325

163

त्वरूपपदकृत्यधर्मावच्छिन्नसाध्यं प्रत्युक्तरूपवत्त्वस्य व्यापकत्वानयात्वाभावस्यासिद्धेरपसरसाहचर्याव्यकुशीमि व्यभिचारत्वाप्य
त्वादित्यत्राप्यन्वेव्यभिचारादित्यभावः विशेषणभागेतितादृशधर्मवद्वृत्तित्वे सति उपाधिव्यारेण साधनेसाध्यव्यभिचारानुमानेहेतु
तावच्छेदककोटावुपाधिव्यभिचाररूपविशेष्यभागसार्थक्यमित्यर्थः अयमाशयः यत्रचेत्यादिदलानुपादानेव्यभिचार
निरूपकाधिकरणमात्रवृत्तितादृशधर्मवद्वृत्तित्वस्यैवसाध्यव्यभिचारव्याप्यत्वसंभवेनोपाधिव्यभिचाररूपविशेष्यस्यैवेयर्थ्यं
तदुपादानेचव्यभिचारनिरूपकाधिकरणसाध्यवदुभयवृत्तिधर्मस्यैवतादृशत्वेनतदवृत्तित्वस्यसाध्यसमानाधिकरणधर्मव्य
भिचारेणसाध्यव्यभिचारव्याप्यत्वासंभवात्स्ववैतिनतत्सार्थक्यमिति॰ एवं चैतत्साधारणसाध्याधिकरणत्वमेवैतत्स्वाधिकरणस्य
स्याप्येवैत्यादि इति यावत् तन्मात्रवृत्तिधर्मः स्वानधिकरणसाध्याधिकरणमात्रवृत्तिधर्मस्यात्मत्वस्य इति यावत् व्यभिचारश्च प्रकृतेगगनात्म
यः व्यभिचार इति गगनात्मान्तरत्वरूपतादृशधर्मवद्वृत्तित्वे सति उक्तरूपव्यभिचारेण प्रमेयत्वव्यभिचारसाधने व्यभिचार इत्यर्थः
तदुभयवृत्तिधर्मस्येति प्रमेयत्वादेरित्यर्थः व्यभिचार इति तादृशधर्मवद्वृत्तित्वे सति उक्तरूपव्यभिचारस्यात्मत्वादौ सत्त्वेन तत्र प्रमेयत्वे राम०

व्यभिचारस्य साध्यासत्वादिति भावः एतस्यापि साध्यानधिकरणीभूतेन्धादेरपि न घटत्वम् इति स्वत्वस्याननुगतत्वादिति भावः लक्षणान्त
रं स्वत्वाघटितलक्षणं अतिप्रसंगेति व्यंजनवत्त्वादाविमस्यादि साध्यासमानाधिकरणत्वस्य साध्यानधिकरणवृत्तित्वरूपत्वे उपाधिश
रीरभानमेव साधनवत्ति साध्याधारमेतत् भाने सोऽन्याभावघटितं साध्यव्यभिचारस्य प्रत्यमनरूपस्फूर्तौ उपाधिना साध्यव्यभिचारानु
नुमानं वै यथ्यापत्तिरत आह साध्यासमानाधिकरणत्वं चेति नोपाधित्वमिति अतोऽनन्तर्वच्छिन्ने साध्याभिरित्यर्थः विरुद्धेति कृत्स्ना
हीत्यर्थः न हि नित्यं पूर्वनिरुक्तमित्यादि तेन धर्मवान्वह्नेरित्यादौ नेत्यर्हेषित्वविशिष्टद्रव्यत्वस्यादि नोपाधितापत्तिः साध्यमित्युदाहरणवद्वह्नि
आश्रयमाश्रयः साध्यव्यापकस्य द्रव्यत्वादेः संयोगादिनाभाववत्त्वस्य साधनवत्ति सत्त्वेन व्यंजनवत्त्वादेरवारणात् व्यापकताघटकसंबंधे
न साध्यव्यापकाभावो वाच्य समवायेन साध्यव्यापकस्य द्रव्यत्वादेः समवायेनाभावस्य कालिकादिसंबंधेन धूमादिसाधनवत्तिसत्त्वादे
सत्वात्साधनवत्त्वं हेतुतावच्छेदकसंबंधेन वाच्यं आर्द्रेन्धनाभावादेरपि कालिकादिसंबंधेन प्रतियोगिसामानाधिकरण्यमेव प्रतियोगि
तावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्योपाद्यपि विवक्षितं यासन्नादेरभावस्यापि विषयितया प्रतियोगिव्यधिकरणस्य साधन

१६५

327

टी· 164

वृत्तिसत्त्वेनसमवायेनसत्तादावतिप्रसंगइत्युपाधितावच्छेदकसंबंधेनप्रतियोगिवैयधिकरण्यंवाच्यंहृदत्वादेरपिकालिकादिसंबंधेन
साध्यसमानाधिकरणात्तयोपाधितावच्छेदकसंबंधेनसाध्यसामानाधिकरण्यंवाच्यमितिपर्यवसितमेतन्नाघवेवान्तिप्रकारेणोभयंघटत्वादिसंभ
वइत्यंतस्यछेदः पूर्वलक्षणात् स्वानधिकरणीभूतेत्यादिलक्षणात् संबंधेनेतिउपाधितावच्छेदकसंबंधेनत्यर्थः संबंधेन नन्वेदेनस्वाह
साध्यव्यापकत्वसाधनाव्यापकत्वोभयघटितमेवलक्षणंवरणीयंनाततमाहसहेतावितिअंजनाद्यावितिशेषः सामान्यमितिव्यापकता
वच्छेदकरूपविशेषणमितिशेषः तथापिसाध्यव्यापकत्वसाधनाव्यापकत्वयोरन्यतरोपादानेअंजनादावतिप्रसंगतादवस्थ्यंअंज
नत्वादिसाध्यव्यापकतावच्छेदकद्रव्यत्वादेःसाधनाव्यापकतावच्छेदकमहानसवृत्तिद्रव्यत्वादेश्चानतिरिक्तवृत्तित्वादतःसाध्यव्यापक
त्वसाधनाव्यापकत्वयोर्द्वयोरुपादानं ननुसाध्यव्यापकत्वसाधनाव्यापकत्वोभयानतिरिक्तवृत्तित्वमेकव्यापकतावच्छेदकरूपविशेष
णमस्तु किमवच्छेदकपर्यंतेन सहेतौ व्यंजनत्वादौ न तस्मात्वान्त व्यंजनादावतिप्रसंगः धूमवान्वन्हेरित्यादौ नतन्नजितिरिक्तवृत्तित्वस्याद्वैध
नत्वादेःसत्त्वात्तत्राप्रसंगइत्यतआह वन्हिमानितिविभिन्नरूपेणेतिद्रव्यत्वत्वेनसाध्यव्यापकत्वात्महानसवृत्तित्वविशिष्टद्रव्यत्वत्वा रामं०

दिनासाधनाव्यापकत्वाद्वैशिभावः तदन्यतिरिक्तेतितदुभयानतिरिक्तवृत्तिहेतुमत्वादिनोऽर्थः तत्रच वह्निमाद्धूमाद्दित्यादेर्वः अयोगो
लकावृत्तित्वादिकमिति आदिनाव्यभिचारनिरूपकाधिकरणांतरावृत्तित्वादिपरिग्रहः तस्यैव साध्यसमानाधिकरणावृत्तित्वस्यैव अ
यं साध्यसमानाधिकरणायत्किंचिद्धर्मव्यापकतावच्छेदकत्वरूपः साधारण्ये इति शाकपाकजत्वमादेः श्यामत्वादिव्यापकता
वच्छेदकत्वाभावादिनिभावः केवलान्वयितावच्छेदकस्यैवेति इदं च साध्यसामानाधिकरण्यस्योपलक्षणत्वाभिप्रायेण तस्य विशे
षणत्वेन वच्छिन्नसाध्यव्यापकोपाध्यावप्रसंगो बोध्यः सर्वसामंजस्ये· तद्वृत्तित्वविशिष्टस्यान्वयादिनोपाधित्ववारणे गुरुतरारं
भः साध्यसमानाधिकरणयत्किंचिद्व्यापि गुरुतरनिष्कर्षः साध्यवद्वृत्तिताया इति· एतस्माद्धूमवादिनेविशेषः अननुगमद
ति तत्र साध्यवन्निष्ठाधिकरणतानिरूपकतावच्छेदकत्वोक्तौ नानुगमइतिवाच्यं साध्यसमानाधिकरणेऽस्मादेशो यतोऽस्यापि ते
अत्रचरणतद्ग्रहणोच· एवंलिङ्गेऽलंकेत्रुमीवाद्विमत्वादिनांतादृशासाधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वादेवनेतनरूप
णोपाधितापत्तिरितिध्येयं तत्सोपसंग्रह इति शाकपाकजत्वविशिष्टश्यामत्वस्यगौरमित्रातनयावृत्तित्वानतिरिक्तवृत्तित्वाभा

टी· १६५

165

329

वादित्ति भावः नन्वन्ततिरिक्तेतिशाकपाकजत्वविशिष्टद्रव्यत्वसत्त्वेनैतन्निरूपितविशेष्यतास्येत्यादि· आतिप्रसंग इति द्रव्यत्वहेतुमा
दि· व्यभिचारोन्नायकत्वेनेति यथाकथंचिदित्यादि पृथिवीत्वाभावादेरपि द्रव्यत्वस्य च व्यभिचारित्वसत्त्वादप्यसुज्ञत्वेनैतन्निरूपितविशेष्य
त्वे सति पृथिवीत्ववद्भिन्नत्वादिति पूर्वोपदर्शितरीत्या व्यभिचारोन्नायकत्वादिति भावः पूर्वोक्तिलक्षणे तत्स्वानधिकरणीभूतसाध
नाधिकरणत्वादिलक्षणे तात्पर्यः तत्र पृथिवीत्वाभावादौ विशिष्टाभावेति अखण्डाभावतयेत्यर्थः तथा चाखण्डाभावघटकतयान्वै
यर्थ्यमिति भावः पृथिवीत्वाभावादाविति स्वविशिष्टगुरुत्वाद्यनधिकरणे तेजोरूपादिरूपसाधनाधिकरणं यत्तेजः प्रभृति तन्निष्ठ
त्वे तेजोमनरत्वाद्यवच्छिन्नगुरुत्वादिव्यापकत्वस्य पृथिवीरूपादिरूपसाधनाव्यापकत्वस्य सत्त्वादिति भावः नाशाम्पन्निर्व्याप्तेरि
तिरूपवान्द्रव्यत्वान्नगुरुत्वादित्यत्र पृथिवीत्वाभावत्वादि· अत्र गुरुत्वासमानाधिकरणधर्मसमानाधिकरणं यत्तेजोरूपं तत्समा
नाधिकरणाभावप्रतियोगित्वस्यासत्त्वमतिव्याप्त्यभावे हेतुत्वं स्फुटत्वान्नोक्तः चकारेणानुक्तनिरुक्तप्रतियोगित्वाभावसमुच्चायकः· ध
चिद्वत्वाहसत्याहेवेत्यादिपावत्त्वत्रयासत्त्वादित्यस्यनिरुक्तप्रतियोगित्वस्यासत्त्वादित्यर्थ इति ध्येयं इदं व्यभिचारानुमानसौकर्यं राम·

वह्न्यादौ वह्न्याद्यधर्मादौ चेति आदिना तादृशधर्मसामानाधिकरण्यपरिग्रहः नतु उद्भावनेनैव तादृशधर्मानुद्भावनेनैव वह्न्यभिमते
तिव्यभिचारानुमानसम्पर्क उद्भावनं व्यभिचारानुमानार्थमुद्भावनं तत्तादृशोपाधित्वहेतुव्यावच्छिन्नस्योद्भावने कथकेति क
केति कथकसंप्रदायानुरोधेनैवोपाधिरुद्भाव्यत इति भावः सिसाधयिषाधीनमेवेति कथकसंप्रदायानुरोधादिति शेषः व्यभि
चारमानेति विशिष्टाभावस्यातिरिक्तत्वादिति भावः यौनरुक्त्यमिति श्रोत्रं यत इति मूले लब्धसत्ताकमिति पूरणीयम् अन्यथा नन्वयान्न
याच्ययौनरुक्त्यमिति भावः वह्नेर्व्यभिचारानुमापकत्वे निश्चये वदे घसत्वेनेति शेषः अवच्छिन्नसाध्यव्यापकोपाधौ शुद्धसाध्यव्य
भिचारोन्नायकत्वाभावादव्याप्तिमाशंक्याह विशिष्टसाध्येति साधननिष्ठस्य साध्यव्यभिचारविशेषणत्वे उपाधिपदादेव साधने सा
ध्यव्यभिचारबोधे व्यभिचारानुमानेवैयर्थ्यादाह तन्माधनेनेति विशेषणमित्युत एकोऽन्वयः उन्नायकत्वमिचारइतिसावधारणोक्ते
न साध्यव्यभिचार व्यवच्छेदः व्याप्तीति तत्त्वबोधोपाधिपदादेव व्याप्तियत्किंचिद्धर्मत्वाभावेन निरुक्तकोक्तान संभवतीति भावः तस्याः व्या
प्तियत्किंचिद्धर्मतारूपतद्योग्यतायाः तादृशैरव्याप्तित्वादिनाभवतीति तद्बोधोन्नायकत्वावच्छेदकत्वेन सामान्यरूपेण व्याप्तियत्कि

टी· १६६

166

331

धर्मितालाभेपि द्धिं नस्ववच्छेदकमिति निश्चायकरूपेणाज्ञातो ह्यसंभवत्येवेति भावः अन्यथा यदि वसिनेत्यादेर्लिङ्गतारूपत्वे अर्थं जन्मि
तिश्चयमत्र हेतावुपाधिरित्यस्योन्नायकत्वं धर्मितावच्छेदकत्वप्रवेशेनोक्तकत्वं ज्ञानुव्यापकत्वादिति भावः ननु पक्षेतरस्यान्याभावपर
त्वं ताभावयोरुभयोरेव साध्याभावसाधकत्वं सत्वोपाधिरिति संयोगाभाववद्व्यत्वान्न सिद्धो मोन्याभावस्य साध्याभावासाधक
तया न संयोगाभावस्योपाधित्वमत आह अन्यथेति संयोगस्य नित्यत्वं सत्त्वादिस्यादृषिमाह नाद्य इति प्रतियोगिनः साध्याभावो
न्नायकत्वानतिरेकमात्रियोगिनः तत्र संयोगे तादात्म्येनेति नयाचा साध्याभिन्नत्वस्यैवेति भावः तादात्म्येनेति नचैवं जातिमात्रय
त्वादित्यादितादात्म्येन सत उपाधित्वे नस्यादिति वाच्यं इष्टापत्तेः समवायेन सत्तादेरेव तत्रोपाधित्वात् शुद्धसाध्यव्यभिचारित्वेन स्याए
व शुद्धसाध्यव्याप्तिधीविरोधितया यत्किञ्चित्सादिति भावः विशेष्यव्यभिचारित्वेनेति व्यापकतानवच्छेदकस्यैरूपापि मादित्यावीनेति
नेतिनरवाधादित्वेना व्यापकतानवच्छेदकरूपेणाप्यनुमितेरूपगमादिति भावः साधनस्य साध्याभाववद्वृत्तित्वे यद्व्यभिचारस्तद्व
त्वं विशिष्टसत्त्वादिमादेरपि व्यभिचारित्वापत्तिरिति साधनवन्निष्ठसाध्याभावस्यैव व्यभिचारत्वाशयेनाह साधनवन्नीतिसाधनतावच्छेद राम०

332

कात्वावच्छिन्नवतीत्यर्थः साध्याभाववतीति मूले साध्याभाववोऽसमर्थः व्यभिचार इति मूले साध्यव्यभिचारेत्यर्थः व्यापकतावच्छेदकानवच्छिन्नत्वादि
ति व्यापकतावच्छेदकाक्रान्तत्वादित्यर्थः व्यापकतानवच्छेदकरूपेण भानां गीकृतस्याधीनतयेऽपि व्यापकतावच्छेदकाक्रान्तस्यैव व्या
पकतानवच्छेदकरूपेणाभानादिति भावः विशिष्यापीति व्यापकतानवच्छेदकविशेषरूपेणापीत्यर्थः न व्याप्यापेक्षितायाः मूले साध्य
व्यभिचारसिद्धेरसिद्धेरेवेति भावः ननु एवमप्यर्थनिरूपितत्वं शरीरेऽठित्वप्रमस्यत्वे च परिमाणोत्कर्षापोरमप्रत्यक्षत्वं न या मूर्तत्वसंख्यापरि
माणवत्वादिनैकत्व प्रत्यक्षस्य व्याप्यत्वं उपाधिशरीरनिविष्टप्रत्यक्षत्वस्य प्रत्यक्षोपहितत्वरूपत्वादित्यत आह इदं मुक्तात्मसामिति वि
शाहं विति परिमाणस्य ग्रहणे व्यनेनान्वयः इतराद्वतिलोमेनेतिहासप्रयुक्त। ठित्वप्रमेयत्वर्थः शेषस्य लेचेतिएकत्वस्य च ग्रहणे
चेत्यनेनान्वयः न इन्द्रियान्तरेति परिमाणोत्कर्षासानरेत्यर्थः परंकेवलं न तत्र परिमाणादिग्रहस्य संविद्यत्वादाह प्रत्यक्षत्वरूपयोग्यतेति न्या
योपाधिशरीरे प्रत्यक्षत्वेन फलोपधानगर्भमिति न व्यभिचार इति भावः नचैवं वायुः प्रत्यक्ष इति स्थापनानुमाने बहिरिन्द्रियप्रत्यक्षत्व
व्यभिचारानुमाने पर्यन्तरापत्तिरत आह एतत्कल्पे चेति अनेकत्रसाध्ये हेतौ च संकोचेति सामान्यपरस्य विशेषपरत्वमित्यर्थः कल्पनाम

१६७

333

टी· 167

यानन्कल्पनाद्युपगौरवभयान् अरुचिं · सत्पक्षपरस्यवह्निरिन्द्रियसत्पक्षपरत्वेरुचिं · चक्षुरादीतिजन्यमहत्वान्येनेत्यादितत्परत्वं महत्वान्येन
चक्षुरादिनिष्ठमहत्त्वविशेषपरत्वं · अन्तगडुनामधस्थ्येन · व्याप्यपदमितिदृष्टान्तार्थं अव्यभिचारित्वादिप्रयोगानुपपत्त्या व्यभिचारि
त्वपदस्यान्वयितावच्छेदकसामानाधिकरण्येनेवस्तुयाथात्म्यबोधकत्वादितिभावः तेनरूपेण · जन्यमहत्त्वत्वरूपेणतत्पाख्यातं हित्वा
घटावच्छिन्नाभावं · हित्वाघटावच्छिन्नव्यापकप्रतियोगिताकं · साध्यस्यप्रत्यक्षत्वस्यफलोपधानगर्भत्वेघटत्वादेः साध्यसमत्वेवत्यतन्त्र आहतत्
दुरुत्वाद्यवृत्तिव्यापकत्वावच्छिन्नेतिव्यापकतावच्छेदकावच्छिन्नेत्यर्थः असिद्धेः · हेत्वसिद्धेः उपाधिनाघटकसंबन्धेनतादृश्याभावस्य
वाप्यावसत्वान्तादृश्याभाववत्तिसामान्याद्रेहेतोरवृत्तित्वादितिभावः असिद्धिमेवविवृणोतिसमवायेन · तेनव्यापकत्वात् नव्यापकता
वच्छेदकावच्छिन्नत्वात् नादृशेति एवंचेत्यादि · व्यापकतावच्छेदकं · व्यापकतावच्छेदकत्वोपलक्षिते प्रत्यक्षत्वेतिमुख्यप्रत्यक्षत्वेनत्यर्थः
व्याप्यत्वेनिप्रत्यक्षत्वव्यभिचारेत्यादि · असिद्धिमात्रेतिउपदानुपादानेउक्तरूपव्यभिचारस्याप्रवेशेनयदानत्यभिचारस्यैवप्र
कृतहेतौनिश्चयः ननुमुख्यप्रत्यक्षत्वव्यापकव्यभिचारस्यतदासंदिग्धासिद्धिः स्यादितिसंदिग्धासिद्धिमात्रवारकत्वादितिभावः ॥ प्र राम०

334

महत्त्वेति गुणत्वाद्यवच्छिन्नेत्यादि । द्रव्यमन्यद्गुणत्वेति गुणत्वादिविच्छिन्नेत्यादि । अतिरिक्तत्वादिति तथाचास्वंशाभावघटकतया नैव वैयर्थ्य
मिति भावः । प्रविष्टत्वाभावे नेति व्यापकतावच्छेदकत्वस्यापत्त्यनुरोधेनैव निवेशादिति भावः । नेष्टापत्तेश्च । उक्तानुरूपत्वादेरन्तर्गतिनैव वः । न वै
व । उक्तानुरूपादिव्यभिचारत्वेनैव । व्यापकतावच्छेदकत्वस्यापत्त्यनुरोधेनापि निवेशप्रयोजनाभावादिति भावः । उद्धेतमिति द्वति
द्रव्यपदवैयर्थ्यशंकैव नेति शेषः । एतन्मयत्वप्रमामितितन्मतस्यैतन्मतत्वे च विशेष्यवैयर्थ्यमिति भावः । बहुमाणत्वादिति मूल
क्षेत्यादि । व्यभिचारेति स्वप्रागभावव्यभिचारेत्यर्थः । हेतौ स्वप्रागभावमित्रातत्वव्यापकत्वघटितहेतौ । यत्र द्वयोरिति यस्मात्तत्वाननुग
मेनतत्रैतत्रविशिष्टमित्रातत्वयोपादाने पूर्ववत्त्वैवैयर्थ्यमित्याशयः । मित्रातनये । नटदंतमर्षिन । दृष्टांतासिद्धीति स्वघटस्य स्वमित्रात
नयत्वाव्याप्यत्वादिति भावः । यथाश्रुतेति व्याप्यत्वात्मकेत्यर्थः । फलोत्तरे । स्वप्रागभावादौ व्यभिचारवारणाय फलभिन्नपदमित्यादि । सि
द्गुरुत्वावलोकनन्यायेनेत्यादि । नैनैकफलत्वमपि ध्यायमध्येमतांतराभिधानेसंदर्भविरोधइत्याशंकायानिरासः । उक्तक्रमेणाविशे
षणाव्यभिचारित्वेन ज्ञानमित्याशुक्तक्रमेणापि । चिद्धिविशेषणेन निविशेषणाव्यभिचारित्वादेर्विशेषणाविशिष्टेनेत्यर्थः । प्रागुक्तरीत्य

तिद्रूपंतेजस्त्वाभाववत् शीतस्पर्शाज्जलत्वादेत्ति रीत्यापर्य्यः व्यभिचारोन्नायकस्पर्शाभावादीति आदिनाजात्यभावपरिग्रहः नयाद्य
पूर्ववद्रित्यविरुद्धविशेषणतामितिभावः साधननिष्ठेति ष्ठीयव्यभिचारपदार्थैतिाम्बितंतेनोपाधिशरीरभानएवनसाधनेसाध्यव्य
भिचारभानं वैयर्थ्यमिति साधनव्यापकस्यैवहासमारणरूपवत्वादेनिहिव्यभिचारोन्नायकत्वाभावादेकवारणादितिभावः वह्निधी
हेरोतितेनसाधनेपदभावववद्वृत्तित्वरूपव्यभिचारबोधनेतुल्यवित्तिवेद्यतयासाधनवद्वृत्तिभावप्रतियोगीत्वस्यापियसहार्थेत्वाभादि
तिभावः जलभिन्नइतीविशेषवच्छिन्नसाध्यव्यापकसंग्रहायविशेषितावदेशेषितसाधारणेपनव्यभिचारोन्नायकत्वस्यवाव्यकत्वादिति
भावः नगुरुत्वेतिरसरूपव्यभिचारादितिभावः साधनविशेष्यकेसादितयावच्छाद्वृमात्रंविलक्षणंनसर्थवैलक्षण्यरूपेणएवचोक्तिमंगपाप्
दिस्यैवसमुच्चारोयंनतुलक्षणतावच्छेदकांतरमिदमितिभावः यथाश्रुतेत्ति नसुरसाहेरणासाधनाभाववद्वृत्तित्वान्यकेतरार्थे वह्निधीत्वा
न्वयणाफलंस्फुरयतिद्रव्यत्वइतिव्यापकादीतितत्रशीतस्पर्शवद्वृत्तिस्यादेरेवव्यापकत्वादितिभावः नतु तेजोद्रव्यत्वादित्यनुमाने सैं
धोतेरणकालिकादिसंबंधेन नवृत्तिः नातिप्रसंगः साधनव्यापकस्येतिसपक्षैकदेशवृत्तिधर्मस्यैतिशेषः परं केचन महतसाधने राम०

इति सप्तम्यर्थविशेष्यकत्वमनुमितित्वविनं व्याप्त्येतित्वा विषयकप्रतीत्यविषयतन्कत्वमित्यर्थः प्रयोजकासंभवात् जनकतावच्छे
दकव्याप्यसंभवात् तादृशधर्मेति माणुक्तं मपहेलोकदेशाहृष्टि धर्मित्यर्थः निराकरोतीति वह्न्याभावाविवत्ते पेत्यादिवारणीयतेति स्वसे
न्यात्स्वनेत्यर्थः वारणामिति तथा च रूपवत्त्वादिहेतुत्वादित्यत्र साधनाव्यापकत्वे साध्यव्यभिचारयोरेकाधिकरणावच्छिन्नत्वाभावेन पृथि
वीत्वाभावे व्याप्तिरिति भावः रूपवत्त्वादित्यादि तथा च द्रव्यत्वरूपसाधनव्यतावापकत्वस्य पृथिव्यवच्छेदेन सत्त्वान्न घटके द्रव्यत्वे बाधा
घवच्छेदेनैव रूपादिव्यभिचारोऽव्यापकत्वस्य सत्त्वात् पृथिवीत्वाभावाद्धेतुलक्षणासमन्वय इति भावः इह गुरुत्वरूपादिव्यक्तिभेदादिति तथा
य तत्र पृथिवीत्वाभाववत् पृथिवीत्वरूपात्मकसाधनासापकत्वस्य सत्त्वेन तद्घटको पृथिवीरूपे गुरुत्वव्यभिचारस्यासत्त्वेन तद्व्यापकत्वा
भावान्न तत्राव्याप्तिरिति भावः अभावमात्रस्य अयोगोलकत्वाभावादेः वैयर्थ्यमिति वह्निधूमव्यभिचारि अयोगोलकत्वाभा
वाभाववद्वह्निव्यभिचारित्वेत्यत्रायोगोलकवृत्तित्वस्यैव सम्भवादिति भावः तस्य अयोगोलकत्वाभावादेः संग्रहाय पर्य्यवहारपराम
र्शाशयेन व्यापकवेऽक पकानामिति पराभवतः निरस्तः व्यभिचारणवेत्येवकारव्यवच्छेद्यमाह नत्विति प्रकृतसाध्येति मुख्यसाध्येन

र्थः क्वचित्तथैव पाठः आकांक्षायां समानजिज्ञासायां विशेषणरोमीपत्तिनिरुक्तपर्यन्तायां तद्धेतुत्वेनेष्टानुपपन्नेश्यामत्वादेर्व्यभिचा
रेण केवलविशिष्टसाध्यव्यापकोपाधिव्यभिचारस्य शुद्धसाध्यव्यभिचारानुमापकत्वासंभवेन विशेषणैरोप्यादिसंगतो पादानमित्याश
यः परंपरयाः विशिष्टसाध्यव्यभिचारानुमानद्वारा व्यभिचारानुमापकत्वेपि शुद्धसाध्यव्यभिचारानुमापकत्वेपि नित्यर्थः आह वि
शिष्टेनेतिपाठः अत्रापि सत्यंतेन मनुष्यत्वे केवलविशिष्टसाध्यव्यभिचारस्य श्यामत्वादौ व्यभिचारेण शुद्धसाध्यव्यभिचारानुमा
पकत्वासंभवादित्यापत्त्येनाह अत्र विशेषणरोपितसमापिर्तीभवतीति हेत्वाभासत्वेन प्रथमोपन्यासः आपकत्वस्वापाचादित्यभाव.
यत्किंचिद्धर्मेति महानसत्वादेरित्यर्थः कृचंचिदिति अनुकूलतर्कादिनेत्यर्थः अन्ये न संदिग्धोपाधिरपि सद्यस्तत्र शोक्तनीयत्वादि
तिमूलकारेणोक्तादित्यस्य साध्यव्याप्तेनिवृत्त्यपि व्यभिचारित्वव्याप्यपर्यन्तेनतरत्वव्यभिचारित्वाव्यापकत्वेनेत्यर्थः उपा
धे धूमेन रसस्य साध्यव्यापकत्वेनिवाह्नेर्व्यभिचारित्वाव्यापकत्वेनेत्यर्थः नचमूढे यदि तत्त्वावत्तिर्युक्तिर्व्यापकसंप्रदायानुरोधे
नपक्षेतरत्वोपाधित्वेनोद्भावनं तु वरिष्ठे वक्ष्यमाणः उपाधित्वोपपत्तिकेति एवंच विशेषणत्यागेन तादृशमाशास्यबोधानुरोधेन विशेषणत्याग राम०

स्यादिति मतं चेदनुपपन्नः अन्यथा कर्मधारयापत्तेरिति निषेधेन तदनुपपत्तेः ननु प्रमात्वादित्यत्र यावन्मूलाभिप्राय एव दीधितिधृतस्तां किं
न्निवृत्त्यादिना विशिनष्टीत्याशयः इत्यर्थं इति विशेषणावच्छेदादिति मूलार्थ इत्याहुरिति उक्तरीत्या चोपपत्तौ बहुव्रीहावनुसरणं क्लेशोऽनुचि
तइत्यस्वरसः असंगतिरिति व्यापकतावच्छेदकानुकूलनकाभावे साध्यव्यापकत्वानिष्पत्तये आर्द्रेंधनप्रभववह्निमत्त्वादीनामुपाधि
त्वोक्तेरसंभवादित्याशयः नन्वेवं परस्परासंयुक्तार्द्रेंधनवह्न्योः सत्त्वे धूमापत्तिरत आह परस्परमासत्त्यानामिति कारणताव
च्छेदकसंबंधेन परस्परसंबद्धतापि तत्पर्थः तथा चार्द्रेंधनसंयुक्तवह्नेरेव पक्षेऽप्यव्यापकत्वाभ्युपगमान्नोक्तापत्तिरिति भावः दोषद्वय
निरासपटुतयाऽनन्तरोक्तमादिमेनेति योजयति आर्द्रेंधनप्रभववह्नित्वस्योपाधि वस्तुगतिमनुसृत्येति मूलाभिप्रेतमिति शेषः वस्तुमा
त्रारोप्यार्द्रेंधनप्रभववह्नित्वेनकारणतास्य वस्तुगत्यासत्त्वादिति भावः तेन रूपेणार्द्रेंधनप्रभववह्नित्वेनकारणतास्वमये
प्यपि सिद्धेन रूपेणोपनेनेत्यर्थः अवस्थापयतीति अन्यथार्द्रेंधनप्रभववह्नित्वं पक्षधर्मव्यापकतावच्छेदकं न स्यान्न साध्यमकारणा
तावच्छेदकं न स्यादिति तर्कस्य व्यापत्तिरसत्तया तत्र धूमव्यापकतावच्छेदकस्याप्रसिद्ध्या वासंभवादिति भावः आनिगोरवं आनिगो

दी· १७०

स्वमपि·दर्शयति आर्द्रेंधनत्वेन वह्नित्वेन च पर्यवकारणतामते इत्यवसांतरत्वेन दर्शयति·नत्विंधनेतिप्रतिरहेंधनेत्यर्थः धूमोत्पादा
दितिविशिष्टयोरिति संयोगसंबंधेनेति दर्शनेनेतित आर्द्रसामान्यतो धूमं प्रतिप्रतिबंधकाभावानां कारणत्वे व्यभिचार इतिभावः एते
न·धूमोत्पादादित्यंतग्रंथेन·प्रतिबंधकाभावानां·मण्याद्यभावानां·कल्पनयापीति·अपिकारेण कालिकसंबंधघटितसामाना
धिकरण्यप्रत्यासत्त्याकार्यकारणभावकल्पनायाः समुच्चयः स्वत्विति तादृशकार्यकारणभावकल्पनायामप्युक्तव्यभिचारा
नुद्धारादितिभावः अति गौरवरूपदूषणांतरोद्भावनाशंकते नान्वयीति उद्देश्यपदत्वमिति प्रत्यासत्तिरित्यनुषज्यते व्यभिचारानुक्के
स्याभिमादिनोक्तव्यभिचारात् उपधायकत्वमिति जन्यताघटकप्रत्यासत्तिरित्यनुषज्यते संयोगेनेति अवच्छिन्नप्रतियोगितकत्वेन
तोयार्थः अभावइत्यनेनान्वयी एवमग्रेपि अति गौरवमिति प्रतिरहेंधनव्यक्ताचुपधायकतासंबंधेन धूमोत्पत्यभावेनोक्तव्यभि
चारवारणेंधनव्यक्तिभेदेन कार्यकारणभावानंत्याभावादित्याशयः अतएव उपधायकताघटितसामानाधिकरण्यप्रत्यासत्त्या
मण्याद्यभावानां कारणत्वेऽस्व·यत्रेंधने·यदिंधनव्यक्तोन जातमिति कदापीत्यादि·अग्निसंबंधेनेति तीयार्थोभेदः सामान्य सम०

सामग्र्यन्वयी· नच धूमोमत्तीति उपधायकतासंबंधेन धूमोत्पत्त्याधिकरणेन तद्दिंधने मण्याद्यभावस्य कारणत्वासत्वादिति भावः अन्य
न्यासंयोगादिघटितसामानाधिकरण्यप्रत्यासत्त्या संबंधेन व्याप्तिभेदेन मण्याद्यभावानां कारणत्वे हेतुत्वाकल्पनात्· तदिंधनमेतन्मणि
व्यमण्याद्यभावस्योक्तरीत्याहेतुत्वकल्पनासंभवात् सामान्येति वन्ह्याद्यात्मकेत्यर्थः उपधायकत्वादीनामिति तदुपधायकादि
स्वरूपाणामित्यादि· आदिना जन्यजनकभावादिपरिग्रहः मानाभावादिति नव्याचोपधायकतासंबंधघटितसामानाधिकरण्य
प्रत्यासत्त्या मण्याद्यभावानां हेतुत्वासंभवेनोपदर्शितरीत्या तु गौरवं दुर्वारमेवेति भावः नन्वेवमुक्तधूमसामान्योत्पत्त्यापातो दुर्वा
रत्वेत्यत आह धूमानुपधायकेति फलाभावेन· धूमानुत्पादेन· तादृशविशेषेति तावदिंधनान्यतमात्मकेत्यर्थः विरहेणापीतिस्त्र
पिनामाहत्य मण्याद्यभावात्मकविशेषसामग्रीविरहपरिग्रहः धूमानुत्पादेति उक्तधूमसामान्योत्पत्त्यापातवारणासंभवादित्य
र्थः तावदिंधनान्यतमनाहत्य मण्याद्यभावान्यतरात्मकविशेषसामग्रीसहकृतायाएव सामान्यसामग्र्याः सामान्यकार्योत्पादक
त्वेनोक्तस्थले विशेषसामग्र्यभावेन सामान्यकार्यापत्त्यसंभवादिति भावः उपधायकत्वादीनां संबंधत्वस्य संदिग्धत्वेन तदभ्युपेत्या

१९१

टी॰

171

341

दृ एवमपीति उपधायकत्वादीनां संबंधत्वेपीत्यर्थः अतिस्फुटत्वाद्वेतिनि यामनेयोः संबंधत्वस्य संदिग्धत्वात्संबंधत्वाभावेनिगौरव
रुपद्वितीयदूषणमपि स्फुटमेव संबंधत्वेपि द्वितीयदूषणाभावेपि सत्यपीत्यादिनोक्तं प्रथमं दूषणं तु दुरुद्धरमेवेति भावः अन्नष
वदुपधायकत्वादीनां संबंधत्वेमानाभावादेव आर्द्रेधनत्वेनैव एवकारेणार्द्रेधनप्रभववह्नित्वेन रूपविशिष्टरूपस्य व्यवच्छेदः तत्र
तयोः जन्यजनकभाव इति परस्परमित्यादिग्रन्थासंगतिः फलोपधायकतानिर्वाहकसंबंधः तदेवाह परस्परेति तथा च वह्नि
त्वार्द्रेधनत्वाभ्यां प्रत्येकरूपेणाहेतुत्वेपि जन्यजनकभावसंबंधेनार्द्रेधनविशिष्टवह्नित्वेनार्द्रेधनप्रभववह्नित्वपर्यवसितेन फ
लोपधायकत्वाभ्युपगमादेव सत्यपीत्यादिनोक्तदूषणद्वयवारणे विशिष्टरूपेणाहेतुत्वे मानाभाव इत्याशयः अथासक्ति
त्युपधायकत्वस्य जन्यजनकभावस्य संबंधत्वाभावादिति भावः जातिविशेषस्येति एवकारेण विशिष्टरूपोपाधिव्यवच्छे
दः तेन रूपेणाहेतुत्वे विशेष्यविशेषणाभावे विनिगमनाविरहेणाकारणतापत्तेरवच्छेदकगौरवाच्चेति भावः वह्निनिष्ठः आ
र्द्रेधनप्रभववह्निनिष्ठः तथा च जातिविशेष एवोपाधिनावच्छेदकः मूलस्याप्यत्रैव तात्पर्यमित्येतदाशयः तार्णत्वादिना राम०

त्रणादिनिष्ठतावच्छेदकवह्निनिष्ठजात्या जन्यतावच्छेदकत्वेपीति सिद्धान्तेतिशयः नानात्वेपि तादृशजातिव्याप्यविरहभेदेननाना
त्वेपि अदोषादिति जन्यतावच्छेदकाननुगमस्यादोषत्वादित्याशयः एकशक्तिमत्वादिनाहेतुत्वेतात्विकजातेरभावादाह एवमि
ति तृणिनेतिमणिविशेषेत्यर्थः उपयोगात मनुतार्थप्रदानात नोदनत्वादिनासांकर्यभयादाह नोदनाभिघातत्वादिविरहे इति
जातिविशेषएवेति आर्द्रेन्धनवह्निसंयोगत्वरूपोपाधेरवच्छेदकत्वेविशेष्यविशेषणभावेविनिगमनाविरहादितिभावः त
द्वच्छिन्नं तादृशजातिविशेषावच्छिन्नं कल्प्यतइति नयावत्प्रतिबंधकसंसर्गविजातीयसंयोगत्वप्रकारताभावादेवनदाहादि
कार्यमितिभावः तत्प्रतिबंधकत्वेतिमण्यादिप्रतिबंधकत्वेत्यर्थः एतन्मते स्वसमवायिसंयोगः कारणतावच्छेदकसंबंधः ते
नसंबंधेनविजातीयसंयोगत्वोपाधिरितिध्येयं आहुरिति अस्वरसबीजं सर्वसिद्धस्यदाहं प्रतिमण्यादिप्रतिबंधकत्वस्यवि
लोपः एवंकर्मादिजन्यतावच्छेदकजात्यासांकर्येपि तादृशजातिविशेषव्याप्यविरहभेदेनकर्मादिजन्यतावच्छेदकजातेर्ना
नात्वस्यतदवच्छिन्नेकर्मादिनानाहेतुत्वस्यकल्पनेमहागौरवमिति मूलेति तद्रुक्तेषे गौण्यादिमूलेत्यर्थः युक्तंतत्रआर्द्रेन्धनप्रभ

दी १७२

343

वव्हित्वेन हेतुत्वेऽप्यादि यदुक्तं मतमिति शेषः तदेव च्छिन्नेनेति आर्द्रेन्धनत्वावच्छिन्नेत्यर्थः प्रकर्षादिवेति रजकादिरनाविधि
षस्यावच्छिन्नप्रकर्षव्यवच्छेदः वाच्येति कारणतावच्छेदकावच्छिन्नप्रकर्षस्यैव प्रकृष्टकार्यप्रयोजकत्वादिति भावः तस्य
त्वेपि आर्द्रेन्धनत्वाद्यवच्छिन्नप्रकर्षसत्त्वेपि तन्न्यूनतायामेव वह्निमहत्त्वेचार्द्रेन्धनेमहानि वन्हावित्युक्तं दोषितो तत्त्वेन आर्द्रेन्ध
नप्रभववह्निप्रकर्षवन्हित्वेन हेतुत्वाहितिं महत्त्वघटकसंयोगत्वादि प्रतिबंधकाभावस्यापीति तथा च तद्धेतुतयापि तन्निर्वाहः
इति भावः वन्ह्यंतरस्यार्द्रेन्धनप्रभवत्वे प्रकृष्टधूमानुत्पादः सिद्ध एवेत्यत आह मुखेधनेति पर्ल्लानुक्रमणालेशमार्द्रेन्धनप्रभ
ववन्हेरेवान्वयव्यतिरेकमिति शेषः मन्येसामोत्कर्षादिमादिपदं ग्राह्यं तत्र पार्श्वस्यार्द्रेन्धनप्रभववन्हेरभ्युदयेन तदस्य स्पर्शाकपाकस्य
कारणतावगमेयथासंख्येनान्वयादिति भावः मन्मते नितयोरन्वयव्यतिरेकस्यापि कारणतावगमहेतुत्वसंभवादिति भावः
ननु जन्यजनकभावस्य संबंधत्वे मानाभावः अत एव पूर्वमतए वेत्याद्ययुक्तमित्यंतग्रंथेनायं प्रकारः खंडितस्तत्कथमेतद
तआह वन्ह्यार्द्रेन्धनयोरिति संयोगेनेति शेषः प्रत्यासत्तिः उपधायकतानिर्वाहकसंबंधः अभिप्रायइति तथा च जन्यजनकभा राम॰

वस्यसंबंधत्वमभ्युपेयेरन्मुक्तं अत एवाग्रानास्यासत्त्वकस्यवाप्यावृत्त्याप्युपादानमितिभावः उभययापिविशिष्टरूपेणाहेतु
त्वेप्यन्यरूपेणाहेतुत्वेवसंभवादितिइत्थंचविशिष्टरूपेणाहेतुत्वेनतद्रूपंयद्विस्मव्यापकतावच्छेदकंनस्यात्तद्धूमकारणताव
च्छेदकंनस्यादितिपयन्यरूपेणाहेतुत्वेचतद्रूपंयद्विस्मव्यापकतावच्छेदकंनस्यात्तद्धूमोपधायकतावच्छेदकंनस्यादितिव्या
पकताग्राहकतर्ककारइतिध्येयं नाहष्टान्वयव्यतिरेकाभ्यामिमत्रान्वयव्यतिरेकयोरन्यूनतरूपसत्त्व एववह्निद्धूमस्यप्रसह
त्वंननुनरसत्वेइत्येवमाकारकत्वेतठ्ठोद्धूमस्येववाकारणत्वमितिमत्रतयोरन्वयोनुपपन्नइत्यतआहउभन्यूनतरूपवत्ताएवेत्यादिः व
ह्निद्धूमस्येतिग्रात्मप्रत्यक्षेव्यभिचारवारणायवह्निद्धूमनिवेशः गुणादिप्रत्यक्षेनवारणायद्रव्यस्यनिवेशः लाघवादाहमन्येइत्येवं
तिलाघवादितिउभन्यूनतरूपवद्रूपत्वेनहेतुत्वादिशेष्यविशेषणभावेविनिगमनाविरहेणाकार्यकारणभावद्वयमवच्छेदकगौरवं
चेतिभावः उभन्यूनतरूपत्वेनेति अन्यूनतररूपवत्तावह्न्यादीनाप्रत्यक्षवारणायोन्यूनेतिउभन्यूनतरूपविनोवाधादिनोप्रत्यक्षवारणा
यरूपेतितत्रेतिकार्यस्येतिशेषः विषयतेतिकारणस्येतिशेषः ननुपावानेवेतितथाचविषयविषयवाद्रव्यस्यद्रव्यत्वेनकार

गातैवनास्तिकोऽप्यनुगतरूपस्यावच्छेदकत्वमित्यपिप्राचीनमतेऽप्युक्तमितिभावः प्रागेवअनुमितेलक्षणावसरएवस्वयामिति शेषः अन्य
त्वेनैवेति एवकारेणाभावत्वस्यव्यवच्छेदः प्रागभावघटध्वंसध्वंसकल्पितत्वादितिघटेत्यर्थः प्रसंगदितितथाचघटोन्मज्जनप्रसंगापत्ते
घामग्निरितिभावः प्रागभावध्वंसस्यातिप्रतियोगिरूपस्येति शेषः प्रागभावेतिउक्तव्याप्तिवलाद्वित्यादि प्रागभावसत्वस्वंतदुन्म
ज्जनमित्यर्थः लाघवात्‌भावत्वानिवेशप्रयुक्तलाघवात्‌ मतान्तरेनैवध्वंसप्रतीतिप्रागभावव्यापकप्रतियोगितायाः कार्यताव
च्छेदकसंबंधत्वात्प्रागभावध्वंसेव्यभिचारः प्रागभावस्यत्वेनैवस्वातंत्र्येणैवहेतुत्वेत्याशयः कल्पनेऽतिप्रसंगइति शेषः सामग्री
तिकिंताद्रूप्येनजन्यत्वावच्छिन्नस्यध्वंसेसत्वादितिभावः ध्वंसध्वंसकल्पनाप्रयासेरेवध्वंसकारणतायांभावत्वंनिवेश्यतामित्यतआ
हएकत्वमुखेनेतिप्रागभावप्रतियोगित्वरूपेणिध्वंसप्रतियोगित्वस्यध्वंसजनकतावच्छेदकत्वासंभवादितिभावः लाघवेनेति उपा
ध्यपेक्षयानतिरिक्तवच्छेदकत्वेलाघवमितिभावः ननुनित्यस्यध्वंसापत्तिवारणायैवध्वंसप्रतिजन्यभावत्वेनहेतुतासिद्धांतिमिरस्ये
यतेसत्वेनैवध्वंसहेतुतायांचनदूषणगमप्राचामतआहनित्यस्येतिअसमवायिनाशाभावादितिइदंचनव्यमतेनप्राचीनमते रापं.

समवायिनाशाभावादित्यपि द्रष्टव्यं गुणादिरिति नित्यस्यैव तु धर्मो ते गुणायोरिति अप्यन्तरस्येति शेषः ननु तेजःसंयोगात्मकपा
कस्यापि रूपनाशकतया क्लृप्तस्य विशेषसामान्यात्मकस्य नित्ये संभवेन कथं विशेषसामग्री विरह इत्यत आह पाकस्येति अ
पार्थिवरूपेति पार्थिवरूपाभिन्नेत्यर्थः अन्यथा पाकस्यापार्थिवरूपनाशकत्वे तद्रूपं च सत्त्वावत्त्वं च · तन्मात्रस्य फलेन समा
नत्वमात्रस्य · विशेषसामग्र्यपेक्षणाच्च · तत्तन्नाशकरूपविशेषसामग्रीसहकृतस्यैव सत्त्वावत्त्वस्य ध्वंसप्रयोजकत्वेव · फलेति ध्व
सरूपेत्यादि · तस्य ध्वंसस्य · अनेनैव उक्ताशयादेव तत्त्वयोः कार्यत्वकारणत्वयोः अक्षमिति तथा च पाकपाकजत्वाद्वेः कार्या
घनात्मकत्वेऽपि कार्यतावच्छेदकत्वादिदोष इति भावः तत्कारणत्वेति परिमाणकारणत्वेत्यर्थः उक्तत्वादिति द्रव्यं पृथिवीत्यादि
न्यत्र द्रव्यत्वपृथिवीत्वयोर्व्याप्यव्यापकत्वेन निरवधि सहचारग्रहे मूलत्वं तत्र घटादौ द्रव्यत्वसत्त्वे जन्यसत्त्वे जन्यसत्त्वेन द्रव्यत्वेन का
र्यकारणभावो मूलमिति भावः तस्य कार्यकारणभावस्य · घटादौ परिमाणासत्त्वेऽप्यन्यत्राद्वेरेव मूलत्वेनावयवमहत्त्वादीनां परिमा
णकारणत्वकल्पनस्य न तन्मूलत्वमत आह अन्वयरिति समवायिलं · तुल्यं - तौल्यं च साम्यिग्राहकत्वेनैव बोध्यं अर्थः तद्रूपमिति मूलार्थः

स्वव्याघातकत्वमितिसंदिग्धोपाधिमनिवास्कमितिशेषः शंकायांपिशाचीत्वाभावादाद्शंकास्त्विनितयाधोपाधित्वशंकायाश्रौपचा
रिकंपिशाचीत्वमितिभावः शंकासत्वे उपाधित्वशंकासत्वेनादित्तिव्यभिचारशंकेत्यर्थः नन्संदेहेन व्याप्यसंदेहात्मकसाधनविशे
ष्यकसाध्यव्यापकव्यभिचारसंदेहेन व्यभिचारसंदेह इतिसाधनेसाध्यस्यव्यस्यादितिनसंदेहेनव्याप्यसंदेहात्मकसाध्यविशेष्यकसा
धनाव्यापकव्याप्यत्वसंदेहेन साध्येसाधनाव्यापकत्वस्येतिसाधनेसाध्यव्यभिचारपर्यवसितत्वस्यस्यादि नन्वप्रयोजकेतिक्रमेणाननु
भयविधसंदेहप्रयोजकमित्यर्थः साधनानिश्चितिश्रग्निमत्व्यभिचारान्वितं व्यभिचारेतिसाध्यव्यापकव्यभिचारेत्यर्थः साध्यइनेश्र
ग्निमव्याप्यत्वेनान्वितंव्याप्यत्वेतिसाधनाव्यापकव्याप्यत्वेत्यर्थः दृष्टिवितोप्रतिबंधकत्वेत्तिनहिप्रयोजनहेतुनिभियेस्यादिम्यायादिति
भावः व्यारव्यापायरिष्यहइतिनयावपक्षेव्यभिचारशंकेवेत्तिपूर्वोक्तिदृष्टांतासिद्धिरपीतिभावः प्रतिबंधाभावादितितादृग्यशंकास
त्वेपिगगनादेरद्व्यत्वादिनापरिमाणानुमितिरनुभवसिद्धत्वादित्याशयः सर्वसंयोगस्यपक्षत्वेपिकरवान्हिसंयोगस्यपक्षत्वादा
हकरवन्हिसंयोगमात्रस्यनिसंदेहस्येतिसंभवादित्यग्निमेणान्वयः अग्नेरुपाधित्वस्यचसंभवादित्येवपाठः बाधादितिसंयोग राम०

संयोगाद्यवृत्तिधर्माभावादिति भावः दीधितौ तथात्वे पि निरुपाधित्वेपि क्वचिन्न व्याप्तीत्येव पाठस्तत्राप्ययमेवार्थः । व्याख्यायां अप्रयो
जकत्वात् तदापातात् अनुपाधित्वेपि त्वयोपाधित्वांगीकारेपि तदनुमानानां । परिमाणादिसाध्यकसदनुमानानां निरुपाधि
त्वमिति तवापि मतमिति शेषः नास्ति न संभवति इति इत्युत्तरं आह पक्षेतरस्योपाधित्वे क्वापि निरुपाधित्वं न स्यादित्याशंकायामाह
मुहुः साध्यव्यापकेति साध्यवत्त्वसाध्यवत्त्वप्रकारकप्रमाविशेष्यत्वादित्यर्थः रक्षणार्थमिति पक्षमंतर्भाव्यैव साधनाव्यापकत्वादिति
भावः रक्षणायेति सपक्षैकदेशवृत्तिधर्मस्योपाधेः पक्षवृत्तिधर्मावच्छिन्नसाध्यवतिपक्षे सत्वादिति भावः आद्ये एकदेशपदव्यावृत्ति
माह सपक्षैकदेशवृत्तिधर्मस्येति उपाधित्वेनाभिमतस्येति शेषः अभावादिति पंचम्यंतद्वयस्य साध्याव्यापकत्वेन्वयः सपक्षेति पक्षे
त्यादि । साध्याव्यापकत्वेति पक्ष सपक्षवृत्तिधर्मावच्छिन्नसाध्यवत्पक्षेतरउपाधेरभावादिति भावः व्याघातेति सपक्षैकदेशवृ
त्तिधर्मस्य पक्षावृत्तित्वादिति भावः सपक्षैकदेशेतीति सपक्षेतरवृत्तिधर्मादिरयमुक्तधर्मावच्छिन्नसाध्याव्यापकत्वादेकदेशेति
हेत्वाभासान्तरादिति हेत्वाभासस्यादिसाध्याभिचारस्तं यत्तत्रेत्यर्थः पत्रव्यभिचारसंशयो हेतोर्वर्तते तत्रानिरासार्थमनुकूल

तत्रापि इच्छायामपि सर्वत्रानुकूलतर्कस्य व्याप्तिग्राहकहेतुत्वे मानाभावेन पक्षानुकूलतर्कोनास्तितदानस्माभिर्नैवव्याप्तेरन्तरंगत्वमिति मलमनुप
पन्नमतआह सर्वत्रैवेति· तज्ज्ञानस्यउपाधिज्ञानस्यउपाधिपरस्य तावत्परत्वाभावेपितद्वतिरित्याशयेनाह उपाधेरिति· तस्य· अ
नुकूलतर्काभावस्यसाध्यसंबंधितावच्छेदकेतिसाध्याभावसामानाधिकरण्यविरहसाध्यसामानाधिकरण्यावच्छेदकत्वस्य यः उपजीव्यमि
तिउपाधिनाज्ञाप्यमानेनावच्छेदकाभावसाध्यसामानाधिकरण्यापपादनादित्यभावः संबंधबोधेसामानाधिकरण्यबोधे· उभयोः उ
पाध्यनुकूलतर्काभावयोः ननु उपदर्शितार्थलिप्समुपाधेर्दोषत्वं· उपजीव्योपजीवकाभावविकल्पेनेतिशेषः उपजीव्यत्वाभिधाने
अनुकूलतर्काभावेउपजीव्यत्वेनदोषत्वाभिधाने· उपजीव्योपजीवकभावेतिकार्यकारणाभावेन्यथ्यैः अनुकूलतर्कसत्वरव्याघुक
रितस्योपाधेरात्मलाभार्थमनुकूलतर्काभावस्योपजीव्यत्वमस्त्वेवेत्यतआह अनुकूलतर्केरितोतिसंभवादितिउपाधेरात्मलाभार्थमनुकू
लतर्काभावस्योपजीव्यत्वासंभवादितिशेषः अविरहत्वेनेति प्रमेयत्वादौ साध्यतदभावयोःसामानाधिकरण्यसत्वान्नतद्विरोधः वि
रहद्वयोःसाध्यसामानाधिकरण्यतदभावयोरेकेनैकत्रहेतौसत्वमित्याशयः पूर्वेपिहेतौसाध्याभावसामानाधिकरण्यज्ञानात्मककोत्व राम०

पिकद्यविधिरितिकार्यकारणभावग्रहोदेरेवानुकूलतर्कतयानदृष्टसामग्र्यपायदशायांकदाचिन्नदृष्टाभावसंभवादितिभावः धूमवा
न्वह्निरित्यादौवह्निर्यदिधूमव्यभिचारीस्यात्तर्हिवह्न्यजन्यःस्यादित्याद्यसत्तर्कविषयीभूतापाद्यव्यतिरेकदृष्टकत्वाभावाद्यात्मकानुकूलत
र्काभावस्यदृष्टेनावसत्त्वेनोपाधेरनुकूलतर्काभावव्याप्यत्वासंभवादाहसत्तर्केतिनसदृष्टताविनिवह्निमान्धूमादित्यादौधूमोयदिवह्नि
व्यभिचारीस्यात्तर्हिवह्निजन्योनस्यादित्यादिसत्तर्कविषयीभूतापाद्यव्यतिरेकवह्निजन्यत्वाद्यभावात्मकानुकूलतर्काभावस्यधू
मादावसंभवादितिभावः निर्युक्तिकत्वादितिव्याप्यस्यधूमादेरनुपजीव्यत्वेनव्यापकस्यवह्न्यादेरुपजीव्यत्वेनचव्यापकस्यापजी
व्यतयाव्यापकस्यानुकूलतर्काभावस्योपजीव्यतयाहेतुत्वसंभवेनोपाधेरुपजीव्यतयाहेतुत्वाभिधानमसंगतमित्याशयः
विनिगमकत्वात्दूषकतायांविनिगमकत्वसंभवात् व्यापकस्योपाधेर्दूषकत्वसंभवेपिविशेषः एकतरेतिव्याप्यव्यापकयोरित्या
दि एतत् पूर्वोक्तंननूपाधेर्तीयमानदूषकतात्वासंभवेप्यनुकूलतर्काभावस्यस्वरूपसतोदूषकतयानज्ञायमानदूषकतासंभ
त्पमत्राह अनुकूलतर्काभावस्येतिअनुमानविषयेतिनथाचानुमानस्यज्ञायमानलिंगात्मकतयातस्यनज्ञायमानदूषकत्वा

टी॰ १७६ 176

351

संभवद्वृत्तिभावः व्यभिचारपदार्थ इति · अनुकूलतर्कस्येमाद्धिहेतुर्महानसाभावत्वइति · स्वसमानाधिकरणपरीहारायेदमिति विशेष्यदलसार्थ
क्यायमहानसेति महानसेव्यभिचारवारणाय विशेष्यनिवेशः अत्र सत्यंतेन द्रव्यत्वे केवलसावच्छिन्नपर्यंतेन द्वितेन रसजलस्य हेतुत्वांततया
न हेतुत्वांतासिद्धिः नहीतिमहानसत्वेन पर्याप्त्यधिकरणवृत्तित्वं साध्यव्याप्यवत्कत्वादीति विशेषिताविशेषितसाधारणताया ताद्रूप्यासाध्यव्या
प्तिग्रहत्वस्येवलक्षणानवच्छेदकत्वे निवेशादिति भावः पक्षनिष्ठत्वस्यायथार्थत्वान्निविशेषणत्वेऽप्ययोगोलकं धूमवत् वह्नेरित्याहाववया
गोलकनिष्ठायाधूमादिव्याप्तिर्हेतोरेतदुक्तापि कायावन्याहिव्याप्तेरसत्वमिति योगोलकनिवन्याहावतिव्याप्तिरनस्तन्तद्वितीयव्याप्त
तिविशेषणाभिमतमभिप्रेत्याहपक्षनिष्ठायेतिउक्तापक्षत्वस्यान्वयनपक्षोपधायकतत्वस्यपक्षेयच्छाहेलानसाध्यव्याप्तत्वमुन्नयनंका
व्याप्तिरनवाह उन्नायकत्वमितिनहीति उन्नयनेपर्याप्तनुन्नयनयोग्यतायाव्याप्तिपक्षधर्मतारूपत्वेपिपक्षनिष्ठत्वेनपक्षधर्मता
यालाभात्त्वाप्तिरेवात्रोन्नयनयोग्यतेसाध्यायेनाहव्याप्तेर्लाभइति · नहीतिव्याप्तिः महानससाधारणेतिव्याप्तिः तत्रतेयोलक्षणत्वान्ता
तिव्याप्तिरनवाहतेषामिति · एवं सम्प्रतिपक्षोन्नायकत्वस्यहेतुकताबीजत्वे · परं परेति स्वाभावनिवर्त्तसाध्यापकस्वरूपपरंपरेम राम॰

न्य वृत्तिः संबंधत्वाभाव· येन संबंधेन साधनस्योपाधिसमव्याप्यत्वाभाव· लक्षणादित्यत्र सत्त्वादेलक्षणतावच्छेदकपरः एवमग्रेपि·
तन्मवेशं साधनस्येस्य स्वभवेशं यद्वेतीतिरानन्दत्येव्यभिचारोन्नायकत्वमेव स्वरूपकतावीजमिति भावः पूर्वलक्षणार्थेन पूर्वल
क्षणतावच्छेदकार्थेनि वस्तुतस्तुकयद्भावेनेत्यादिनोपवर्णितार्थेनि· तदर्थपरतया· वस्तुतस्त्वित्यादिनोपवर्णितार्थपरतया· नच
मेवं पूर्वेनकर्तव्यं· उपसंहारः सच धर्मोपिस्याभावान्यत्वे साध्यसाधनसंबंधाभावत्वस्तु उपसंहारः द्वितीयेतिपदेतीत्यर्थः मुख्यसा
ध्यव्यापकस्यत्वेनतन्मकारानुसरणावेयर्थ्यमितत्राह साधनावच्छिन्नेति· तत्संबंधाभावस्य· साध्यसाधनसंबंधाभावस्य· अन
तिरिक्तत्वात् साध्याभाव साधनाभावानतिरिक्तत्वमिति प्राचांमताश्रयणात् कर्तव्य इतिव्यावर्तनेहिनव्याहसाधनसत्वमयो
गोलकइत्यनेनेति शेषः अभिप्रायेणेति साध्यसाधनेसंबंधाभावव्याप्यसाध्याभावव्याप्योपाध्यभावेसुतरांनतुभयसंबंधाभाव
व्याप्यत्वमिति भावः प्रतियाद्नाहितिइदमुपलक्षणं· साध्यसाधनेसंबंधाभावोसिद्धिमगमकत्वासंगतेरित्यपि द्रष्टव्यं इत्यस्यान्वयस्य
हेतुत्वेपिद्व्यस्ये समीत्यादिमूलमनुपपन्नं अन्यान्यव्यभिचारेणान्तस्यनिश्चेद्व्यत्वेसतिमत्पत्नसस्यनिवर्तकत्वासंभवादत आ

हृ द्रव्यपदमिति यत्र · गोरश्वत्वादिरूपो · यद्धूमस्येतिहेतुवह्निसमानाधिकरणैस्तदेशवत्त्वेनैकादेशद्रव्यं · इतीतिइत्यादिग्रंथमाचक्षिक
स्वपदार्थः न तु भयेतिसाध्यसाधनोभयपदार्थः एव मन्येपि कश्चित् बाधादिस्वरूपे · एतावन्मात्रेणेति · उपलक्षणं साधारणासाध
नसंबंधनिवेशाभिप्रायेण साध्याभावोन्नायक · त्वाभावादिति सरूपाभावमित्राननयत्वादित्यादौ शाकपाकजत्वाद्यभावस्यामित्रा
ननयत्वसंबंधिरूपावच्छिन्नाभावानुन्नायकतया शाकपाकजत्वादावव्याप्यात्वभ्रमस्यावश्यकत्वादिति भावः · अन्येपि जलत्वगंधवदित्या
दिग्रंथेपि अस्य नरोन्नायकत्वस्य दूषकताबीजत्वेप्रस्येकोन्नायकस्य लघुत्वयातत्र लघुतावच्छेदकसत्वेनातिव्याप्तिरित्याशयेना
हृ द्वित्वीयप्यासंभव मितिनव्याख्याने तदुन्नायकत्वस्य दूषकताबीजतया ग्रमेकोन्नायकस्य लघुत्वमेवेतिभावः स्वाख्यायां तदेक
देशेतिनरावायुरित्यादौ इत्यर्थः पूर्वत्रापि · पूर्वकल्पइवेपि · एकसंबंधेन साध्यसाधनभावे साध्यतावच्छेदकसाधनतावच्छेदकान्यतर
संबंधेन साध्यसाधनोभयाभावस्य न केवलान्वयित्वमतआह भिन्नसंबंधेनेति इत्यर्थ इतिक्वचित् द्वित्वाद्यर्थ इति पाठस्तत्रादिना विशे
षणतावशेषेणानिवेशनेन स्वस्य संग्रह इत्यादिकमिति ग्रन्थादिनावह्निमाणपरीसासाधनस्यसाध्यमितियथाश्रुतमागएवसाध्य राम०

नव्यावर्त्तकत्वस्य मूलेऽप्रदर्शनमितस्य परिग्रहः निष्कर्षमिति वदतां मतमिति शेषः पक्षे प्रकृतपक्षे इदं चाप्रकृतानुज्ञापकेऽनु
पाधावति प्रसंगवारणाय तदनुज्ञापके पर्वतत्वाद्यनुज्ञापके पर्वतत्वादेरपि स्वाभावाभाववत्त्वादाह व्याख्येति विलक्षणेति व्यावर्त्तकध
र्मदर्शनव्याप्तेत्यर्थः बोधस्यापि समूहालंबनबोधस्यापि अप्रसिद्धमिति प्रत्येकबोधत्वस्यैव प्रतिबध्यतावच्छेदकत्वेनोभयप्र
कारकबोधत्वस्य प्रतिबध्यतानवच्छेदकत्वादिति भावः नाहार्यतेनेत्यात्प्रकारकेत्यर्थः तेन समूहालंबनमादायोक्तातिप्रसंग
निरासः धर्मितावच्छेदकेनेति न तृतीयार्थो विशिष्टांसामानाधिकरण्यरूपेण याप्यधर्मितावच्छेदकविशिष्टवृत्तित्वपागल्भ्यैमा
रात्साहृश बोधविरोधीत्यस्यानुषंगेणान्वयः तत्र विरुद्धस्यत्वे हेतुकारेति आदिना व्याप्तिसाध्यकस्य परिग्रहः अत एवासंभवइति
क्वचिदित्यादि इत्यादिरिति आदिना व्यावर्त्तकधर्मदर्शनव्याप्तत्वविरोधित्वानिर्वचनपरिग्रहः अस्मिन्नेव च यथासंभवमसिद्धेः स
त्यन्ति पक्षस्योन्नायकत्वरूपगमनापेति अस्य येत्यग्रिमेणान्वयः अस्य येति अहेतित्वघटितेति मित्यर्थः तत् तद्रूपतावच्छेदके
तत्र च प्रमेयत्वावच्छिन्नसाध्यहेतुकस्थले च समवायसंबंधेनेति हेतुतावच्छेदकसंबंधेन नाहार्याभावविवक्षायामिदं संयोगे

शे॰ नेतिसाध्यतावच्छेदकसंबंधेनतादृशाभावविवक्षायांयोध्यंव्यतिरेकिणोधर्ममात्रस्येतिपक्षेनिष्ठेत्यादि॰ संयोगेनरूपाभावस्यकेवलान्व
यित्वादितिभावः यत्रमेयपर्व्वतेकिंचित्संबंधेनेतिकल्पेपिस्यादित्यूहनीयमित्यादि॰ अन्यत्रापिचेतीति अपिनाभिन्नसंबंधेनसाध्यसाधन
भावस्यत्वपरिग्रहः अन्यतरवदभावेति॰ अन्यतरत्वोपलक्षितवदभावेत्यर्थः तेनसंयोगेनचान्यत्वेत्याद्यव्यभिचारस्यापत्तरत्वेनान्य
तरवदभावानुत्थापकेप्यन्यकेसाध्याभावाप्रत्यापकेत्रा ईंधनादेरव्याप्तिः एवमग्रेपि॰ तदभावोन्यापकइतिपक्षेनिष्ठव्यतिरेकि
णोधर्ममात्रस्येतिशेषः उक्तापकेइतिजलत्वपृथिवीत्वादावितिशेषः प्रागुक्तरीत्येतिअन्यतरावच्छिन्नप्रतियोगिताकेयत्रावच्छे
दकतासाध्यतावच्छेदकतावच्छेदकसंबंधेनहेतुतावच्छेदकतावच्छेदकसंबंधेनयत्किंचित्संबंधेनवातत्राद्यकल्पेविभिन्नसाध्यताव
च्छेदकसाधनतावच्छेदकताघटकसंबंधस्यलक्षणघटकविषयितयावह्नित्वज्ञानवानरूपादित्यादौविषयितयारूपत्वज्ञानाभा
वोन्यापकेतादृशज्ञानसामग्र्यादावतिप्रसंगः द्वितीयकल्पेचतत्रैवसमवायेनवह्नित्ववद्दुयभावोन्यापकेवह्न्यवयवत्वादावतिप्र एम॰
संगः तृतीयकल्पेचतदुभयस्मिन्नतिव्याप्तिरित्याखंडलार्थः वह्निव्यावर्त्तकइतिवह्निसामग्र्यादावितिशेषः तादृशप्रमाचेतिस

समूहालंबनात्मिकेत्यादि येोष्यतयान्वेति अंगगाग्राहिकतया इतरविशेष्यकसमूहालंबनव्यावृत्ततद्व्यक्तित्वेन। नचैवं तद्व्यक्तित्वेन प्रमा
व्यक्तिनिवेशने प्रमात्वनिवेशो व्यर्थ इति वाच्यं द्व्यापत्तेः तादृशनिवेशलाभायैव प्रमात्वोपादानात् अहत्रिपक्षतावच्छेदक इति
गगनवत्समवेतत्वे इत्यादावित्यर्थः व्यभिचारोन्नायक इति आईधनाशादावितिशेषः प्रकारांतरं। प्रकारांतरंवदनोपमते। विशेषइतिइत
रविशेष्यकसमूहालंबनव्यावृत्तप्रतीतिविशेषः विशिष्यतद्व्यक्तित्वेन समूहालंबने इतरविशेष्यकसमूहालंबने। दोषः अति
प्रसंगः द्रव्यत्वाभावोन्नायक इति गुणत्वत्वादावितिशेषः तद्भ्रमं। साध्यतावच्छेदकप्रकारकभ्रममपि। अपिनापक्षतावच्छेदकसा
धनप्रकारकभ्रमपरिग्रहः अतिव्याप्तीति वह्निमान्धूमादित्यादौ धूमत्वादिप्रकारकभ्रमाविषयव्याप्याद्यारोपजन्यादौ साध्यव्या
वर्तकसाध्यसामान्याद्यावत्तिव्याप्तीत्यर्थः इत्याशयेनोक्तं साधनतावच्छेदकमुपादीयत इति प्रमात्मकप्रतीतिविशेषस्यैव तद्व्य
क्तित्वेनोपादानाद्भ्रमप्रमादायतातिव्याप्तिरिति भावः संयोगेनेत्यस्य व्याप्तिभावार्थवर्णनच्छलेनाह समवायेनेति। दीधितौ सम
वायित्वादौ समवायानुयोगित्वादौ व्यभिचारोन्नायक इतिशेषः आरव्याप्यांशेत्रैव कल्पे इति द्वितीयकल्प इत्यर्थः हेतुतावच्छेदकसंयो

नधूमावयवस्यधूमानामन्यत्वेनाव्यापकत्वेवस्तुमात्राणांतिव्याप्यभावादितिभावः अतिव्याप्तिमपीति अपिनोक्ताव्याप्तिसमुच्चयः
मूलेव्यतिरेकिधर्मत्वमितिनचसर्वस्यैववह्नित्वाद्यवच्छिन्नव्यतिरेकप्रतियोगित्वेनपाक्षिकत्वसंबंधावच्छिन्नप्रतियोगिताकव्य
तिरेकप्रतियोगित्वेनचव्यतिरेकित्वमव्यापकमितिवाच्यं तत्संबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वे
सतितत्संबंधावच्छिन्नप्रतिमत्त्वावच्छेदकोयोधर्मस्तद्वत्त्वंतेनसंबंधेनतद्रूपेरोपाधित्वमित्यस्यविवक्षितत्वात् संयोगादि
संबंधेनगुणत्वगुणाद्यरोभयत्वाद्यवच्छिन्नस्योपाधितावारणायविधेयत्वं नन्वनुपाधेस्तत्तद्रूपावच्छिन्नसाध्यकत्वमद्रू
पावच्छिन्नहेतुकोपाधेस्तत्रहेतुत्वमितिपत्तुपक्षेतनन्तस्याथोनितत्तद्रूपावच्छिन्नसाध्यव्यापकतावच्छेदकत्वेसतितत्तद्रूपावच्छिन्नसा
धनाव्यापकतावच्छेदकंयद्रूपंतद्वत्त्वमित्यर्थः पक्षेनरत्वंवह्निधूमसंबंधोपाधिःस्यादितियोजना वाह्निधूमसंबंधोपाधिरित्य
स्यवह्निव्याप्यवच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकोपाधिरित्यर्थः व्याख्यायांउपाधिपदस्याप्रत्वात्इति आदिनोपाधिव्यवहारविषय
त्वपरिग्रहः नरत्वव्याप्यत्वेनवह्निव्यापकत्वाव्याप्यत्वेन घटत्वादेर्व्यभिचारादितिभावः नानुमितिप्रतिबंधकत्वेनेत्यनेनायकत्वघटि॰ राम॰

तज्ज्ञानस्यानुमितिप्रतिबंधकत्वे मानाभावादिति भावः ननु पर्यवसितमेत्यादेः स्वाभावसमानाधिकरणव्याप्यधर्मवत्त्वागाहित्वेन व्याप्तिज्ञानप्रतिबं
धकतया कस्यचिदनुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वमत आह उपाधिशरीर इति साध्यव्यभिचारित्वेनेति पूर्वोक्तरीत्या
तद्ग्रहेण निश्चयर्षकरणादिति भावः इतरथा तु तदसिद्धि स्फुटतायां तु व्यभिचारव्याप्यत्वेनेति साध्यव्यापकाभावसमानाधिकरणत्व
स्यावच्छिन्नघटितस्य व्यभिचारव्याप्यतावच्छेदकत्वादित्यर्थः तदपि निरुक्तोपाधित्वमपि व्याप्तमोपध्येकभेदानुमापकं न
त्वितिनिष्ठावव्यतिरेकित्वस्यानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकत्वेपि न क्षतिः। तादृशसामान्येन पुंसकं अतो न तस्या
तिव्याप्त्यादिपरामर्षकत्वात्तु यथाप्तिः ननु यो गोत्वत्वं धूमवद्धेतौ पत्र पक्षेतरस्फुटज्ञाने न तत्रोपाधित्वमिष्टमेवेत्यत आह पर्वत
इतिनिर्धूमपर्वतस्य पक्षत्वे पक्षेतरस्य निरुक्तोपाधित्वग्रहे गत्वादिकं अलमेवेत्यत आह धूमवत्पर्वतस्येति निरुक्तेति पद्धर्माविच्छिन्नसाध
नाव्यापकत्वेन तद्धर्मस्यार्थः आदिना स्वानधिकरणसाधनाधिकरणान्यगोत्वादेः परिग्रहः अर्थ इति वह्निधूमसंबंध इत्यादि मूलस्य
त्यादिसाधनव्यापके यद्वा वह्निमान्धूमादित्यादौ वह्निसामग्र्यादेः वह्निसमारोपानित्यत्वाञ्चित्पादिना वह्निसमारोपस्यार्थः एवं साध्य

टी १८०

359

समानाधिकरणत्वरूपस्य साध्यव्यापकत्वस्य लक्षणप्रवेशो ननु वस्तुतः सत्यधिकं व्यभिचारित्वेनैव साधनप्रवेशस्य सम्यक्त्वात् तत्रा
ह तन्नेति · व्यभिचारित्वेन · साध्यव्यभिचारित्वेन · येनेति तथा च साध्यव्यभिचारित्वेन निवेशे तदनुमानवैफल्यमिति वस्तुतस्तु म
मेति भावः दीधितौ नातिप्रसंगइति लक्षणासंकेतो रप्रवेशादिति भावः व्याख्यायां तथैवः साध्यतावच्छेदकादिगर्भमेव · साध्य
मिति तथा च नोक्तातिव्याप्तिर्न वा ऽननुगमइति भावः उपदर्शितमिति तथा चास्मन्नयप्रवेशएवेति भावः केचित्तु स्यादिति नेति
मनोपन्यासस्य नेनान्वयः तन्मतम् · अन्ये त्वित्यादिनोक्तमतम् · व्यभिचारोन्नायकत्वेन हेतुव्यक्तित्वाभावं साधनाव्यापकत्वस्य प
क्षधर्मता संपादकतया उपयोगोस्त्येव यत आह सत्यामिति पक्षे उन्नायकतायामिति रामहितिपेत्याभासोक्तमनौचित्यं स्यादित्यत आह·
साध्यस्यापि पक्षस्यापि उपाधित्वादिति तथा च साध्यं च नोपाधिरिति मूलमसंगतमिति भावः सत्वात् वस्तुगत्या सत्वात् तत्प्रति
हेपक्षेति साध्यं च नोपाधिरिति मूलेनेत्यादिः तदिति उक्तोपाधित्वेत्यर्थः पक्षः साध्यव्यभिचारानुमाने पक्षः तत्र स्थापनाहे
तोः येयथ्याद्विति हेतुनिष्ठपेनैव व्याप्तिविषयतादिति भावः अभिप्रायेति तत्र साध्यव्यभिचारस्येत्यनुषज्यते · अनुमानेति · राम०

अनुमानं·अनुमितिः अतः अनुमितिमात्रोच्छेदप्रसंगादिति मूलासंगतेः दूषणं· साध्यस्योपाधित्वदूषणं· ननु हेतौ साध्यस्य व्यभिचारनिर्णयितस्य साध्ये साधनाव्यापकत्वनिर्णयात्मकत्वया साध्ये साधनाव्यापकत्वसंदेहासंभवेन तत्प्रयुक्तसंदिग्धोपाधित्वासंभवेपि साध्यव्यापकतासंदेहप्रयुक्तसंदिग्धोपाधित्वे बाधकाभाव इत्यत आह साध्यस्येति व्याप्तिमत इत्यादि· स्वसाधकतायाः स्वस्य व्यापकतायाः प्रसक्तत्वादित्यतिस्त्वोक्तरीत्याऽसंभवादित्यभावः व्यभिचाराद्व्याप्यस्येति संदेह इत्यग्रिमेणान्वयः साधनाव्यापकत्वेति साध्य इत्यनुषज्यते· न व्यापकसंशयेति साध्यव्यापकोपाधिव्यभिचारव्यापकस्य साध्यव्यभिचारस्य तदात्मकस्य साध्ये साधनाव्यापके व्याप्यत्वव्यापकस्य साध्ये साधनाव्यापकत्वस्य संशयेत्यर्थः तेन व्याप्यसंशयेन संशयेति व्यापकसंशयेत्यर्थः तत्र· उक्तहेतुत्वे· संशयेति साधकसंशयेत्यर्थः संशयविशेष इति व्यापकसंशयविशेष इत्यर्थः तदिति व्याप्यसंशयेत्यर्थः हेतुत्वं· तत्साहचर्ये व्याप्यतदभावयोर्व्यापकतदभावसाहचर्यं· तदिति व्याप्यसंशयेत्यर्थः कारणत्वं व्यापकसंशये व्याप्यसंशयकारणत्वं· उक्तरूपं किमित्याशंक्य न्यायमाह उक्तरूपं चात्रेति असाध्यवृत्तिर्जातिरिति अव्याप्यवृत्तिः संशयवृत्तिर्जातिरित्यर्थः

टी. १८१ 181 361

तत्रस्थाणुर्मिविषयकत्वावच्छिन्नतत्तत्कोटिविषयकत्वावच्छेदेन संशयत्वस्याज्ञानितिरिति यावत् अयमाशयः धर्मिणि पुरुषत्वं सम्भाव
यामीति प्रतीतिकाले पुरुषत्वाभावं संभावयामीति प्रतीत्यनुदयात् तत्तत्कोटिविषयकत्वविशेषावच्छिन्नजातिविशेषवत्त्वापा
त्तात् तादृशप्रतीतिविषयतायाः स्वावच्छेदकत्वेनाव्याप्यवृत्तितादृशजातिविशेषसिद्धिः एवं तत्कोटिसहचरितभूयोधर्मवद्धर्मिज्ञा
नस्य कार्यतावच्छेदकमुत्कटतत्कोटिकसंशयत्वमिति कार्यतावच्छेदकतयापि तत्सिद्धिः ननु यत्र पुरुषत्वाभावसहचरितधर्मापे
क्षया अधिकधर्माः पुरुषत्वसहचरिता धर्मिणि तत्र पुरुषत्वांशे ओत्कट्यप्रयोजिकायास्तादृशधर्मिज्ञानरूपायाः सामग्र्याः सत्त्वात्
पुरुषत्वसहचरिततावद्धर्मग्रहसत्त्वेन तद्रूपेणया पुरुषत्वाभावसहचरितानामनेकधर्माणां ग्रहदशायामप्यत्र तयातद्दशायामपि पुरु
षत्वांशे उत्कटसंशयापत्तिरिति पुरुषत्वाद्यंशे उत्कटसंशयं प्रति पुरुषत्वाद्यभावसहचरितधर्मवत्ताद्धर्मिज्ञानस्य पुरुष
त्वादिसहचरितधर्मत्रयादिमद्धर्मिज्ञानविरहविशिष्टस्य प्रतिबन्धकत्वावश्यकतया न हेतुहेतुमद्भावो निरर्थक इति चेन्नैवं पुरुष
त्वतदभावसहचरितैकैकधर्मवत्त्वाज्ञानकाले उक्तप्रतिबन्धकासत्त्वेन पुरुषत्वाद्यंशे उत्कटकोटिकसंशयस्यापत्तेर्वारयितुमशक्यत्वात् राम०

न्कोद्यं येऽजकरसंशयं प्रतिनन्कोटिसहचरितभूयोधर्मवद्धर्मितानस्यहेतुतायाश्चावश्यकत्वादितिज्ञानेऽप्यव्यवहितत्वानियमस्य
सिद्धेर्नसिद्धत्वाभावेऽनुरोधेनाहविषयताविशेषइति अत्राप्युक्तरीत्याशयोऽवसेयः नचनन्कोटिसहचरितभूयोधर्मवत्त्वाग्रहेऽन
धर्मिकसंशयोत्कटत्वस्यैवतात्पर्यधर्मितानकार्यतावच्छेदकत्वसंभवात्तोत्कटरूपोत्कटत्वसिद्धिसंभवइतिवाच्यं तस्यगुरुत्वेनयोत्को
त्कटत्वस्यैवतत्कार्यतावच्छेदकत्वात् अन्यकार्यतावच्छेदकतयातिरिक्तविषयतांगीकारेधूमलिंगकत्वादिविषयितायाअपिध
मपरामर्शादिकार्यतावच्छेदकतयासिद्धिप्रसंगः नचप्रयोजनविरहात्तत्रतात्सिद्धिरितिवाच्यं तुल्यकोटिकसंशयेव्यभिचारवार
णायोत्कटत्वस्यैवावश्यलिंगकानुमितौव्यभिचारवारणायाव्यवहितोत्तरत्वादिनिवेशगौरवेणलाघवात्तत्रतात्सिद्धेरावश्यकत्वादि
तिचेन्नइष्टापत्तेः अतएवाचार्याणामुक्तलाघवमल्लिकालिंगोपहितलैंगिकविषयतानुमितावितिधेयाशयः यत्त्वेवंसति अनुमि
त्यादिजनकतावच्छेदकतयाव्यतिरिक्तविषयतासिद्धिप्रसंगः नव्यासम्प्रतिपत्तिजनकतावच्छेदककोटौव्याप्यादिविषयत्वानिवेश
प्रयुक्तलाघवसंभवादितिलाघवेनातिरिक्तविषयतासिद्धस्वीकारोऽसंगतइतिनवीनानामुद्भावनंतदभिप्रायानवगमात्से

मंजस तथाहि मन्मानरासिद्धस्य कार्यतावछेदकत्वादिकल्पनमेव कार्यतावछेदकत्वादिना सिद्धिरनुपपन्ते एवं चोत्कटत्वस्य पुरुष
त्वं संभावयामि न पुरुषत्वाभावमिति प्रतीतिसिद्धतया लाघवेन तादृशधर्मज्ञानकार्यतावछेदकत्वादिना सिद्धिरनुपपन्ते एवं
चोत्कटत्वस्य पुरुषत्वं संभावयामि न पुरुषत्वाभावमिति प्रतीतिसिद्धतया लाघवेन तादृशधर्मज्ञानकार्यतावछेदकत्वकल्पने न
कार्यतावछेदकतया सिद्धिस्तु यदा एवं लिंगोपहितत्वे गौकविषयतया लिंगविशिष्टपक्षकानुमितत्वं नुभवसिद्धतया लाघवेन
न स्वाधूमपरामर्षादिजन्यतावछेदकत्वकल्पनया कार्यतावछेदकतया सिद्धिर्वैशिष्ट्यानां एवं धूमलिंगकत्वादेरपि धूमेन वह्निम
नुमिनोमीति लोकेन त्वादिप्रतीतिसिद्धतया लाघवेन धूमपरामर्षादिजन्यतावछेदकत्वकल्पनेन कार्यतावछेदकतया सिद्धिस्तु
व्याप्तानुमितिजनकतावछेदकतयाभिमतायास्तत्वाप्याविषयत्वादिति क्रांविषयतायामानोंतरासिद्धतया जनकतावछेदक
त्वकल्पनाऽसंभवेन कथं लाघवेन जनकतावछेदकतया तत्सिद्धिः न च परामर्षमात्रासिद्धत्वं न त्वेवातिरिक्तविषयतायाजनकता
वछेदकतया सिद्धिर्दुर्घरितिवाच्यं दृष्टापत्तेः अत एव रक्तदंडवत्त्वेन पुरुषं जानामीति प्रतीतिसिद्धया विशिष्टवैशिष्ट्यविषयता राम०

याविषयोगितावच्छेदकप्रकारकनिश्चयजन्यतावच्छेदकत्वकल्पनं लाघवांशे निश्चयत्वाद्यनिवेशप्रयुक्तलाघवेन तस्या अनुमि
तिजनकतावच्छेदकत्वकल्पनं च सुवचमिति ताद्दशज्ञानजन्यतावच्छेदकतया ताद्दशविषयतासिद्धिः सर्वेषामभिमता विशिष्टवैशि
ष्ट्यावगाहिपरामर्शस्यैवानुमितिजनकतावादिनामनुमितिजनकतावच्छेदकतया ताद्दशविषयतासिद्धिरभिमता संगच्छते अ
न एव सुरभिचंदनमित्यादौ सौरभांशे न पूर्वमणिमते प्रतीतिसिद्धायाः लौकिकविषयतायाः प्रत्यक्षप्रतीतिविषयजन्यतायां च हेतुसंयो
गादिजन्यतायां चावच्छेदकत्वंकल्पने इन्द्रियजन्यतावच्छेदकतया तत्सिद्धिर्न तु आहत्यैव लाघवेन जन्यतावच्छेदकतया तत्सिद्धिरि
त्यादिकमप्यन्यदप्यूहनीयमिति दिक्. तात्पर्यग्राहकमिति न्यायवाक्यस्य विमृद्दस्यलक्षणाया व्याप्यसंशयहेतुत्वमप्येतत्सूत्रप्र
तिपाद्यमिति न तद्विरोध इति भावः नस्यैव· वकारस्यैव· न तदर्थकत्वेनेति व्याप्यसंशयहेतुत्वार्थकत्वे इत्यर्थः प्रसंगात्तत्संख्यावच्छेद
स्यार्थ इति विप्रतिपत्तेरित्यादि· अत्र एकधर्मिणि विरुद्धकोटिद्वयमति पत्तिजनकवाक्यद्वयं शब्दो नित्यो न वेत्यादिरूपं न तु ताद्दश
वाक्ययोर्मिथो विरोधेन शाब्दबोधानुपधायकयोर्धर्मिकोटिद्वयोपस्थितिद्वारा मानससंशयजनकत्वं ताद्दशवाक्यज्ञानस्य तत्र

टी०

183 धर्मिकतत्तत्कोटिकसंशये तत्तद्धर्मितत्तत्कोटिवाचकपदज्ञानत्वेन हेतुताद्रूपावच्छिन्नजन्यत्वेऽपि न शाब्दत्वापत्तिः विरोधिकोटिगोचरशा
ब्दसामग्र्यभावादिघटितशाब्दसामग्रीजन्यत्वात् तज्जन्यत्वस्यैव शाब्दत्वप्रयोजकत्वात् एवं च पंचम्यर्थः प्रयोज्यत्वमिति संप्रदायः
यत्तु तत्तत्कोटिप्रत्यक्षे तुल्यबलायास्तद्विपरीतकोटिप्रत्यक्षसामग्र्याः स्वतन्त्रशाब्दबोधे विपरीतकोटिशाब्दसामग्र्या अपि प्रतिबंध
कत्वे मानाभावात् तत्र संशयात्मक एव शाब्दबोधः एवं च पंचम्या योजितत्वपक्षे वेति नव्यमतानुसारिभिरुक्तं तदसत् नियतत्वनियतत्वाभाव
प्रकारताया निरूपितशाब्दत्वावच्छिन्नविशेष्यकशाब्दत्वावच्छिन्नं प्रति सामग्र्यां तत्र कल्पने गौरवात् न तूभयप्रकारतानिरूपितैकविशे
ष्यताकत्वरूपवैशिष्ट्येन तत्तदभावयोः यत्नेनैकशाब्दसामग्रीभ्यां प्रयोज्यमात्रसामान्ये नोपपद्यते विशिष्य तूपपत्तिसमुच्चयज
नकसामग्रीभ्यामपि संशयजननापत्तेः न च कोट्योर्विरोधज्ञानसहकृतमेव विशिष्टज्ञानसामग्रीद्वयं संशयत्वावच्छिन्नं जनय
तीति वाच्यं विरोधज्ञानस्य संशयहेतुत्वे मानाभावात् न च समुच्चयोत्पत्तिकाले संशयानुत्पत्तिरेव तत्र मानमिति वाच्यं अप्रा
माण्यज्ञानास्कन्दितत्वज्ञानस्य संशयप्रतिबंधकत्वेनैव तदुपपत्तेः संशयपूर्वं नियमेन विरोधज्ञानकल्पने मानापेक्ष्यात् प्रतिबंधकत्वस्यैवौचित्यात् राम०

न किंच संशयात्मकशाब्दबोधस्वीकारे विप्रतिपत्तिस्थले ऽप्रामाण्यः संशयात्मकशाब्दे ऽसौ मध्यस्थस्य मुख्यस्थले सत्त्वेन तद्वारणा
य संशयात्मकशाब्दबोधे वा परं तन्त्रविरोधित्वान्न स्यात् निश्चयपरार्थान्वितत्वापरार्थविरोधान्वितत्वनञ्पदार्थनिष्ठान्योन्याभावप्रयोगा
नरवाक्यार्थत्वान्नस्य च कारणान्तरकल्पने गौरवापत्तेरिति दिक् उपलब्धिरिति निश्चय इत्यर्थः एवमग्रेऽप्युपलब्धिशब्दस्य सर्वत्र
निश्चयपरः अत्र विशेष्यरूपाधिकरणोक्तिर्न प्रमेय इत्याशयेनाह यत्रेति अनुपलब्धिशब्दात्केवलाभावोपलब्धिलाभ इत्य
न आह कार्य इति योग्यानुपलब्धेरभावोपलम्भहेतुत्वादिति भावः नयोः नञोरिति निश्चयत इत्यभाववन्निश्चयविशेष्ययोः सपक्षविप
क्षयोरिति यावत् अभावनिश्चयस्य तद्विघटनाभावस्सत्त्वं यस्य सः अपायसत्त्वनिधर्मि इत्यर्थ इत्याशयेनाह सपक्षविपक्षेत्या
दि नन्वापेक्ष्य इति तत्सहकारिक इत्यर्थः कारणं संशयकारणं लक्षणं संशयलक्षणं एकधर्मिकेति एकधर्मिकविरुद्धोभयविष
यकत्वमित्यर्थः अत्र विभिन्नधर्मिकज्ञाने ऽतिप्रसंगवारणायैकधर्मिकेति एकविशेष्यकेत्यर्थः अयैवमपि भिन्नरूपेणैकविशे
ष्यकत्वेनातिप्रसंग एकधर्मावच्छिन्नविशेष्यकत्वनिवेशेऽपि भिन्नरूपेणैकविशेष्यतावच्छेदककत्वेनातिप्रसंगः एकरूपावच्छि

दी॰

त्वविशिष्यतावच्छेदकताकत्वनिवेशे च भिन्नरूपेणाविशेष्यतावच्छेदकतावच्छेदकमवगाहमानज्ञानेनेति प्रसंगः निरवच्छिन्नविशेष्य
तावच्छेदकताकसंशयासंग्रहश्चेति चेन्न एकधर्मपर्याप्तावच्छेदकताकविशेष्यताकत्वस्य विभिन्नावच्छेदकताकाप्रविशेष्यताक
त्वस्य वा निवेशेनादोषात् समुच्चयेति प्रसंगवारणाय विरुद्धेति प्रमेति प्रसंगवारणायोभयेति यद्यप्यत्र वास्तवविरोधनिवेशे
समुच्चयेति प्रसंगनाद्वस्य विरोधविषयतानिवेशे च विरोधाविषयकसंशयासंग्रहस्तथापि सर्वत्र संशये ननन्तसंसर्गतया वि
रोधविषयकस्योपगमेन विरोधविषयतापराएव निवेशः वस्तुतस्तु उभयप्रकारतानिरूपितैकविशेष्यताकत्वं समुदितत्वं ह्रस्वा
र्थः समुच्चये चोभयप्रकारतानिरूपितविशेष्यताद्वयोपगमान्नातिप्रसंगः न च समुच्चये एकाविशेष्यतासंशये च विशेष्यताद्व
यमित्येवाङ्गीकृतेन स्यादिति वाच्यं मतेकनिरूपितपविशेष्यताभ्यामेवसमुच्चयविशेष्यतोपपत्तावतिरिक्तविशेष्यतोपगमे गौरवापत्ते
रित्येव सारं अधिकमस्मत्कृतभवानन्दीप्रकाशादावनुसंधेयं संभवादिति व्यभिचारवारणायेति शेषः अथ वह्नितो भिन्नत्वमिति सा
मानाधिकरण्यविशिष्टमिति शेषः ननु लिंगो यद्वितत्वे लिंगीकमानवादिमते लिंगस्यानुमितानाविव साधारणधर्मदर्शिनां संशये धर्मि राम॰

तावच्छेदकतयाभानेनैवाव्यभिचारवारणासंभवेगुरुतरमप्यवच्छिन्नान्तरत्वं कार्य्यं तावच्छेदककोटौ न निवेशनीयमत आह साध्या
रणधर्मस्येति स्वरूपसदिति ताद्दशनिश्चयानुपस्थितावपि संशयोत्पादादिति भावः यथाश्रुतमेवेति एवकारेण सत्त्वेऽप
त्यग्रहणपरत्वस्फुरणस्य चकारः नुक्तसमुच्चायकत्वस्य च व्यवच्छेदः ननु कोटिद्वयसहचरितत्वस्य तद्द्वभावोभयसहचरितत्व
रूपतयानन्यसहचरितत्वे सति तदभावसहचरितत्वरूपतया वा एकत्वस्यार्थत उपयोगस्याविरुपकत्वमत आह तत्कोटिसहचरि
तेति तथा चाघउभयत्व यदेशो गौरवात् द्वितीये विनिगमनाविरहेण कारणतानाद्वयस्यावश्यकत्वे ऽवच्छेदकगौरवेणानोकरूप
णकारणतात् किं तु नन्नतत्संशयेन तन्न ...हचरितधर्मवत्ताज्ञानत्वेन तदभावसहचरितधर्मवत्ताज्ञानत्वेन च तत्तत्कोटिसहच
रितधर्मधीः पृथगेव तद्विशेषकारणतान्तद्वयमिति भावः नन्वेवमप्येकेनैव संबंधेन कोटिद्वयसाहचर्य्यं घटकव्यक्तिस्थापेक्षत्तानां
पंव्याप्यासंशयसंग्रह इत्यत आह द्वद्वमुपलक्षणमिति लिंगसंदेहस्य व्याप्यासंदेहस्य कत्य मितिव्याप्यसंशयस्य व्याप्तिघटक
तया लिंगे लैंगिकसाहचर्यप्रकारकत्वेपि लिंगाभावे लैंगिकाभावसाहचर्यप्रकारकत्वादिति भावः तत्र साधारणधर्मवत्ताज्ञाने

साध्याभावसहचरितलिंगाभावमितितथाचयद्व्यापकसंशयोत्पद्यतेतद्व्याप्यसंशयेलिंगाभावज्ञानेनस्यतत्स्यतद्दृ
न्तिलैंगिकाभावसाहचर्यस्यलिंगाभावांशेप्रकारत्वमपिफलबलात्कल्पनेयत्रयत्कथंचित्तादृशसाहचर्यग्रहस्तत्रव्याप
कसंशयएवनजायतइतिभावः इत्याकारकसंशयेतिइत्याकारककोटिद्वयसाहचर्यप्रकारकसंशयेत्यर्थः संशयानन्त
रंतादृशसाहचर्यप्रकारकसंशयात् ननुकेवलतादृशसंशयाद्बुद्धिसंशयस्यानुभवसिद्धत्वविवादइत्यतआह अनुभवत्व
व्याप्यत्वेनेत्यनुगतत्वेनव्याप्यसत्ताकत्वंव्याप्यत्वेनव्यापकाभावसत्ताकसंशयापत्तिरुक्तेति[illegible]रीत्यैकसंबंधेनकोटि
द्वयसाहचर्यस्यविवक्षणासंभवादितिभावः संयोगसंबंधावच्छिन्नेतिइदमुपलक्षणांविशेषणतानियताविशेषणावच्छिन्नमपि
बोध्यं संयोगसंबंधेनेतिइदमप्युपलक्षणंविशेषणतानियतविशेषणतात्वपिद्रष्टव्यं ननुसंयोगविशेषणतान्यतरसंबंधेन
लिंगतदभावोभयवत्त्वासंभवत्वेनतआह असाधारणस्यैवइतियत्संबंधेतियद्रूपावच्छिन्नयत्संबंधेनत्यर्थः साह
चर्यमितिगृह्यतइतिशेषः तेनसंबंधेनतद्रूपावच्छिन्नतत्संबंधेन संबंधद्वयस्यान्यतरत्वेनचनसंबंधत्वंनवाप्रतियोगि राण॰

नावच्छेदकत्वमिति ग्रहोभिसंधिः अन्यथा असाधारणघटत्वकाभावप्रतियोगितावच्छेदकसंबंधप्रतियोगितावच्छेदका
वच्छिन्नप्रतियोगीधर्मिविच्छिन्नतावच्छेदकसंबंधयोरैक्याविरहरोः एकविशिष्टाधारत्वमिति तथाच विशिष्टस्यानतिरि
क्ततया न संयोगादिसंबंधेन लिंगतदभावोभयवत्ताज्ञानासंभवइतिभावः । अभिसंधिमुद्घाटयति तस्मादिति संशयवि
षयत्वइति प्रत्ययादिवचनं अत्रेवच्छेदः ताद्रशेति धर्मिणि धूमतदभावयोः संशयविषयतावच्छेदकेत्यर्थः अन्यतरसंबं
धेनेति तृतीयार्थः वच्छिन्नत्वं प्रतियोगितान्वितं एवंच संयोगविशेषणतया धर्मिणि धूमतदभावसंशयविषयता
वच्छेदकत्वमप्यन्यतरत्वेनैवोपयुज्यते इति ध्येयं साहचर्यग्रहात् साहचर्यग्रहसंभवात् कथंचिदिति विभिन्नसंबंधद्वयेनो
भयवत्त्वप्रतीत्योभयाभाववत्ताप्रतीत्या एवं संबंधद्वयस्यान्यतरत्वेन संबंधत्वस्य प्रतियोगितावच्छेदकत्वस्य चानापत्त्योपगमा
दितिभावः इत्याकारकज्ञानाभावेपि लिंगतदभावोभयाभावेकोटिद्वयसाहचर्यप्रकारकज्ञानाभावेपि ननु ताद्रशसाहच
र्यग्रहोद्बुद्धसंस्कारस्यैवापेक्षितत्वेन तत्प्रकारकज्ञानाभावेपि ताद्रशसंस्कारसत्त्वेनोक्तसंशयाद्युत्पत्तिसंशयानुपपत्तिरत आह

टी॰ १८६

371

186

अन्यतरसंबंधेनेतिसंबंधद्वयेनोभयवत्वप्रतीतेरन्यथाभावप्रतीतेश्चाविचारप्रसक्तेरन्यतरत्वेनसंबंधत्वप्रतियोगितावच्छेदक
त्वयोरसिद्धेरितिभावः असंभवादितितथाचसंस्कारेपिनसंभवतीतिभावः ननुप्रमस्यैवमेवोक्तज्ञानमात्रस्तामतआह प्र
मस्यैवेति अप्रसिद्धत्वादितादृशज्ञाने ज्ञानाभिज्ञज्ञानेनायोग्यत्वं अपिनाप्रमात्मकताद्दशज्ञानपरिग्रहः उपाधेःसा
धनाव्यापकत्वस्यसंदेहेपितस्यसाध्यव्यापकत्वव्यभिचारसंदेहानात्मकतयातस्मात्साध्यव्यभिचारसंदेहोहेतावितिमुक्तिरसं
गताइत्यतआहउपाधाविति तस्यसाधननिष्ठाभावप्रतियोगित्वस्य तथाचोपाधौयत्रसाधनाव्यापकत्वस्यैवसंदेहस्त
त्रोपाधित्वविशिष्टसाध्यव्यापकत्वस्यविशेषणतावच्छेदकस्यनिश्चयात्साधनंसाध्यव्यभिचारव्याप्यसाध्यव्यापकोपाधि
व्यभिचारित्ववेतिसंशयस्ततःसाधनंसाध्यव्यभिचारिनवेतिसंशयइतिभावः साधनाव्यापकत्वव्याप्यत्वस्यसंदेहात्कथंसाध
नाव्यापकत्वसंदेहोतआहसाधनाव्यापकेतितथाचयत्रसाध्यव्यापकत्वस्यैवसंशयस्तत्रसाधनाव्यापकत्वस्यविशेषणता
वच्छेदकस्यनिश्चयात्साध्यंसाधनाव्यापकत्वव्याप्यसाधनाव्यापकोपाधिव्याप्यत्ववन्नवेतिसंशयस्ततःसाध्यंसाधना राम॰

372

व्यापकं तच्चेति संशय इति भावः साध्यव्यापकत्वसंदेहस्य साध्ये साधनाव्यापकत्वसंदेहोपव्यापकत्वे पि न साध्याव्यभिचारसंशया
व्यापकत्वमत आह साधन इति संशयः विशेष्ये विशेषणतामितिन्यायेन संशयः विशेषणतासंशयस्य विशिष्टसंशयहेतुत्वा
दिति भावः प्रथमप्रकारस्य साधनाव्यापकत्वसंदेह इत्यादिनोक्तस्य असंभवादित्यग्रिमेणान्वयः द्वितीयप्रकारस्य च सा
ध्यव्यापकत्वसंदेहे त्वित्यादिनोक्तस्य असंभवादिति प्रथमे साध्यव्यापकत्वनिर्णयस्य द्वितीये च साधनाव्यापकत्वनिर्णय
स्यापेक्षितत्वादिति भावः अत्रेति इत्यादिस्वरस इत्यग्रिमेणान्वयः असंभवादित्यन्ते किं तु प्रतियोगितायां प्रकारतया निवेशे तु सा
ध्यव्यापकतावच्छेदकत्वोपलक्षिततत्तदुपाधितावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं वाच्यमिति शेषः आर्द्रेन्ध
नप्रभृतिरुपाधौ साध्यव्यापकत्वसंदेहस्योपाधितावच्छेदके साध्यव्यापकतावच्छेदकत्वसंदेहे पर्यवसानादिति भावः तद्वृत्तित्वा
र्द्रेन्धनत्वं वह्नेरित्यर्थः कथमिति उक्तनिर्णयस्य संदेहप्रतिबंधकत्वादिति भावः व्यापकतावच्छेदके ति व्यापकतावच्छेदकत्वोपल
क्षितेत्यर्थः इष्टतां तरमाह आर्द्रेति व्यापकतावच्छेदकत्वोपलक्षितार्द्रेन्धनत्वावच्छिन्नाभाववद्वृत्तित्वादिरूपेणेत्यर्थः

रा० १८७

373

र्थानस्य चाभावादिति । हृस्वत्वस्याभावात्प्रत्यर्थः ननु विशिष्टोपाधितावच्छेदकावगाह्युपाधितावच्छेदकावच्छिन्नाभाववद्वृत्तित्वसंशया
संभवेपि व्यापकतावच्छेदकत्वमात्रेणानवगाहि संशये बाधकाभावद्यत आह किं चेति संशयाधायकत्वं साध्यव्यापकत्वसंशये
निरुक्तसाध्यव्यापकव्यभिचारसंशयाधायकत्वं कोप्यप्रसिद्धेरिति साध्यव्यापकस्य प्रमेयत्वादेः सर्वत्र सत्वादिति भावः धूमव्या
पकेतिधूमव्यापकतावच्छेदके सत्यर्थः असंभवादिति न यावत्पर्वते किं हूयमानत्वमनुवर्तत एवेति भावः ननु स्वरूपेण तदुपाधितावच्छेद
कावगाहि निरुक्तसंशयासंभवेपि यत्किंचिद्रूपेणानवगाहि संशये बाधकाभावे इत्यत आह आर्द्रेन्धनत्वाद्यनुविशिष्टव्यापारादिः अप्र
योजकइति विशिष्टसंदेहे विशेषणसंदेहस्य समानविशेष्यतावच्छेदकतावच्छेदेनैवप्रयोजकत्वादिति भावः इत्यादीति अत्रादिना
पक्षोयाधौ साध्यव्यापकत्वसंदेहकाले केवलान्वयिन्येवान्यत्र साध्यव्यापकत्वनिश्चयस्तत्र साध्यव्यापकीभावाभाववत्त्वनिश्चयात्स्व
धनं साध्यव्यापकाभाववद्वृत्तित्वेति संशयासंभवस्तस्य परिग्रहः इत्थमेव चेत्याद्युक्तं परिहरति उभयत्रेति दलद्वयस्यार्थः तस्य
व्रउपाधिव्यभिचारस्य यसंदेहहेतुत्वे किंचिदिश्यमानन्वयः न यावद्दलद्वयस्यैवेध्मोवान्यव्याप्यो न वा पर्वतो धूमवान्नवेति रा॰

संशयात्पर्वतो वह्निमान्नवेति संशयवदुपाधिव्यभिचारः साध्यव्यभिचारव्याप्योनवा साधनमुपाधिव्यभिचारवन्नवेति संशया
त्साधनं साध्यव्यभिचारि नवेति संशय उपपादनीय इति भावः उक्तस्थले प्रकारांतरेण साध्यव्यभिचारसंशयमुपपादयति व्या
प्यत्वसंदेहविषयस्येति व्याप्यत्वसंदेहविषयतापन्नस्येत्यर्थः उपाधिव्यभिचारस्येति शेषः संदेहकोटिमावच्छेदकांशे साध्य
व्यभिचारव्याप्यत्वांशे संदेहात् साधनः साध्यव्यभिचारव्याप्यवन्नवेति सामान्यतः संशयात् कथंचिदिति व्याप्यत्वांशे संश
यात्मकस्यापि व्याप्यसंशयस्य व्यापकसंशयहेतुत्वांगीकारादिति भावः व्यभिचारेति साध्यव्यभिचारेत्यर्थः श्यामत्वोपाधिरिति
नच साध्यस्यानुपाधितया कथमेतदिति वाच्यं तद्रूपावच्छिन्नसाध्यमेतद्रूपावच्छिन्नस्यानुपाधित्वेनाशयात् कथमिति साध्यव्या
प्यहेत्वव्यापकत्वेन साध्याव्यापकत्वसाधनादिति भावः सद्धेतुत्वाग्रह इति अनुकूलतर्कानवतारे रोग्यादिमत्त्वे साध्यव्यापकतासं
देहे साध्यव्यापकतासंदेहेपि सोपाधिना साधनाव्यापकत्वसंदेहसमुच्चयः व्याख्यायां नवीनमतेपीति तन्मते ज्ञापयानं सद्धेतुमि
नि विरोधितस्यैव हेत्वाभासत्वेन न स्वहेत्वाभासत्वाभावात् सद्धेतुसाधारणेन साधकतासाधकत्वासंभवादिति भावः स्वस्यापि·

टी.

प्रतिबन्धिनोऽपि । आद्यस्य व्याप्तिग्रहस्य व्याख्यामाह साध्यव्यापकत्वेन निश्चितेत्यादि । द्वितीयस्य व्याख्यामाह पक्षेतरेत्यादि । पक्षधर्मत्वेन नि
श्चितपक्षधर्मत्वेनेत्यादीत्यर्थः । यो न स्वरूपतो नापि व्याप्तिविरहरूपतया साध्यादिनेत्यादि । ननु व्याप्यत्वासिद्धं न भवितुमर्हत्युपाधिमतो व्याप्य
त्वाज्ञानद्वारा दूषकत्वमित्यर्थः । किं तु यथा व्याप्यत्वेन यो न ज्ञातः प्रसक्तिरेव नास्तीति कथं तत्परिहाराय यावत्तारतम्यमिति मतेऽप्युपाधेर्व्या
प्यत्वासिद्धत्वे यथाश्रुतार्थे नित्यव्याप्तिविरहेण न भव इत्यर्थ इत्यर्थः । इदमुक्तमिति तथा च यथाश्रुतार्थमादाय प्रसक्तयो न स्वतः
परिहाराय यत्नारम्भणीये प्रयोजनमिति भावः । सोपाधित्वज्ञानस्येति सोपाधिकत्वज्ञानस्येत्यर्थः । इत्यादिनेति मूलेनेति शेषः । तत्र सो
पाधिकत्वज्ञानस्य प्रतिबन्धकत्वे दूषणाशानमिति भिन्नधर्मितया व्याप्तिप्रकारकज्ञानस्य तत्प्रज्ञानप्रतिबन्धकत्वासंभवस्वरूप
दूषणाश्रयमित्यर्थः । असंगतमिति अनुकूलतासंभवादिति भावः । तदभिप्रायेणोक्त । सोपाधिकत्वज्ञानस्य प्रतिबन्धकत्वाभिप्रायेणोक्तं । न
न्वेनोपाधिकत्वज्ञानशङ्कायां कथमोपाधिकत्वज्ञानाभावलाभ इत्यत आह तथापीति असंभवादिति सोपाधिकत्वज्ञानाभावस्यानि
त्यत्वेन तत्प्रतिबन्धकत्वासंभवादित्याशयः । इत्यस्यासंगतिरिति पूर्वपक्षे कारणज्ञानविघटकतयैव प्रतिबन्धकत्वोक्तावस्त्वनः प्रतिबन्ध राम०

कत्वस्यानुकूलत्वेनानुकूलोपाद्यसंभवापत्तेरित्याशयः अर्थमाहेति व्याप्यत्वासिद्धिरूपे हेत्वाभासे उपाधेर्व्याप्याद्यभावानात्मकत्वेनोत
र्भावासंभवादितिभावः अंतर्भावासंभवादिति उपाधेर्व्याप्तिज्ञानाभावस्वरूपत्वाभावादितिभावः एकत्रेति साध्यव्यापके साधना
व्यापकत्वेत्यर्थः दूषणांतरमेव नत्वमस्येत्यादिमूलतात्पर्यविषयीभूतेन विरोधविषयकत्वरूपदूषणेनैव अन्यस्यापि साधने
साध्यव्यापकाव्याप्यत्वस्यापि पुनराशंकनमिति न चेत्यादिना साधने साध्यव्यापकाव्याप्यत्वज्ञानस्य व्याप्तिज्ञाने प्रतिबंधकत्वाशंक
नमित्यर्थः नन्वेकेति पुनराशंकेत्यर्थः भिन्नधर्मिकत्वमेवेति एवकारेणाविरोधविषयकत्वव्यवच्छेदः तदेवाभिन्नधर्मिकत्वमेवव्य
भिचारः स्यादिति साध्यव्याप्यं यत्साध्यमूतद्व्याप्तित्वद्व्यभिचारित्वस्य साध्यादैशिकत्वेन तत्र साध्याव्यापकत्वस्य साध्यव्यभिचारित्वाभा
वेन व्यभिचार इति भावः निर्धारणमिति सर्वंवाक्यं सावधारणमिति न्यायसिद्धं निर्धारणमित्यर्थः पौनरुक्त्यमिति नेनापि साध्यव्यभि
व्यभिचारज्ञानद्वारैव दूषकत्वस्योपपादनादितिभावः उभयनिर्णयात् साध्योपाधिव्यभिचारनिर्णयात् ग्रंथ इति सप्तम्यर्थः प्र
तिपाद्यत्वमनुमानान्वितं प्रतियोगित्वस्यापि तद्रूपव्यभिचारस्यापि तत्प्रतिबंधकत्वेनेतादृशव्याप्तिज्ञानप्रतिबंधकत्वेत्यर्थः

आहवस्तुतोमयुख्यानांसन्तमाह॥ धूमत्वमित्यादि॥ अत्रव्याप्तेः साध्यतावच्छेदकेनाद्रधनाभावप्रतियोगितानवच्छेदकत्वगर्भतयासाध्ये
नाद्रधनाभावप्रतियोगित्वंविहायसाध्यतावच्छेदकेनाद्रधनाभावप्रतियोगितावच्छेदकत्वंसाधितं॥ मितिभावः॥ व्यभिचारात्प्रनुमान
इतिमेयावंवाह्निव्यभिचारिवाह्निसामग्रीव्यभिचारित्वादित्याद्याकारकइत्यर्थः॥ आद्येतिनचसाधनेत्यादिग्रंथमध्येत्वेवतत्स्वावार्थमा
हेत्यर्थः॥ अतएवव्याप्तिघटितहेतुत्वयनेपिसाधनाभाववद्वृत्तित्वोपाधित्वस्याभिप्रेतत्वादेव॥ गगनादेरपीति॥ अत्रत्वगगनादेरित्यादि
नेतिशेषः॥ दूषणं॥ साध्याव्यापकत्वं॥ वह्न्यादीतिअत्रयथासाध्यव्यभिचाररूपसाध्यस्यगगनादावसत्वेनसाध्याव्यापकत्वंवह्न्यादा
मसंगतंस्यादितिभावः॥ अस्यैवसाधनाभाववद्वृत्तित्वस्यैव॥ तत्साधनेति आर्द्रेंधनव्यभिचाररूपसाधनेनेत्यर्थः॥ तथाविधेतिसाध
नाभावद्वृत्तित्वरूपेणेत्यर्थः॥ तस्य॥ आर्द्रेंधनादेः॥ तत्रापि॥ व्याप्यत्वसाभावद्वृत्तित्वस्यैव॥ तत्साधनेति) साधनेपिसत्वेपीतिसंयोग
इत्यादि॥ साधनव्यापकत्वासंभवादितिसंयोगएवमत्रसत्वेनव्यभिचारादितिभावः॥ यद्यपीतितिपूर्वपक्षेप्रोक्तोपाधेःसत्प्रतिपक्षोत्था
पकतयादूषकत्वेसत्प्रतिपक्षेनुत्थापनापत्तिरूपदोषस्यनिराकरणार्थमपीत्यर्थः॥ व्यभिचारोन्नायकत्वेनेतिसावधारणंतत्॥ उन्न रामः

दोषनिराकरणं· ननु संदिग्धोपाधिनोक्तरीत्या व्याप्तिपक्षविच्छेदसंभवापाधौ भवेन्नाम किं मेनेत्यसंगतमत आहतथा चेति संदेह
नाधीनेति अनयोरेकतरमित्यादिरीत्येति भावः सत्प्रतिपक्षेति उक्तरीत्येत्यादिः अस्तु सत्त्वेनेति उपाधिसंशयाधीनव्यभिचा
रसंशये विप्रतिपत्तिहेतुसंदेहनाधीनव्यभिचारसंशयानवकाशादिति भावः हृदयगतत्वाभावात् हृदयतात्त्वाभावेनैव फलात्· अनुमि
तिप्रतिबंधेनैवानितरभावव्याप्यत्वमात्रज्ञानमुद्रयेत्यादि· एवकारेणोक्तरीत्या व्यभिचारसंशयपरिहारस्य व्यवच्छेदः सत्प्रतिपक्ष
विच्छेद इति· साक्षादनुमितिप्रतिबंधेन सत्प्रतिपक्षोन्नायकत्वस्याहेतुसमत्वादिति शेषः तथा च सत्प्रतिपक्षविच्छेदरूपं संदिग्धो
पाधिफलाभावेन संदिग्धोपाधेर्वैफल्यं तदवस्थमेवेति भावः आहेति संदिग्धोपाधिवैफल्यनिरासार्थमाह इत्यर्थः तदस्फुटो-
व्यभिचारास्फूर्तेरिति तः· निरुक्तव्याप्त्यादिस्फूर्तिः नस्यादित्यत्रेष्टापत्तेः संभवादाह एवमिति समानेति इदं च सामग्रीविशेषणं-
समानत्वं च प्रत्यक्षेन साध्यानुमापकहेतोर्व्याप्तिपक्षधर्मतयोर्ज्ञानजनकसामग्र्या समानकालीनत्वं· पक्षधर्मताज्ञापकेति पक्षध
र्मतयाज्ञापकेत्यर्थः प्रतिपक्षपरामर्शेति· प्रतिपक्षव्याप्तिसाध्यानुमितिजनकप्रत्यक्षसाध्यहेतुपरामर्शेत्यर्थः एवमग्रेपि· तदुक्ता

पकत्वे सत्प्रतिपक्षस्य बाधस्य चोन्नायकत्वं तदुन्नयनात् उक्ताप्यतरोन्नयनात् उपजीव्यतापरत्वमसहमानस्त्वाह यद्वास्तीति निरू
प्यपक्षसंभवादिति उक्तोपाधिव्यतिरेकस्यासाधारण्येपि पक्षे साध्याभावासाधकतया न तु पाधिना सत्प्रतिपक्षोन्नयनासंभवेपि धूमो
वह्निव्यभिचारी पर्वतेतरत्वव्यभिचारित्वात् द्रव्यत्ववदिति रीत्या न व्यभिचारेण हेतौ साध्यव्यभिचारसाधने साधारण्यानवकाशे
न व्यभिचारोन्नयनसंभवादितिभावः तस्य असाधारण्यविपर्ययस्य तत्रापि तस्य ह्युपयन्तावीजत्वेपि न दोषाभासत्वं असाधा
रणविपर्ययस्याभासत्वे सत्प्रतिपक्षेति असाधारणस्यानुपपत्ते शाकपाकजत्वादेः सश्यामो मित्रातनयत्वादित्यादौ व्याप्यकपा
कजत्वादेर्निरुक्तरूप सत्प्रतिपक्षोन्नायकस्यापि शाकत्वप्रतिपक्षोन्नयनोपयिकरूपमादायाभासतायामिष्टापत्तेः जत्वादेः
स्यादिति निरुक्तप्रमाणाभासत्वादितिभावः तदुन्नयनोपायिकामिति तथा च सश्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादेर्नि
रुक्तरूपसत्वे न तस्याभासत्वमितिभावः मैत्रैव मथिताकः श्यामो मित्रातनयत्वादित्यादौ तस्याभासत्वापत्तिर्दुर्वारा तत्र तस्य निरु
क्तरूपवत्वाभावादिति वाच्यं सत्वं सत्प्रतिपक्षोन्नयनोपयिकरूपमादायाभासतायामिष्टापत्तेः तत्र तस्य व्यभिचारोन्नायकतया राम०

दूषकत्वेन तदुन्नयनौपयिकरूपवैकल्याभावेनाभासत्वविरहात् उपाधित्वं सुघटं यद्वहत्वाद्विति · एवं तोधूमवान्वह्नेरित्याद्यावार्द्रेंध
नाद्यावित्यर्थः एतत् इति प्रतीयते हेत्वाश्रयनौपयिकानि तत्र रूपभूयस्त्वमित्यर्थः अस्तीति सत्यं तद्विरहादिति भावः तस्यापि पक्षेतर
त्वमुपाधेरपि · एतदिति निरुक्तप्रमाणाप्रसूत्येत्यर्थः अभिहितं · यदभिहितं विशेषणं तद्विशेष्यं · अवच्छेदकावच्छेदेनानुमितेरपि सा
मानाधिकरण्यावगाहित्वादाहतन्मात्रेणेति संभवादिति पृथिवीत्वादिना पृथिवीतरभेदादेरनुमितिदर्शनादिति भावः नाभास
त्वइति पूर्वसाधनेव्याप्तिः ग्राहकतर्कावतरणानुकूलतर्कसत्वे प्रतिहेतौ पूर्वसाधनव्यतिरेकस्य वक्ष्यमाणोपाधित्वादिति भावः तत्र
प्रयोजकं · विशेषणनिषेधेति पूर्वसाधनव्यतिरेकत्वस्याभासताप्रयोजकत्वनिषेधेत्यर्थः शेषेति पूर्वसाधनव्यतिरेकत्वस्योपाधि
त्वेनुपाधित्वेवाप्रयोजकत्वेत्यर्थः वह्निमेतीति वह्निनेत्यादिनेत्यर्थः इंधनोप्रतिहेतौ धूमाभावसाधके आर्द्रेन्धनाभावस्येति
पूर्वसाधनव्यतिरेकस्योपाधित्वप्रसंगादिति धूमाभावरूपसाध्याव्यापकत्वेन तस्यानुपाधितया इष्टापत्तेरसंभवादिति भावः प्रतिहे
तौ · धूमसाधके · आर्द्रेंधनस्येति प्रसिद्धोपाधेरित्यादि · प्रसंगादिति तस्योपाधितायामविवादेनेष्टापत्तेरसंभवादिति भावः केवला

टी. १६१

381

१५१

न्यपि निपूर्वहेतौ पूर्वसाधनव्यतिरेकस्याप्रसिद्ध्याप्रतिहेतुत्वपाधित्वेनोद्भावना संभवात्प्रसत्प्रतिपक्षमात्रो छेदइत्यत आह व्यतिरेकि
रागइत्ति नोउपाधित्वसंभवात् उपाधित्वेनोद्भावनसंभवात्तनोपाधिः नोपाधित्वेनोद्भावनसंभावनायोग्यः साध्याव्यापकत्वात् धूमा
भावरूपसाध्याव्यापकत्वात् पूर्वसाधनव्यतिरेकस्य वस्तुगत्यासाध्याव्यापकत्वेन तु हेवाधकाभावइत्यत आह उक्तक्रमेणोति धू
माभाववत्त्वयोगोलके वह्न्यभावस्यासत्वात्प्रसिद्धेरित्यर्थः व्यापकताहेतोः धूमसाधकत्वेनाभिमतवह्निरूपहेतोः धूमाभाववती
भिवस्तुगत्येति शेषः उक्तरूपेति धूमाभाववति वह्न्यग्रहरूपेत्यर्थः एतत्स्य विशेषाग्रहे करशोविशेषग्रहेश्च अन्वयः विशेषाग्रहे
तिव्यभिचाराग्रहेत्यर्थः दशायामेवेति व्यभिचारग्रहदशायां नैव व्यापकताहेतोरसाधकत्वे प्रतिपक्षोपन्यासवैयर्थ्यापातादिति
भावः व्यभिचाराग्रहादिति हेतुनावच्छेदकरूपेणा हेतौ साध्याभाववद्वृत्तित्वग्रहस्यैव व्यभिचारग्रहत्वयावत्साधनाभावत्वेन धूमाभा
ववद्वृत्तित्वग्रहेपि वह्नित्वेन न तद्ग्रहादिति भावः ज्ञानसंभवादिति वह्न्यभावाभावत्वोपस्थितौ वह्नित्वस्याप्युपस्थितेरिति भावः
वत्त्वघटनानुकूलतर्कसत्वे पूर्वसाधनव्यतिरेकस्याप्युपाधित्वेन पूर्वसाधनव्यतिरेको नोपाधित्वेनोद्भाव्यत इति सामान्यतः राम०

टी. ९८२

कथकसमयोनसंभवतीतिविनेत्यं तंकथकसमयं तर्काभावाद्बलवत्तरेत्यादिनेति नत्वाभासत्वादितिवत्बलवत्तरानुकूलतर्कस
त्वेपूर्वसाधनव्यतिरेकस्यसउपाधिरेवेनपूर्वसाधनव्यतिरेकत्वस्याभासत्वाप्रयोजकत्वादितिभावः कथमाभासत्वमित्तिमत
इत्यतोक्तं संगच्छत इति शेषः पूर्वदोषः निमत्वस्यपूर्वसाधनव्याप्यव्यतिरेकत्वासंभवरूपोदोषः द्वितीयोपिआभासत्वासंभव
रूपोपि दुरुद्धोपाधिवारस्यपाख्याख्यारचितामया तुष्टास्संतुतयासंतोविद्वांसोनिरुपाधयः॥ ॥इति श्रीमत्सुराजतमकरमहा
देवपंडितरचितायांसर्वोपिकारितपोभवानंदीव्याख्यायामुपाधिग्रंथव्याख्यासमाप्तः॥ ॥शुभमस्तु॥ ॥मंगलं चास्तु॥

नं० १३६६